## श्रीनारायणतीर्थयतीन्द्रविरचिता

# श्रीकृष्णलीलातरङ्गिणी

☞ TO NAVIGATE *CLICK* ON THE BOOKMARKS PANEL ON LEFT,
*or* *CLICK* HERE TO GO TO "TABLE OF CONTENTS" कीर्तनानुक्रमणिका.
(TO VIEW IN FULL SCREEN MODE (SUPPRESSING THE LEFT PANEL), *CLICK* ON THE "Bookmarks" BUTTON ON THE LEFT PANEL (IT TOGGLES).

©April 2008

# कीर्तनानुक्रमणिका


| | | |
|---|---|---|
| | नारायणतीर्थध्यानम् | ३ |
| १ | जय जय स्वामिन् | ४ |
| २ | श्रीनारायणवाहन | ५ |
| ३ | सुभद्रा बलभद्र | ७ |
| ४ | जय जय रमानाथ | ८ |
| ५ | मत्स्य कूर्म वराह | ९ |
| ६ | रामकृष्ण गोविन्देति | १५ |
| ७ | शरणं भव करुणामयि | १७ |
| ८ | नारयणाय नमो | १८ |
| ९ | जय जय श्रीनिवास | २१ |
| १० | मङ्गळालय मामव | २३ |
| ११ | रक्ष रक्षासुरशिक्ष | २४ |
| १२ | अवधारय मामीश्वरम् | २५ |
| १३ | जय जय दुर्गे | २७ |
| १४ | श्रीपतिमिह नन्दगोपगृहे | ३२ |
| १५ | कलय कल्याणानि | ३३ |
| १६ | मङ्गळानि तनोतु | ३५ |
| १७ | सकललोकाधार | ३७ |
| १८ | माधव माधव कृष्ण | ३८ |
| १९ | एहि मुदम् देहि | ३९ |
| २० | एहि मुदं मम देहि | ४१ |
| २१ | कृष्णं कलय सखि | ४३ |
| २२ | कलय यशोदे | ४४ |
| २३ | आयाहि माधव माधव | ४६ |
| २४ | दामोदर तावक | ४८ |
| २५ | हरिमीडे श्रीहरिमीडे | ५० |
| २६ | गोविन्द घटय | ५१ |
| २७ | आलोकये श्रीबालकृष्णम् | ५५ |
| २८ | कलयत गोपिका | ५६ |
| २९ | पश्यत पश्यत | ५८ |
| ३० | परमकरुणया | ५९ |
| ३१ | जय जय गोकुलबाल | ६१ |

| | | |
|---|---|---|
| ३२ | देव देव प्रसीद | ६२ |
| ३३ | बालगोपाल कृष्ण | ६५ |
| ३४ | बालगोपाल मामुद्धर | ६६ |
| ३५ | पाहि पाहि जगन् मोहनकृष्ण | ७३ |
| ३६ | कलयत वनभुवि | ७४ |
| ३७ | बन्धनान्मोचय | ७६ |
| ३८ | देव कुरु शिक्षाम् | ७८ |
| ३९ | राम सखे कृष्ण सखे | ७९ |
| ४० | राम राम विचरामो | ८१ |
| ४१ | तावकं परभावम् | ८३ |
| ४२ | श्रीगोपालकमेकमेव | ८५ |
| ४३ | आयहि व्रजयुवतीबृन्द | ८७ |
| ४४ | श्रीकृष्न तावकमहिमा | ८९ |
| ४५ | आवरणं मम नहि ते दातुम् | ९० |
| ४६ | इन्द्रयागसमारंभ | ९२ |
| ४७ | गोवर्धनगिरिधर | ९४ |
| ४८ | मामकापराधशतम् | ९५ |
| ४९ | नन्दनन्दन गोविन्द | ९७ |
| ५० | परमपुरुषमनुयाम | ९९ |
| ५१ | शङ्के शङ्करं शारदसमयम् | १०१ |
| ५२ | बृन्दावनमधुना मन्ये | १०२ |
| ५३ | वल्लवाङ्गना मा कलयत | १०४ |
| ५४ | शरणं भव कृष्ण | १०५ |
| ५५ | पूरय मम कामम् | १०६ |
| ५६ | करुणयावलोकय माम् | १०७ |
| ५७ | भूयो भूयो याचे | १०८ |
| ५८ | वद किं करवाणि | १०९ |
| ५९ | वनभुवि गोविन्दमिह | १११ |
| ६० | अद्वयमखण्डितम् | ११४ |
| ६१ | परमिह पश्यत पुरुषम् | ११८ |
| ६२ | कलये देवमिह | १२० |
| ६३ | माधव मामव देव | १२१ |
| ६४ | गोविन्दमिह | १२३ |
| ६५ | ध्रुवमण्डलपण्डितम् | १२५ |

६६ जगदीशं पश्यन्त . . . १२६
६७ नित्यानन्दमिह . . . १२६
६८ सुरलोकवनिताः . . . १२७
६९ गोपालमालोकये . . . १२८
७० कलयत सुरवनिता . . . १२९
७१ कलयत वनभुवि . . . १३०
७२ भावये सखि भावये . . . १३२
७३ श्रीनिलयं सखि श्रीनिलयम् . . . १३४
७४ मृगयत राधामाधवम् . . . १३६
७५ माधवं दर्शय हे . . . १३८
७६ नन्द नन्दन गोपाल . . . १४०
७७ नन्दमुकुन्दे परमानन्दे . . . १४१
७८ देवदेवं क्वेति तम् . . . १४३
७९ सहचरि समरसमिह . . . १४४
८० कळभगतिशोभ . . . १४६
८१ कथय कथय माधवम् . . . १४८
८२ हरिमेकरसाकृतिम् . . . १५०
८३ नाथनाथमाकलय . . . १५२
८४ द्रक्ष्यामि गोकुलनिलयम् . . . १५६
८५ धन्यधन्योऽहं जगतीतले . . . १५७
८६ भावये हृदयारविन्दे . . . १५८
८७ नन्दगोपाल् कृष्णा . . . १६०
८८ हे राम हे कृष्ण . . . १६२
८९ अक्रूरो नयति . . . १६३
९० स्वामिनं वनमालिनम् . . . १६४
९१ विजयगोपाल ते मङ्गळम् . . . १६६
९२ जाने भुवनसृष्टिचातुरी . . . १६७
९३ राम मथुरानगरि रम्या . . . १६८
९४ नन्दनन्दनं निजभक्तचन्दनम् . . . १७१
९५ काममोहिनि कथय . . . १७३
९६ एहि एहि विजयगोपाल . . . १७४
९७ माधव मे रतिं देहि . . . १७५
९८ अवलोकयत श्रीगोविन्दम् . . . १७७
९९ पाहि मां पाहि माम् . . . १७८

१०० मधुप मधुप दूतम् . . . . . . . . . . १८१
१०१ गोपालं विद्धि गोपालम् . . . . . . . . . . १८२
१०२ किमु राजते राजसदसि . . . . . . . . . . १८३
१०३ इति वदति हि गोपी . . . . . . . . . . १८५
१०४ कंसासुरसंहरणम् . . . . . . . . . . १८६
१०५ वेदाद्रिसिंह त्वां . . . . . . . . . . १८८
१०६ वयं धन्या वयं धन्या . . . . . . . . . . १८९
१०७ वीक्षेऽहं कदा . . . . . . . . . . १९४
१०८ रे रे मानस गोपालम् . . . . . . . . . . १९५
१०९ गोपालमेव दैवतम् . . . . . . . . . . १९७
११० काङ्क्षे तव प्रसादम् . . . . . . . . . . १९९
१११ क्षेमं कुरु गोपाल . . . . . . . . . . २००
११२ वनमाली किल नूनम् . . . . . . . . . . २०२
११३ कोमळाधरे रुक्मिणि . . . . . . . . . . २०४
११४ श्रीवासुदेवप्रभो . . . . . . . . . . २०९
११५ अवलोकय भैष्मीवदनम् . . . . . . . . . . २१०
११६ कल्याणगोपालम् . . . . . . . . . . २११
११७ जय जय बालगोपाल हरे . . . . . . . . . . २१२
११८ ब्रह्मग्रन्थिं कुरु . . . . . . . . . . २१३
११९ आलोकये रुक्मिणी . . . . . . . . . . २१५
१२० मदन गोपल ते मङ्गळम् . . . . . . . . . . २१७
१२१ जय मङ्गळं नित्य शुभमङ्गळम् . . . . . . . . . . २१८
शिव शिव भव भव . . . . . . . . . . २२०
जय जय वैष्णवि दुर्गे . . . . . . . . . . २२०

# ॥ श्रीनारायणतीर्थध्यानश्लोकाः ॥

यदङ्घ्रिपङ्केरुहरेणुलग्नं
निपीय नीरं विमलान्तरङ्गः ।
जानामि तत्वं निजमात्मरूपं
तं नौमि नारायणतीर्थमार्यम् ॥१ ॥

यन्नाम्नः पठनं मनागपि यतेरोङ्कारलक्षाधिकं
यन्मूर्तेरपि पूजनं हरिहरब्रह्मादिपूजा स्मृतम् ।
यत्कार्यं त्रिविधं समस्तजगतां शास्त्रार्थनिर्णायकं
श्रीनारायणतीर्थसद्गुरुवरं तं नौमि मुक्तिश्रियै ॥२॥

वेदान्तार्थविचारगम्यधिषणाविध्वस्तभेदाशयं
नानातन्त्रपदार्थसंशयघनध्वान्तार्कतुल्यं गुणैः ।
नानादेशदिगन्तसन्ततयशः प्राप्तावकाशं गुरुं
श्रीनारायणतीर्थसद्गुरुवरं तं नौमि मुक्तिश्रियै ॥३॥

बोधागाधसुनिर्मलातिमधुरे यन्मानसाब्धौ हरिः
क्रीडत्युज्झितदुग्धसिन्धुरनिशं शान्त्यादिदूतीजनैः ।
भक्तिज्ञप्तिविरक्तिसंज्ञमतुलं कन्यात्रयं प्राप यः
श्रीनारायणतीर्थसद्गुरुवरं तं नौमि मुक्तिश्रियै ॥४॥

✠ ✠ ✠ ✠ ✠ ✠ ✠

# ॥ प्रथमस्तरङ्गः ॥

श्लोकम्

हिमगिरितनयापत्यं हेमाचलचापसमुदितं तेजः ।
किमपि महत्तममाद्यं स्मर्तव्यं विघ्नतिमिरहरणाय ॥ १ ॥

गिरिराजसुतासूनुः करिराजवराननः ।
परिपन्थिगणध्वंसी सुरसेव्यो विराजते ॥ २ ॥

१ जय जय स्वामिन्

## जय जय स्वामिन् जय जय

रागम्ः मोहनम् (नाट) ताळम्ः चापु (आदि)

*पल्लवि*

जय जय स्वामिन् जय जय (जय)

*अनुपल्लवि*

जय जय जितवैरिवर्ग प्रचण्ड (जय)
जय जय गजमुख जय वक्रतुण्ड

*चरणम्*

मूषकवाहन मुनिजनवन्द्य
दोषरहित दूरितासुरबृन्द
शेषभूषण शिववारिधिचन्द्र
पोषितपरिजन पुण्यैककन्द (जय जय) ॥ १ ॥

अद्रिसुतासुत अनवद्यचरित
भद्रभक्तभव- भयहरमुदित

रुद्रोदित ऋजु- मस्तकसहित
सद्रूप सरसिज- समुदित विनुत (जय जय) ॥ २॥

लम्बोदर धीर लावण्यसार
कम्बुसुधानिधि- कर्पूरगौर
साम्बसदाशिव- सत्कृतिचतुर
सामवेदगीत सकलाधार (जय जय ) ॥ ३॥

चक्रादिसुरगण- सन्नुतचरण
शातकुम्भमणि- दिव्याभरण
धिक्कृतघनविघ्न- तिमिरावरण
धीर नारायण- तीर्थ सुकरुण (जय जय) ॥ ४॥

✠ ✠ ✠ ✠ ✠

श्लोकम्
अमृतकलशहस्तं श्रीपतेर्यानकेतुं
सुररिपुतिमिरारिं[१] सोमसूर्यादिगीतम् ।
अमितबलमशेषप्राणिनां प्राणभूतं
निगममयशुभाङ्गं भावयाम्याप्तकामम् ॥ ३॥

वैनतेयं विराजन्तं विष्णुवाहनमुत्तमम् ।
वैकुण्ठाश्रयमाम्नायकायं गायामि कामदम् ॥ ४॥

## २ श्रीनारायणवाहन

# श्रीनारायणवाहन

रागम्: मुखारि   ताळम्: अट

[१]सुररिपुनिवहारिं

*पल्लवि*

श्रीनारायणवाहन श्रितमुनिजनमण्डलपालन[२] (श्री)

*अनुपल्लवि*

विनतावरतनय वेदाङ्गशुभकाय
विविधविश्वालय वीर मां पालय (श्री)

*चरणम्*

सकलजगत्प्राणदायक सुरसन्नुत सर्वविनायक
विकट सुररिपुविदारक विश्वविपुलकल्याणविधायक

अकळङ्क शितिकण्ठ आश्रितवैकुण्ठ
विकचकमलतुण्ड विगतमोहकाण्ड
शकलितपाषण्ड शत्रुहरप्रचण्ड
अधिकबलोद्दण्ड अद्भुतदोर्दण्ड (श्री) ॥ १॥

अशुभतिमिरचण्डभास्कर सामविशदघोषपक्षभासुर
मशकीकृतसकलासुर मञ्जुमणिरशनाशेषशुभकर

असुरभयङ्कर अमृतकलशहर
कुसुमनिचयभार क्रूरभुजगहार
असदृशाचलाकार आश्रितशुभकर
लसदरुणाधर लीलामयशरीर (श्री) ॥ २॥

निरवधिकामलपराक्रम नित्यनिर्मल खलदुरतिविक्रम[३]
मुररिपुचरणाब्जसंभ्रम मुनि- नारायणतीर्थ- मतिरम

अरविन्दलोचन अघबन्धमोचन
सुररिपुशासन सोमरविनयन
परिजनपालन पामरविदळन

---

[२]पावन
[३]दुरतिक्रम

कृतगुरुसेवन गोकुलभवन (श्री) ॥ ३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्[४]

प्रह्लादनारदपराशरपुण्डरीक-
व्यासाम्बरीषशुकशौनकभीष्मदाल्भ्यान् ।
रुग्माङ्गदार्जुनवसिष्ठविभीषणादीन्
पुण्यानिमान् परमभागवतान् स्मरामि ॥ ५॥

नीलाचलवरनिलयं निखिलजगन्नाथमेकमाकलये ।
नीरदिवटतरुनिकटं निजसेवकबृन्दहितविधातारम् ॥ ६॥



# सुभद्रा बलभद्र[५]

रागम्: सौराष्ट्रम् ताळम्: त्रिपुट

*पल्लवि*

सुभद्रा- बलभद्र सुदर्शनसहित
इभराजतारक ईश मामव देव

*चरणम्*

लवणजलधितीर ललितनीलाचल
नवमणिपरिशोभि- नव्य- दिव्यपवन ॥ १॥

वटविटपिनिकट वरसिंहासन
निटिलाक्षविधिकृत नित्यमङ्गळाचरण ॥ २॥

---

[४] these two *ślōkam*s are not printed in some versions.
[५] this *gītam* is not available in some versions.

मार्कण्डेयजलधि- मध्य गणेशहित
दुर्गतिहर अष्ट- दुर्गापरिवेष्टित ॥ ३ ॥

पतितजनपावन परमदिव्यमङ्गळ
अतिकरुणाकर अद्भुतमहाप्रसाद ॥ ४ ॥

जगन्मोहनमण्डप जयशब्दबहुळ
जगदेकनायक जितसुरारिमण्डल ॥ ५ ॥

विनतातनयसेव्य विनतमङ्गळकर
विदळितभवबन्ध वेदवनसञ्चार ॥ ६ ॥

नारदादिमुनिगेय नामदेयसुखद
नारायणानन्द तीर्थभावितानन्त ॥ ७ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्
सर्वज्ञानक्रियाशक्तिं सर्वयोगीश्वरं प्रभुम् ।
सर्ववेदमयं[६] विष्णुं प्रभविष्णुमुपास्महे ॥ ७ ॥

४ जय जय रमानाथ

## जय जय रमानाथ

रागम्: नाट ताळम्: झंप

*पल्लवि*

जय जय रमानाथ जय जय धरानाथ (जय जय)

*अनुपल्लवि*

जय जय धरानाथ

[६]सर्ववेद्यविदं

जय जय वराहपुरि- श्रीवेङ्कटेश (जय जय)

*चरणम्*

निगमगोचर नित्य निर्मलानन्दघन
विगळितमहामोह विमलविज्ञान- (हरे)
खगयानसञ्चार खण्डितासुरनिकर
सकलगुणसंपन्न सत्यपरिपूर्ण (जय जय) ॥१॥

मधुसूदनानन्त मायया कृतभुवन
विधुदिवाकरनयन वेदान्तभवन- (हरे)
विधिमुखसुरेन्द्रनुत विपुलकल्याणयुत
विमलयोगिध्येय विविधमुनिगेय (जय जय) ॥२॥

मुरनरकसंहार मूढमतिजनदूर
परिजनशिवङ्कर परावरशरीर- (हरे)
निरवधिककारुण्य निखिललोकशरण्य
सरस नारायणतीर्थ- सद्गुरुवरेण्य (जय जय) ॥३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

कृष्ण कृष्ण कृपासिन्धो भक्तसिन्धुसुधाकर ।
मामुद्धर जगन्नाथ मायामोहमहार्णवात् ॥८॥

५ मत्स्य कूर्म वराह

# मत्स्य कूर्म वराह

रागम्: सौराष्ट्रम् (माळवि)  ताळम्: त्रिपुट

मत्स्यकूर्मवराहनरमृग वामनामरभार्गव
कुत्सितारिविराम दशरथराम बलरामाभव (कृष्ण कृष्ण) ॥१॥

कृष्ण कृष्ण कृपासमुद्र वितृष्ण बुद्ध गुणाकर
कृष्ण कल्किशरीर खलजन- कृन्तनामरसुखकर (कृष्ण कृष्ण) ॥ २॥

नित्यशुद्धसुखानुभूति[७] निरञ्जनाखिलरञ्जन
प्रत्यगेकरसैकविग्रह परमपावन पावन (कृष्ण कृष्ण) ॥ ३॥

गोपगोपीगोधनावन गूढ परतत्वाच्युत
तापहर नारायण तीर्थ संतारक विजयगोपालक (कृष्ण कृष्ण) ॥ ४॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

वासुदेवे भगवति भक्तिप्रवणया धिया ।
व्यज्यते भक्तिसाराढ्या कृष्णलीला तरङ्गिणी ॥ ९॥

आदौ कृष्णावतारस्तदनु नरहरेर्बाललीलाविलासो[८]
वत्सानां पालनं तच्चरितमथ गवां पालनं प्रौढभावः ।
गोपीवस्त्रापहारस्तदनु गिरिवरोद्धारणं रासलीला
कंसादीनं निरासस्तदनु जलनिधौ द्वारकायां प्रवेशः ॥ १०॥

रौहिणेयस्य कृष्णस्य विवाहस्तदनन्तरम् ।
रुक्मिण्याद्यष्टमहिषीसहितो गीयतेऽमरैः ॥ ११॥

इत्येवं संग्रहेणोक्ता कृष्णलीलातरङ्गिणी ।
आद्यः कृष्णावतारोऽयं संग्रहेणाभिनीयते ॥ १२॥

उग्रसेनस्ततः कंसो देवकीवसुदेवयोः[९] ।
तयोः कारागृहे वासः कंसेन विहितः किल ॥ १३॥

ब्रह्मा सुरेन्द्रो धरणी सनकाद्यस्ततो हरिः[१०] ।
भगवत्प्रार्थना तेषां तत्तत्स्थाननिवेशनम् ॥ १४॥

नारदस्योपदेशेन षट्सुतानां विदारणम्[११] ।

[७]सिद्धि सुखानुभव
[८]विशेषो
[९]देवकीवसुदेवराट्
[१०]हरः
[११]विनाशनम्

देवक्यास्सप्तमो गर्भस्सङ्कर्षण इतीरितः ॥ १५ ॥

गोकुले कृष्णगमनं दुर्गाया मधुरागमः ।
कथायास्संग्रहस्त्वेवं चरित्रेस्मिन्निगद्यते ॥ १६ ॥

*तत्रादावुग्रसेनागमनम् ॥*

*दरु १*

रागम्: सौराष्ट्रं ताळम्: आदि

अग्रेसरो महात्मनां अग्रगण्योऽपि धीमताम् ।
उग्रशासनकाग्रणीरुग्रसेनो विराजते ॥

*अथ कंसागमनम् ॥*

*दरु २*

रागम्: सौराष्ट्रं ताळम्: आदि

शठो हठादधर्मकृत् महामूढो महाबली ।
कठोरहृदयो नित्यं कंसासुरस्समायाति ॥

*अथ देवक्यागमनम् ॥*

*दरु ३*

रागम्: नाथनामक्रिया ताळम्: आदि

आयाति देवकी दिव्यसुन्दरी विष्णु-
मायेव साक्षादियममरनारी[१२] ।
नराधिपवरगेहिनी श्री-
नारायणीयदिव्यमूर्तिजननी ।
इन्दुवदना अरविन्दलोचना शुभ-
कुन्दरदना कुटिलकुन्तलघना ॥

## *अथ उग्रसेनानुज्ञया वसुदेवागमनम् ॥*
## *दरु ४*

रागम्: श्री (कल्याणि) ताळम्: आदि

असुरारण्यकुठारो वसुमत्यां महानसौ ।
वसुधाधिपतिलको वसुदेवो विराजते ॥

## *गद्यम् १*

अथ देवकीवसुदेवयो विवाहोत्सवानन्तरं वसुदेवगृहप्रवेशसमये तयोः सारथ्यं कुर्वति कंसे देवक्यास्त्वष्टमो गर्भः कंसमृत्युः इत्यशरीरवाक्यं श्रुत्वा कंसो वसुदेवं प्रत्याह ॥

श्लोकम्
वसुदेव हनिष्यामि करिष्याम्यात्मनो हितम् ।
देवकीं भगिनीमेनां मृत्युबीजं ममाप्यहम् ॥१७॥

## *अथ वसुदेवः कंसं प्रत्याह ॥ द्विपदम् ॥*

[१२] अमरी नारी

रागम्: कांभोजि      ताळम्: झंप

हे कंस राजसुत हे नरश्रेष्ठ
हे सत्यसन्ध कुलजलधिभवरत्न
हे सौम्यगुणयुक्त हितजनासक्त
कल्याणवेद्यां च कलितबहुभद्राम्
मुञ्च भगिनीमद्य मुहुरधिकहृद्याम्
सत्यं वदामि तव सत्यसन्धोऽस्मि
दास्यामि तज्जात- वत्साननिन्द्य
मा साहसं कर्तुमर्हसि सदैव
तव भगिन्यैव सह सुखमधिवसामि
भवने तवैव वर- मस्तु शुभमद्य

*गद्यम् २*

अथ वसुदेववाक्यं श्रुत्वा कंसः तौ कारागृहं प्रावेशयत् ॥

*अथ ब्रह्मागमनम् ॥*

*दरु ५*

रागम्: नाथनामक्रिया      ताळम्: आदि

आयाति चतुरास्यो[१३] ब्रह्मा सदसि
गायं गायं ध्यायं ध्यायं विष्णुं चेतसि
दण्डकमण्दलुधारी दानववैरी
अण्डब्रह्माण्दविधाता अखिलजनयिता ।

*अथ देवेन्द्रागमनम् ॥*

[१३] चतुराननो

## दरु ६

रागम्: श्री (पुन्नगवराळि) ताळम्: आदि

बृन्दारकादिविनुतो मन्दं मन्दं महीसुखम् ।
अन्तरङ्गे विचिन्तयन् इन्द्रो महान् विराजते ॥

## *अथ धरण्यागमनम् ॥*

## दरु ७

रागम्: मध्यमावति (श्री) ताळम्: आदि

लावण्यमूर्तिः धरणी समायाति ललितभासुरधारिणी[१४] ।
सर्वलोकहितकारिणी सदा देवी सत्यलोकसञ्चारिणी ॥

श्लोकम्
दृष्ट्वा सुरेन्द्रं ब्रह्माणं ब्रह्मणोऽनुज्ञया सह ।
ब्रह्मणा च सुरेन्द्रेण विष्णुं सा शरणं गता ॥१८॥

## *गद्यम् ३*

अथ भगवान् अपरिमितचिदानन्दसत्यपरिपूर्णः परमात्मा अनाद्यनिर्वचनीया- चिन्त्य- शक्तिर्मायाविलसित लोकानुजिघृक्षया परिगृहीतदिव्यमङ्गळविग्रहमूर्तिः श्रीमन्नारायणः क्षीराब्धौ शेषपर्यङ्कशयनो महानसौ सदाऽस्ते ।तमेनं असुरभार- भराक्रान्ता गोरूपधारिणी धरणी सुरपति-मुख सुर-परिवेष्टिता सति अनन्यशरणा शरणमाजगाम ॥

## *गद्यम् ४*

[१४] ललितमसुरहारिणी

अथ सनकादीनां ऋषीणां भगवन्नाममाहात्म्यं आख्यापयतां आगमनं गीयते । अथ सनकादयः ऊचुः ॥

६ रामकृष्ण गोविन्देति

# रामकृष्ण गोविन्देति

रागम्: भैरवि ताळम्: आदि

*पल्लवि*

रामकृष्ण- गोविन्देति नामसंप्रयोगे
काममिह स्नातव्यं सर्वोत्तमप्रयागे

*चरणम्*

दिग्देशकालानपेक्ष- सिद्धसर्वसुलभे
सद्गुरुकृपासमुद्र- सङ्गहेतुलाभे॥ १॥

रामनामगङ्गया मिलितकृष्णनाम-
यामुने गोविन्दनाम- सरस्वतीप्रथिते ॥ २।

योगिमानसपरम- हंसकुलकलिते
वागीशविष्णुरुद्रादि- वाग्लहरीललिते ॥ ३॥

सर्वलोकालोककाम- साङ्गफलदाने
निर्विशेष नित्यानन्द[१५] - लाभसुनिदाने ॥ ४॥

ऋग्यजुस्सामादिवेद- शाखिमूलविलसिते
रागलोभादिसंताप- शान्तिकरचरिते ॥ ५॥

स्नानसन्ध्याजपहोम- तर्पणानपेक्षिते
हानिवृध्यादिरहिता- खण्डसुखफलदे ॥ ६॥

[१५] नित्यसुख

स्नानं मानसिकं तस्य स्मरणं वाचनिकम्
कीर्तनं कायिकं तस्य कीर्तने सुनर्तनम् ॥ ७ ॥

यागयोगरागभोग- त्यागसंबन्धं विना
भक्तिविरक्ति विज्ञान- द्वारा मुक्तिफलदे ॥ ८ ॥

ब्रह्मविद्यालक्षण- निरीक्षणविचक्षणे
बाधितघोरसंसार- वारण तत्कारणे ॥ ९ ॥

सर्वपापौघतिमिर- चण्डसूर्यमण्डले
साधु नारायणतीर्थ -तीर्थराजविमले ॥ १० ॥

✠ ✠ ✠ ✠ ✠

## *गद्यम् ५*

एवं सनकादिभिः प्रशस्यमानदिव्यनामधेयो भगवान् शेषशायी आविरासीत् । तदेतदभिनीयते ॥

## *दरु ८*

रागम्ः शङ्कराभरणम्  ताळम्ः चापु

अशेषलोककारणं अनादिमध्यमव्ययं
स शेषशयनो विभुः विशेषतो विराजते ।
महाफणीन्द्रशयनो महामुनीन्द्रसेवितो
महालक्ष्मीमहीयुतो महाविष्णुः विराजते ॥

## *गद्यम् ६*

एवं भगवति प्रसन्ने प्रणिपातपूर्वकं महाविष्णुं प्रति धरण्युवाच ॥

श्लोकम्

शरणमुपगताहं त्वां शरण्यं जनानं
निखिलभयवियोगं योगिचिन्त्यं महान्तम् ।
सुररिपुगणभारं दुस्सहं दुर्भरं मे
परिहर परमात्मन् भक्तिसिद्धैकमूर्ते ॥ १९ ॥

७ शरणं भव करुणामयि

# शरणं भव करुणमयि

रागम्: सौराष्ट्रम् (हंसविनोदिनि) ताळम्: आदि

शरणं भव करुणामयि कुरु दीनदयालो
करुणारसवरुणालय करिराजकृपालो
अधुना खलु विधिना मयि सुधियाऽसुरभरितं
मधुसूदन मधुसूदन हर मामक दुरितम् (शरऽ) ॥ १ ॥

वरनूपुरधर सुन्दर करशोभितवलय
सुरभूसुरभयवारक धरणीधर कृपया
त्वरया हर भरमीश्वर सुरवर्य मदीयं
मधुसूदन मधुसूदन हर मामक दुरितम् (शरणं) ॥ २ ॥

घृणिमण्डलमणिकुण्डल फणिमण्डलशयन
अणिमादिसुगुणभूषण मणिमण्डपसदन ।
विनतासुतघनवाहन मुनिमानसभवन
मधुसूदन मधुसूदन हर मामक दुरितम् (शरणं) ॥ ३ ॥

अरिभीकर हलिसोदर परिपूर्णसुखाब्धे
नरकान्तक नरपालक परिपालितजलधे ।
हरिसेवकशिव नारायण तीर्थ परात्मन्
मधुसूदन मधुसूदन हर मामक दुरितम् (शरणं) ॥ ४ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

इति विविधवचोभिः प्रार्थयन्त्यां धरण्यां
अखिलभुवनमित्रं शत्रुहन्तारमीशम् ।
विधिमुखसुरवर्यास्तुष्टुवुर्विष्णुमाद्यं
निखिलनिगमवेद्यं स्वार्थसंसिद्धिहेतुम् ॥ २० ॥

क्षीरब्धिमध्यभुजगेन्द्रमहासनया
देवाय नाभिकमलोदितपद्मजाय ।
योगीन्द्रभाव्य गगनामल नित्यबोध
भूमाभिधाय पुरुषाय नमः परस्मै ॥ २१ ॥

## ८ नारयणाय नमो

# नारायणाय नमो माधवाय

रागम्: आनन्दभैरवि ताळम्: त्रिपुट

### *पल्लवि*

नारायणाय नमो माधवाय (नारायणाय)

### *अनुपल्लवि*

नागेन्द्रशयनाय नन्दिताखिललोकाय (नारायणाय)

### *चरणम्*

नाभिकमलजनित विधिमुखाय नूतनजलधराभाय
नानाचराचरनारीनररूपाय
नारदादिमुनिवर्यवन्दित[१६]घनमयाय (नारायणाय) ॥ १ ॥

[१६]मुनिवन्द्यानन्द

अगणितगुणगणाय आगमगेयाय विगळितभयशोकाय
गगननिर्मलबोधगंभीरभावाय
भगवद्भक्तहृदयपद्मभानुरूपाय (नारायणाय) ॥ २ ॥

करधृतचरणकम्बुपङ्कजकौमोदकीशार्ङ्गाय
निरवत्यगलशोभिनिजकौस्तुभभूषाय
परिहृतपरपक्षपक्षिराजवाहाय (नारायणाय) ॥ ३ ॥

जगदेकनाथाय जातमदनाय जितवैरिमण्डलाय
निगमनिश्वासाय नित्यानन्दरूपाय
निरुपमगोकुलनीतनवनीताय (नारायणाय) ॥ ४ ॥

आमयादिविरहिताखिलमयाय कामकोटिसुन्दराय
[१७]नामरूपरहिताय भूमस्वरूपाय
सोमसूर्यनयनाय सामगानगेयाय (नारायणाय) ॥ ५ ॥

वारिजलोचनाय वासुदेवाय वरमुनिपारिजाताय
करुणाकरभक्तकारुण्यसाराय
नारायणतीर्थचरणाब्जाय (नारायणाय) ॥ ६ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

इति स्तुत्वा जगन्नाथं कृताञ्जलिपुटास्सुराः ।
मुहुर्मुहुर्नमन्तस्तमूचुश्चात्महितं वचः ॥ २२ ॥
भगवानपि तानाह भक्तिनम्रानसौ सुरान्
अवतीर्य यदोर्वंशे करिष्यामि हितं तु वः ॥ २३ ॥

## *गद्यम् ७*

[१७]नामरूपरहितभूमैकस्वरूपाय

इत्येवं भगवतो वासुदेवस्य वदनसुधानिधिगळितां स्फुटतरपदरसमनोहरां वचनसुधाधारां सुरभूसुरबलाधारां श्रवणाञ्जलिपुटैः पायं पायं शनैः शनैः स्वस्वभवनाभिमुखाः तच्चरणस्मरणचन्द्रिकापनोदित-शोकमोहानलान्धकाराः चतुराननादयः सर्वे गीर्वाणाः करतलकलित-कपित्थोपमं स्वकार्यं मन्वानाः संपूर्णमनोरथाः स्वस्वभवनमाविविशुः ॥

श्लोकम्

ददौ कंसाय देवक्याः शिशुं प्रथमजं नृपः ।
अष्टमं स रिपुं मत्वा ददौ कंसः पुनः शिशुम् ॥ २४ ।

तद्वृत्तं नारदो ज्ञात्वा त्वरया कंसमन्दिरम्
समागतो निमित्तज्ञः शिशूनां निदनं[१८] प्रति ॥ २५ ॥

दरु ९

रागम्ः पन्तुवराळि (सौराष्ट्रम्)   ताळम्ः रूपकम् (आदि)

नारायण नारायण नारायणेति सततम् ।
वारं वारं गायन् भक्त्या[१९] नारदोऽयं विराजते ॥

*अथ कंसं प्रति नारद वचनम् ॥*

श्लोकम्

अष्टानामष्टमत्वे तु न विशेषोऽस्ति कश्चन ।
उपेक्षसे कथं मूढ यत्कर्तव्यं कुरुष्व तत् ॥ २६ ॥

एवमुक्तो नारदेन षट्सुतानवधीत्खलः ।
सङ्कर्षणस्तु रोहिण्यामानीतो योगमायया ॥ २७ ॥

---

[१८] मरणं
[१९] गायं गायं ध्यायन्

*अथ भगवदाविर्भावः ॥*

*दरु १०*

रागम्: मध्यमावति (नाथनामक्रिय)     ताळम्: आदि

शङ्खी चक्री गदी पद्मी शार्ङ्गी किरीटकुण्डली ।
श्रीवत्सकौत्सुभी दिव्यपीताम्बरो विराजते ॥

श्लोकम्
हरिरथ निजशक्त्या मूर्तिमास्ताय देवः
प्रकटितनिजरूपः प्रादुरासीन्मुकुन्दः ।
यदुकुलवरगेहे देवकीगर्भवासा-
दुदितममरबृन्दं देवमस्तौदनन्तम् ॥ २८ ॥

कल्याणं वितनोतु कौत्सुभमणिं कण्ठे ददानः शिशुः
कल्याणीमपि मे करोतु शुभदां वाणीं प्रवीणां दियम् ।
देवक्या वसुदेवयादवपतेः शङ्खी रथाङ्गी गदी
पद्मी नन्दकशार्ङ्गचापमकुटी पीतंबरः कुण्डली ॥ २९ ॥

९ जय जय श्रीनिवास

# जय जय श्रीनिवास

रागम्: कल्याणि     ताळम्: त्रिपुट

*पल्लवि*

जय जय श्रीनिवास जय जीमूताभ (जय जय)

*अनुपल्लवि*

भयकारणविनाश भक्तमानसनिवास (जय जय)

*चरणम्*

कमलदलनयन कनकमयवसन
रमणीयचन्द्रानन रञ्जितभुवन
कमलावल्लभ दीन-कामितफलनिदान
कामकोटिसम मोहन
मञ्जुळकञ्जवदन महामोहमथन
मङ्गळफलदान मुनीन्द्रबृन्दाधीन (जय जय) ॥१॥

सुन्दरचरणारविन्द-मणिनूपुर
मञ्जुळमुक्ताहार मन्दरधर
कुन्दरदन सुर-वन्दित मनोहर
चन्द्रिकासमस्मेर बाल-
नीरदघननील पारावारविहार
परिपालितभूरादि-लोकनिकर (जय जय) ॥२॥

विपुलपुण्डरीकाक्ष विश्वसंत्राणदक्ष
अपहृतासुरपक्ष आर्तसंरक्ष
तापसजनरक्ष तारणाध्वरदीक्ष
आपदुद्धारवीक्षामोक्षा
अशेषदुष्टशिक्ष नानानिगमलक्ष्य
नारायणतीर्थपक्ष श्रीगोकुलसंरक्ष (जय जय) ॥३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

देवक्याः शिशुभावमेत्य भगवान् नारायणः श्रीपतिः
सर्वज्ञानमहाविभूतिसहितः सत्प्रार्थनैः कर्मभिः ।
आदित्येन्दुसहस्रकोटिसदृशा भासा गृहं भासयन्
पित्रोः स्नेहसुधामहोदधिशशाङ्कोऽयं हरिर्गीयते ॥३०॥

# मङ्गळालय मामव देव

रागम्: केदारगौळ  ताळम्: चापु (आदि)

## *पल्लवि*

मङ्गळालय मामव देव

## *अनुपल्लवि*

पङ्कजासनभावितभाव (मङ्गळालय)

## *चरणम्*

देवकीवसुदेववरतनुज्
दिव्यकिरीट दळितभवबीज
सर्वयोगिविचिन्त्यपदाब्ज
सङ्गताशेषसाधुसमाज (मङ्गळालय) ॥१॥

अपरिमितानन्दबोधस्वरूप
अतिकरुणाविधृताद्भुतरूप
कपटराक्षसहर खण्डितपाप
कनकाम्बरधर कपटदुराप (मङ्गळालय) ॥२॥

मकरकुण्डलकेयूरादिविभूष
मनसिजशतकोटिमञ्जुळवेष
विकचकमलदळसदृशायताक्ष
विमलगोकुलगोपाखिलरक्ष (मङ्गळालय) ॥३॥

कलित श्रीकौस्तुभकमनीयकण्ठ
करुणारसभर मिलितवैकुण्ठ
परिपालय भूरिभाग्यविदरण[२०]

---

[२०] भुवि भाग्यवितरण

गुरुभक्तशिव नारायणतीर्थ चरण (मङ्गळालय) ॥ ४॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

अलौकिकमिदं रूपमालोक्यानकदुन्दुभिः ।
हरेः सभार्यः प्रोवाच कंसाद्भीतस्त्वधीरधीः ॥ ३१॥

सर्वाधार रमापतेऽथ भवता तच्चिन्तनीयं[21] विभो
यत्कर्तव्यमशेषलोक[22]विभुना ब्रह्मण्यरक्षाविधौ ।
एवं रूपममानुषं मुनिवरध्येयं समाच्छादय
स्वामिन् मानुषबालभावमधुना सन्दर्शयास्मान् प्रति ॥ ३२॥

११ रक्ष रक्षासुरशिक्ष

# रक्ष रक्षासुरशिक्ष

रागम्: मुखारि  ताळम्: चापु

*पल्लवि*

रक्ष रक्षासुरशिक्ष राजीवदळायताक्ष
अक्षीणकृपाकटाक्ष आश्रितपक्षसंरक्ष (रक्ष रक्ष)

*चरणम्*

सर्वमनोरथाध्यक्ष सर्वलोकावनदक्ष
सर्ववेदान्तैकलक्ष्य सर्वयोगीन्द्रसंरक्ष (रक्ष रक्ष) ॥ १॥

अप्रमेयबलवीर्य अनुपममहौदार्य
अपरिमितगांभीर्य अव्ययाखण्डितैश्वर्य (रक्ष रक्ष) ॥ २॥

अच्युतानन्दगोविन्द अत्यन्तनिर्मलानन्द
विच्युतसंसारकन्द विश्वमङ्गळ मुकुन्द (रक्ष रक्ष) ॥ ३॥

[21] भगवन्स्त्वच्चिन्तनीयं
[22] शेष

पतितजनपावन पङ्कजसुन्दरानन
पदगपतिवाहन पण्डितपरिपालन (रक्ष रक्ष) ॥ ४॥

तावकरूपमुदारं धारय शान्तसंसारम्
दर्शय मानुषाकारं देव बालकशरीरम् (रक्ष रक्ष) ॥ ५॥

चिन्तयाथ यद्विधेयं चेतसा चिरमनुभाव्य
अन्तरायो मा भूतद्य आगमबृन्दसंवेद्य (रक्ष रक्ष) ॥ ६॥

अद्य मे जन्मसाफल्यं अद्य मे वंशनैर्मल्यम्
सद्य एव समजनि संभूते त्वयि भूमनि (रक्ष रक्ष) ॥ ७॥

कलिकल्मषनाशनं कामितफलनिदानम्
नारायणीयचरितं नारायणतीर्थगीतम् (रक्ष रक्ष) ॥ ८॥

✠ ✠ ✠ ✠ ✠

श्लोकम्
इति निगदति तस्मिन् यादवेन्द्रे सभार्ये
भवभयतिमिरारिः देवकीभागधेयम् ।
सकलनिगमगुह्यं दर्शयन् स्वीयभावं
परमकरुणया तौ सान्त्वयन्नेवमाह[२३] ॥ ३३॥

१२ अवधारय मामीश्वरम्

# अवधारय मामीश्वरम्

रागम्: पूर्विकल्याणि (सावेरि) ताळम्: चापु (आदि)

*पल्लवि*

[२३]एतदाह

अवधारय मामीश्वरं देवादिदेवम् (अवधारय)

*अनुपल्लवि*

तव तात तपसा सन्तोषितोऽहं
तावकतनयात्मनाऽवनिं समवतीर्णोऽखिलसारम् (अवधारय)

*चरणम्*

आगमान्तैकमानकमनन्यभावं अगणितलोकनायकम्
विगळितमोहमेकं विमलयोगितारकं
गगनाकारमनेकं गतागतनिवारकम् (अवधारय) ॥ १॥

मधुरापुरं समानय मामक योगमायामिह निधापय
अथ गोकुले नय मां अनवद्यनन्दालयम्
विधिना कृउतविनयं विविधयोगिसुगेयम् (अवधारय) ॥ २॥

सङ्कर्षणाख्यमव्ययं साधुविधेयं संभूतमाश्रिताभयम्
शृङ्गारादिनिलयं श्रीरामनामधेयम्
सङ्गतं मत्सहायं सर्वलोकाभ्युदयम् (अवधारय) ॥ ३॥

सुरवैरिभूरिसङ्कुलं धरणीतलमिदमसुरहरणोद्यमम्
परिपालय मामिति परमात्म[२४]गीतमिह
वर नारायणतीर्थ विरचितमेतदिदिति (अवधारय) ॥ ४॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

सुप्तेषु कंसदूतेषु द्वारेषूत्घाटितेषु च ।
मदाज्ञया यमुनयादत्त मार्गेण मां नय ॥ ३४॥

इति कथितवतीश्वरे तथैव
प्रणयवशादकरोद्यदुप्रवीरः ।
सुखमधिवसति स्म गोकुलाख्यं

[२४]परमार्थ

हरिरखिलान्तरचित्प्रभोऽपि मायी ॥ ३५ ॥

*अथ मधुरायं यद्वृत्तान्तं तदुपवर्णयते ॥*

*गद्यम् ८*

स खलु नरपतेरुग्रसेनस्य अग्रिमसूनुः समधिगतासुरप्रकृतिकः कंसासुर-नामा विख्यातो दुर्विनय-दुर्वीर्य-गर्व-मदान्तकार-परिभूत-विवेक-दर्शनः परिवृत-कालनेमि-कळेबरोऽप्य-परिवृत-तद्वासनाजाल-परिवेष्टितः निजपरिजनैः सत्वरा-वबोधितः सन् अतिमन्दगति-रप्यमन्तगतिः देवक्यास्त्वष्टमो गर्भः कंसमृत्युः इत्यशरीरिवाक्यं श्रुतमनुसंदधानो वेपमानो वसुदेव- मन्दिरम् इन्दिरा-सुन्दरं आजगाम ॥

श्लोकम्

भागिनेयीमसौ दृष्ट्वा दुष्टात्मा तत्र मन्दिरे ।
गृहीत्वा पादमेतस्याः क्षेप्तुं भूमौ मनो दधे ॥ ३६ ॥

पदा संताड्य कंसं सा योगमाया सुदुर्नयम् ।
अन्तरीक्षं गता विष्णोः दुर्गाऽभूत् संस्तुतामरैः ॥ ३७ ॥

दुर्गे दुर्गतिहारिणि त्रिजगतां सर्गादिसिद्धार्तके
स्वर्गादीष्टफलप्रदाननिपुणे त्रायस्व नः शङ्करि ।
सा त्वं सर्वजनान्तरान्तरचिदंशानन्यसिद्धात्मिका
सारासारविवेकदृष्टिविदिता सर्वैकसाक्ष्यात्मिका ॥ ३८ ॥[२५]

१३ जय जय दुर्गे

# जय जय दुर्गे

रागम्ः आहिरि (कांभोजि)     ताळम्ः चापु (अट)

[२५] in some versions, this *ślōkam* appears after the next *gītam*.

*पल्लवि*

जय जय दुर्गे जितवैरिवर्गे (जय)

*अनुपल्लवि*

वियदनिलादि-विचित्रसर्गे (जय)

*चरणम्*

सुन्दरतरचरणारविन्दे
सुखपरिभावितलोकबृन्दे
नन्दसुनन्दनादियोगिवन्द्ये
नारायणसोदरि परमानन्दे (जय जय दुर्गे) ॥ १ ॥

सरसमणिनूपुरसङ्गतपादे
समधिगताखिलसाङ्गवेदे
नरसुरकिन्नरबहुगीते
नन्दसुते निखिलानन्दभरिते[२६] (जय जय दुर्गे) ॥ २ ॥

कनकपटावृतघनतरजघने
कल्याणदायिनिकमनीय वदने
इनकोटिसंकाशदिव्याभरणे
इष्टजनाभीष्टवरदाननिपुणे (जय जय दुर्गे) ॥ ३ ॥

अनुदयालयसच्चिदानन्दलतिके
आलोलमणिमयताटङ्कघनिके
नरनारीरूपादिकार्यसाधनिके
नारायणतीर्थभावितफलके (जय जय दुर्गे) ॥ ४ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

[२६]चरिते

इत्यादि गीर्भिर्गीर्वाणगणैर्गीता प्रसाद्य तान् ।
सा वैष्णवीति विख्याता त्रिषु लोकेषु पूज्यते ॥ ३९॥

दुरन्तचिन्ताग्राहेण ग्रस्तोऽयं कंसकुञ्जरः ।
अलब्धशरणोऽस्वस्थः नीडं स्वीयमुपागतः ॥ ४०॥

*॥ इति श्रीनारायणतीर्थयतीन्द्रविरचितायां*
*श्रीकृष्णलीलातरङ्गिण्यां*
*श्रीकृष्णप्रादुर्भाववर्णनं नाम*
*प्रथमस्तरङ्गः समाप्तः ॥*

✠ ✠ ✠ ✠ ✠

# ॥ द्वितीयस्तरङ्गः ॥

श्रीकृष्णस्य बाललीलाभिनयः क्रियते ॥

श्लोकम्

नन्ददोपश्च गोप्यश्च यशोदारोहिणीसुतौ ।
रामकृष्णौ तयोः संयक् लालनं रामकृष्णयोः ॥ ४१ ॥

गर्गाचार्याभिगमनं तयोर्नामकृतिस्ततः ।
पूतनाशकटादीनां मर्दनं तदनन्तरम् ॥ ४२ ॥

नवनीतादिचौर्यञ्च यशोदायां निवेदनम् ।
यशोदया कृतं कृष्णस्याह्वानं प्रणयान्मुहुः ॥ ४३ ॥

उलूखले दामबन्धो यमळार्जुनभञ्जनम् ।
यक्षाभ्यां च कृतं स्तोत्रं विश्वरूपप्रदर्शनम् ॥ ४४ ॥

यशोदया कृतं स्तोत्रं बालभावप्रदर्शनम् ।
इत्येवं बाललीलायाः कथासंग्रह ईरितः ॥ ४५ ॥

*तत्रादौ नन्दस्यागनमम्*[२७] ॥

*दरु ११*

रागम्ः भैरवि ताळम्ः आदि

गोपैरनुगतो नित्यं गोबृन्दानि विचारयन् ।
गोपालकस्वामि नन्दगोपो महान् विराजते ॥

*अथ गोपीनामागमनम्* ॥

---

[२७] नन्दगोपागमनम्

## *दरु १२*

रागम्: सौराष्ट्रम्      ताळम्: आदि

वल्लवयुवतीकदम्बं समायाति वरमरुणाधरबिम्बम् ।
शृङ्गारविलसितपृथुलनितम्बं
विख्यातविविधविलासविडम्बम् ॥

करधृतदधिदुग्धकमनीयफलजातं ।
निरुपमसन्तोषं नीलकुन्तलमिह ॥

श्लोकम्

परं परस्मादपि पाङ्क्तकर्म
क्रमेण वेद्यं करणैरवेद्यम् ।
निजेच्छया प्राप्तमनुष्यरूपं
सुतं यशोदा सुखमाप दृष्ट्वा ॥ ४६ ॥

प्रभाते गोकुले नन्दगेहे गोकुलवासिनः ।
आविर्भावं हरेः श्रुत्वा विविशुर्नन्दमन्दिरम् ॥ ४७ ॥

## *गद्यम् ९*

अवतीर्णे भगवति गोकुलभूमिभागे तत्रत्य-चन्दन- मन्दार- नाग- पुन्नाग- चम्पकाशोक- पनस- रसाल- प्रमुखाः कुसुमफल- सम्पतो दिव्य- सौगन्धि- गन्धित-दिङ्मण्डल- विकसित- माध्वीजरी सञ्चरन्मत्त- मधुव्रत- झङ्कारालङ्कार- रमणीय-कुसुमफल- भारभरानत- शाखाभिः अवनिकताभिः अत्यन्त- भक्तिनम्रा इव भगवतो वासुदेवस्य साष्टाङ्गलक्षणं प्रणामं कुर्वाणाः तत्रत्य माधवी- जाति- मल्लिकादि लताः सन्तत- मन्दपवन- पवनस्पन्दन- विगळित- कुसुमपारैः अवतीर्णस्य श्रीभगवतो नारायणस्य परमप्रेम- लक्षणां भक्तिमातन्वन्त्यः पुष्पाञ्जलिं समर्पयन्त्य इव स्वकीय-

प्रार्थनया सुरभूसुर- कार्यार्थं क्षीरमहोदधेः गोकुलमवतीर्णस्य श्रीनिवासस्य सन्तोषायान्त- रानीत- क्षीरसागरपयोधरा धरेयं असंख्यात- गोरूपधरेति साधुभिरुत्प्रेक्षिता भावः[२८] खगमृगनारी- नरादयः सर्वे च जनाः सम्प्राप्त- सर्व सम्पतो बभूवुः ॥

श्लोकम्

अन्योन्यं व्रजनार्यो नन्दस्यान्तःपुरे शिशुं दृष्ट्वा ।
इति जगुराविर्भूतं लक्षणतस्तद्धि वैष्णवं तेजः ॥ ४८॥

१४ श्रीपतिमिह नन्दगोपगृहे

# श्रीपतिमिह नन्दगोपगृहे

रागम्ः कांभोजि     ताळम्ः आदि (त्रिपुट)

## *पल्लवि*

श्रीपतिमिह नन्दगोपगृहे परमागतमाकलये
अये सखि आगतमाकलये (श्रीपतिमिह)

## *अनुपल्लवि*

गोपकदम्बकगोपगोपिकाबृन्द-
तापसजनरक्षणाय (श्रीपतिमिह)

## *चरणम्*

परमपुरुषचिह्नं भद्रदमवतारय
पद्माङ्कुशादिरेखं अये सखि
परिपूर्णभावं प्रकटीकरोति दिव्य-
पाणिपादाब्जगतं भजदार्तिहरममोघम् (श्रीपतिमिह) ॥ १॥

पश्य पश्याधुना पादपबृन्दानि
विश्वस्य मे वचनं अये सखि

[२८] गावः

भृशमिव भूमौ दिशि दिशि सफलानि
दिव्यसुगन्धिकुसुमैरतिनिबिडानि जयन्ति (श्रीपतिमिह) ॥ २॥

अरविन्दलोचने आविर्भवति जगत्
अतितरामिह रमते अये सखि
निरुपमानन्दं नित्यबोधस्वरूपं
परमनुगीतमिदं नारायणतीर्थयतिना (श्रीपतिमिह) ॥ ३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

करिष्यामः शिशोरस्य मङ्गळाचरणं वयम् ।
स्मरिष्यामः परं देवं लक्ष्मीनारायणं मुदा ॥ ४९॥

१५ कलय कल्याणानि

# कलय कल्याणानि नारायण

रागम्: केदारगौळ ताळम्: आदि

*पल्लवि*

कलय कल्याणानि नारायण
बलभद्रावरजाय नारायण (कलय)

*चरणम्*

सरसिजनयनाय सकललोकहिताय
नरलोकसंभवाय नारायण
शरदिन्दुवदनाय शतमन्मथसमाय
निरवधिकगुणाय नारायण (कलय) ॥ १॥

नन्दगोपसुताय नगराजधीराय
सुन्दरचरणाय नारायण

इन्दिरामन्दिराय ईप्सितफलदाय
चन्दनादिगन्धिताय नारायण (कलय) ॥ २॥

गुरुतरकरुणाय गोकुलभूषणाय
परिजनपालनाय नारायण
निरुपमसुन्दराय नीलमेघनिभाय
परमपुरुषलक्षणाय नारायण (कलय) ॥ ३॥

नवपल्लवकराय नवमणिभूषिताय
कविजननायकाय नारायण
अवनीवल्लभाय आश्रितवत्सलाय
शिव नारायणतीर्थ सेविताय (कलय) ॥ ४॥

✠ ✠ ✠ ✠ ✠

*गद्यम् १०*

इत्येवं गोकुलपुरवरनार्यः वासुदेवमशेषजगतां आदिकर्तारं नारायणमवतीर्णं अजानन्त्यः विष्णुमाया- विमोहिताः मानुषशिशुमिव मत्वा तस्यायुरारोग्यै- श्वर्याभिवृद्धये कृतस्वस्त्ययनाः ततोऽन्यमिव नारायणं प्रार्थयामासुः । प्रागेव वासुदेवांशः संकर्षणाख्यो रौहिणेयो गोपीभिः आशिर्भिः संवर्धितस्तत्र विहरति स्म ॥

*अथ गर्गाचार्यागमनम् ॥*

*दरु १३*

रागम्: भैरवि ताळम्: चापु

निर्गतमोहतिमिरो निर्मलमानसो नित्यम् ।
स्वर्गापवर्गाधिकारी गर्गाचार्यो विराजते ॥

*ततस्तयोर्नामकरणम् ॥*

### *गद्यम् ११*

गर्गोऽपि निर्गत मोहतिमिरपटल- दिव्यदृष्टिस्तयोर्नामानि नन्देन किल कारयामास ।

श्लोकम्

कंसेन प्रेरिता काचित् पूतना शिशुघातिनी ।
कृष्णं स्तनन्धयं मत्वा तस्मै स्तनविषं दधौ ॥५०॥

तद्भावं सर्वविद् ज्ञात्वा स्तन्यपानमिषेण ताम् ।
जघान साऽपतद्भूमौ दर्शयन्त्यासुरीं तनुम् ॥५१॥

ततो दृष्ट्वा जगन्नाथं गोपबालमिव स्थितम् ।
चक्रुः स्वस्त्ययनं तस्य गोपगोप्योऽपि तं जगुः ॥५२॥

१६ मङ्गळानि तनोतु

## मङ्गळानि तनोतु

रागम्: नाथनामक्रिया ताळम्: झंप

### *पल्लवि*

मङ्गळानि तनोतु मधुसूदनः सदा
गङ्गाधरोऽपि तव सापि गङ्गा (मङ्गळानि)

### *अनुपल्लवि*

शृङ्गारवारिधे श्रीवत्सकौस्तुभा-
लङ्कार शिशुभाव भयविभङ्ग (मङ्गळानि)

### *चरणम्*

अस्तु ते भद्रमिह दुस्तरभवांबोधि
विस्तरभयापहर वस्तुसुखद
कस्तूरिकातिलक विस्तीर्णपाल जग-
दस्तितापादक सदास्तरहित (मङ्गळानि) ॥ १॥

अक्षीणसम्पदिह रक्षतु धरेयमथ
शिक्षतु हरिस्तव विपक्षनिचयम्
दक्षिणामूर्तिरपि दाक्षिण्यमावहतु
वीक्षितां त्वां सकलसाक्षी सदयम् (मङ्गळानि) ॥ २॥

दुर्गाणि वारयतु दुर्गा सरस्वती
भर्गोऽपि भर्जयतु पापवर्गम्
सर्गादि सकलसंसर्गसाधकमिह
मार्गः तवावतु तवापवर्गम् (मङ्गळानि) ॥ ३॥

परिपूर्णबोधरस परिपन्तिहर सरस
निरवधिक संपदं दिशतु भूमा
विरचितमिदं तु शिवनारायणानन्द-
तीर्थेन परमपुरुषार्थफलिना (मङ्गळानि) ॥ ४॥

✠ ✠ ✠ ✠ ✠

## *गद्यम् १२*

सा खलु नन्दगोपमहिषी यशोदाख्या सकललोकाधारं अनाधारं अपरिमितमहिमानमप्यात्म महिमानमवकल्प्य स्वाङ्गमारोप्य विद्युद्पुञ्जमध्यापि- व्यक्त-नूतन- जलधरवद्विद्योतमानं श्रीकृष्णं करकमलाभ्यां मुखाभिमर्शनं कृत्वा भूति- तिलककरणादिनाप्याशीर्भिः वर्धयामास ॥

श्लोकम्

निहते शकटे पद्भ्यां तृणावर्ते च मर्दिते ।

कृष्णेन विष्णुना सोऽयं स्वस्तः क्रीडति बालवत् ॥ ५३॥

*गद्यम् १३*

अथ जानुचराभ्यां रामकृष्णाभ्यां सह यशोदाया आगमनं गीयते ॥

*दरु १४*

रागम्: द्विजावन्ति ताळम्: आदि

नन्दगेहिनी मन्दगामिनी
सुन्दरानना यशोदा सुरमोहिनी ॥ १॥

नन्दितामरी नीलकबरी
मन्दं मन्दमायाति मधुरभाषिणी ॥ २॥

लोकनायकं योगितारकं
बालकमादाय आयाति भगवन्तं कृष्णम् ॥ ३॥

अम्बुजाननं अब्जलोचनं
कम्बुवर्णमपि श्रीरामनामानम् ॥ ४॥

*अथ यशोदा सुतमाह ॥*

१७ सकललोकाधार

*द्विपद गीतम्*

सकललोकाधार सच्चिदाकार
प्रकटितागमजाल पद्माविलोल ॥ १॥

अगणितगुणग्राम आत्माभिराम
मृगमदाङ्कितबाल मित्रानुकूल ॥ २॥

खगराजवाह निर्गतभवमोह
नगराजवर धीर नानाविहार ॥ ३ ॥

विकचवारिजनेत्र विस्फुरद्गात्र
शकलितासुरजाल शान्त्येकमूल ॥ ४ ॥

भगवन् भयापहर भक्तमन्दार
निगमशीर्षाराम नित्याप्तकाम ॥ ५ ॥

सकल कल्याणगुण साधुसन्तारण
मकरध्वजाकार मञ्जुळहार ॥ ६ ॥

कलितकौस्तुभशोभ काळमेगाभ
बलभद्रकृतखेल बालगोपाल ॥ ७ ॥

मदनगोपाल सन्मानत शील
मुदमेहि देहि सुत मुनिबृन्दवन्द्य ॥ ८ ॥

सारसाक्ष मुकुन्द सच्चिदानन्द
धीर नारायणतीर्थ -कृतगीत ॥ ९ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

जानुभ्यां पाणिपद्माभ्यां व्रजन्तं नन्दनन्दनम् ।
आनन्दयन्तमबलाः सबलं परमं जगुः ॥ ५४ ॥

१८ माधव माधव कृष्ण

# माधव माधव कृष्ण

रागम्: मोहनम् (नवरोज्) ताळम्: चापु

*पल्लवि*

माधव माधव कृष्ण मङ्गळालय श्रीकृष्ण

*अनुपल्लवि*

साधकफलद कृष्ण सफल श्रीकृष्ण (माधव)

*चरणम्*

नन्दनन्दन मुकुन्द सुन्दरमुखारविन्द
नन्दित गोपिकाबृन्द नतजनानन्द
इन्दिराहृदयानद इन्दुवदन गोविन्द
मन्दरधर सुनन्द- वन्द्य सानन्द (माधव) ॥१॥

दिव्यकस्तूरीतिलक दीनजनपरिपालक
भव्ययोगिभयवारक भक्तोद्धारक
अव्यय भूतिदायक अगणितलोकनायक
नव्यनवनीतरसिक नन्दबालक (माधव) ॥२॥

चारुनूपुरकोमल[२१]- चरण बालचापल
सरससद्गुणजाल सङ्गतलीला
नीरदनील निर्मल नित्यशुद्धागममूल
नारायणतीर्थबाल नतजनालोल (माधव) ॥४॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

इतस्ततः सञ्चरन्तं जगन्मोहनविग्रहम् ।
कराभ्यामथ जानुभ्यां लालयन्ति व्रजाङ्गनाः ॥५५॥

१९ एहि मुदम् देहि

# एहि मुदं देहि श्रीकृष्ण

रागम्:यदुकुलकांभोजि (कमास्) तालम्: आदि

[२१]कमल

## पल्लवि

एहि मुदम् देहि श्रीकृष्ण कृष्ण मां
पाहि गोपालबाल कृष्ण कृष्ण

## चरणम्

नन्दगोपनन्दन श्री कृष्ण कृष्ण- यदु-
नन्दन भक्तचन्दन कृष्ण कृष्ण (एहि) ॥ १॥

कलभगतिं दर्शय श्री कृष्ण कृष्ण- तव
कर्णौ चलय श्री कृष्ण कृष्ण (एहि) ॥ २॥

धाव धाव माधव श्री कृष्ण कृष्ण- नव्य-
नवनीतमाहर श्री कृष्ण कृष्ण (एहि) ॥ ३॥

विक्रमबलं दर्शय श्री कृष्ण कृष्ण- विधि-
शक्रादिसन्नुत श्री कृष्ण कृष्ण (एहि) ॥ ४॥

भव्यनटनं कुरु श्री कृष्ण कृष्ण- बल-
भद्रसहित श्री कृष्ण कृष्ण (एहि) ॥ ५॥

चञ्चलमणिकुण्डल श्री कृष्ण कृष्ण- चारु-
चम्पकनासामौक्तिक श्री कृष्ण कृष्ण (एहि) ॥ ६॥

कुङ्कुमपङ्किलदेह श्री कृष्ण कृष्ण- भक्त-
शङ्करचरण श्री कृष्ण कृष्ण (एहि) ॥ ७॥

साधु साधु कृतमिह श्री कृष्ण कृष्ण- लोक-
साधकहिताय श्री कृष्ण कृष्ण (एहि) ॥ ८॥

नारदादिमुनिगेय श्री कृष्ण कृष्ण- शिव[३०]-

[३०] श्रीमन्

नारायणतीर्थवरद कृष्ण कृष्ण (एहि) ॥ ९ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

विन्यस्यैकं भुवि भुवनभृत्पादमेकं च हस्तं
मात्रा चानुप्रणिहितमथ स्वाधु हैयङ्गवीनम् ।
हस्ते गृह्णन् सकलजगतां सारभोक्ताऽहमात्मे-
त्याचक्षाणो विहरति जगन्मोहनो नन्दसूनुः ॥ ५६ ॥

### *गद्यम् १४*

तथाविधमिह गोपरमणीचित्तमत्तमातङ्गमहनीयालानभूतं श्रीकृष्णं नन्दगोप- महिषी स्वसुतमिव लालयन्ती तमाह ॥

२० एहि मुदं मम देहि

# एहि मुदं मम देहि

रागम्: आनन्दभैरवि (पुन्नगवराळि) ताळम्: चापु

### *पल्लवि*

एहि मुदम् मम देहि जगन्-
मोहनकृष्ण मां पाहि

### *अनुपल्लवि*

एहि समाहित दीनजनावन
मोहरहित मुनिमुक्तिवितरण (एहि)

### *चरणम्*

कमनीयकौस्तुभशोभ - कर-
कलितनवनीतघनाभ

समुदितगोकुलकलभ- सर्व-
सन्मानसयतीन्द्र सुलभ
अमरेन्द्रवल्लभ असुरसुदुर्लभ
विमदमदविभङ्ग वीर पद्मनाभ (एहि) ॥१॥

चरणजानुकरैरलं ते बहु-
सञ्चरणेन गोपाल
करधृतनवनीतकबळं - तव
कर्दमं मा कुरु विमलम्
परिपूर्णनिजकाम पातकगणभीम
वरनूपुराभरण वसुधाभरण (एहि) ॥२॥

कङ्कणकेयूरभूष - कनक-
किङ्किणीकृतबहुघोष
कुङ्कुमपङ्किलवेष - कुटिल-
कुन्तळ गोकुलभूष
किङ्करहितकर कीर्तिसुधाकर
मङ्गळकर नारायणतीर्थ तोष (एहि) ॥४॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

लालयन्ती यशोदा सा नन्दस्य महिषी सुतम् ।
चरन्तं कर्दमभुवि त्वरया जगृहे हरिम् ॥५७॥

*गद्यम् १५*

अयं हि परमात्मा परमप्रेमास्पदतया परमानन्दघनः स्वभक्तानुग्रहचिकीर्षया स्वेच्छया प्राप्तगोपपालकविग्रहः शनैः शनैः गोपबालैः सह पद्भ्यामेव सञ्चरन् अनन्तकल्याणगुण-

रत्नलीलाकल्लोलास्पदतया अत्यन्तसौन्दर्य- रस- जलनिधिः अपारकरुणासुधानिधिरिह जयति भगवान् नन्दकुमारः ॥

तस्य नवनीतचौर्यादि लीलासक्तस्य सबलस्य चोरशिखामणेः आगमनं गीयते ॥

२१ कृष्णं कलय सखि

# कृष्णं कलय सखि

रागम्: मुखारि ताळम्: आदि

## *पल्लवि*

कृत्ष्णं कलय सखि सुन्दरं बाल (कृष्णं)

## *अनुपल्लवि*

कृष्णं गतविषयतृष्णं जगत्प्रभ-
विष्णुं सुरारिगणजिष्णुं सदा बाल (कृष्णं)

## *चरणम्*

नृत्यन्तमिह मुहुरत्यन्तमपरिमित-
भृत्यानुकूलमखिलसत्यं सदा बाल (कृष्णं) ॥१॥

धीरं भवजलधिपारं सकलवेद-
सारं समस्तयोगितारं सदा बाल (कृष्णं) ॥२॥

शृङ्गाररसभरसङ्गीतसाहित्य-
गङ्गालहरीखेलसङ्गं सदा बाल (कृष्णं) ॥३॥

रामेण जगदभिरामेण बलभद्र-
रामेण समवाप्त[31]कामेन सदा बाल (कृष्णं) ॥४॥

दामोदरमखिलकामाकरं घन-
श्यामाकृतिमसुरभीमं सदा बाल (कृष्णं) ॥५॥

---

[31]सहावाप्त

राधारुणाधरसुधापं सच्चिदानन्द-
रूपं जगत्त्रयभूपं सदा बाल (कृष्णं) ॥६॥

अर्थं शिथिलीकृतानर्थं श्री नारायण-
तीर्थ परमपुरुषार्थं सदा बाल (कृष्णं) ॥८॥

✠ ✠ ✠ ✠ ✠

*गद्यम् १६*

स खलु महानुभावो लीलया परिकलिताखिलाण्डकोटि- ब्रह्माण्डनायको मधुसूदननामा व्रजपुरिवरसुन्दरी- परिवेष्टितः वशीकृतमहामायोऽपि माया- परवशो बालक इव लीलाविनोदं दर्शयन् कलभगमन- कलपाषण- करुणेक्षण- मृदु- मन्दहासादि- विलासैः निजपरिजनान् आनन्दयन् सकललोकसंरक्षणे जागरूकः सन् स्वकीयं परब्रह्मभावमनुसंदधानो नन्दगोपमन्दिरे नन्दसूनुरिव विहरति स्म ॥

श्लोकम्
व्रजभुवि नन्दकुमारे
व्रजबालकबृन्दकुमुदपूर्णेन्दौ ।
विहरति तस्य चरित्रं
व्रजपुरनार्यो जगुः यशोदायै ॥५८॥

२२ कलय यशोदे

# कलय यशोदे तव बालम्

रागम्: केदारगौळ ताळम्: आदि (चापु)

*पल्लवि*

कलय यशोदे तव बालम्

*अनुपल्लवि*

खलबालकखेलनलोलम् (कलय)

*चरणम्*

अपहृतबहुतरनवनीतं
अनुपमलीलानटनकृतम्
कपटमानुषबालकचरितं
कनककन्दुकखेलननिरतम् (कलय) ॥ १॥

पथि पथि लुण्ठितदधिभाण्डं
पापतिमिरशममार्ताण्डम्
अधिकबलोद्धूतजगदण्डं
आनन्दबोधरसमखण्डम् (कलय) ॥ २॥

मल्लबालकखेलनचतुरं
मनसिजकोटिलावण्यभरम्
कल्याणगुणनवमणिनिकरं
कमनीयकौस्तुभमणिशेखरम् (कलय) ॥ ३॥

नवनीतचोरबालकचरितं
नन्दादिव्रजपुण्यतरुफलितम्
ध्रुवपदफलमेततदिललितं
भुवि नारायणतीर्थ यतिभणितम् (कलय) ॥ ४॥

✠ ✠ ✠ ✠ ✠

*गद्यम् १७*

अये सखि यशोदे तव यशोदाख्यार्थमन्वर्थयन् भगवान् अपरिमित- गोपबाल- परिवेष्टितः बलभद्रसहायः तत्र तत्राशक्यसंस्पर्शेषी उन्नतगृहनिबद्धेषु शिक्येषु सञ्चित- गोरसग्रहणोपायान् अभिज्ञान् गोपबालान् प्रति तदुपाय निचय- माचारतश्शिक्षयन् आरुरुक्षूनिवारूढयोगी तत्रत्य दधि-दुग्ध- नवनीतादिकं आकण्डं आपीयान्यानपि पाययन् तत्रत्य गोपबाल-

बिडालादिभ्यो निक्षिपन् क्वापि क्वापि करतलपल्लवकलितवेत्रादिना विरचित शिक्यभाण्ड-विवरान् निस्सरन्तीः दुग्धदधिधाराः स्वयं पिबन् अन्यानपि पाययन् भाण्डानि च स्फोटयन् विश्वात्मा नित्यसिद्ध- विपुलतर- परमानन्द- रस- तृप्तोऽपि स्वेच्छया परिगृहीतमूर्तिमत्तया गोरसपरितृप्त इव स्वयमन्यांश्च तर्पयन् मुख्यप्राण इव वागादीनश्रान्तो विश्रान्तिस्थानमितरेषां निजानुचरैः सह सानन्दमिह विहरति नन्दसूनुः ॥

श्लोकम्

वीथ्यां वीथ्यां व्रजभुवि सुखम् सञ्चरन्तं[32] मुकुन्दं
मध्ये मध्ये घृतदधिपयः[33] पाययन्तं पिबन्तम् ।
बुधौ बुद्धावहमिति स्वान्तमाभासयन्तं
भूयो भूयः सुतमनुनयन्त्याह चेदं यशोदा ॥५९॥

२३ आयाहि माधव माधव

# आयाहि माधव माधव

रागम्: कांभोजि ताळम्: चापु

## *पल्लवि*

आयाहि माधव माधव हे कृष्ण (आयाहि)

## *चरणम्*

सङ्गवसमयेऽतीते सवितरि मध्यमागते
मङ्गळाचारोचिते त्वयि
अङ्गजसलिलावृते अधिकश्रमसंजाते
अङ्गजखेलनैरलं ते (आयाहि) ॥१॥

चन्द्रमण्डलसमान- चरु दधिखण्डफेन-
सान्द्रनवनीताद्याहारम्

---

[32]पर्यटन्तं
[33]हृतदधिपयः

मन्दिरे मम गृहाण मञ्जुळनूपुराभरण
सुन्दर सुखय सादरम् (आयाहि) ॥ २॥

पल्लवादतिकोमळ पादपङ्कजयुगळ
मल्लिकाजातिसौगन्धित-
फुल्लपङ्केरुहदळ- भूति[३४]नेत्रसुकपोल
वल्लवीमानसालङ्कार (आयाहि) ॥ ३॥

आलोलमणिकुण्डल अनवद्यमौक्तिकजाल
बालभावखेलनलोल
नलिनसुन्दरनाभ नवनीताहारविलोभ
नारायणतीर्थ सुलभ (आयाहि) ॥ ८॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

इत्येवं प्रार्थयन्ती सा गोविन्दं नन्दनन्दनम् ।
यशसा पूरयन्त्येषा यशोदा जगृहे जगत् ॥ ६०॥

आनीय स्वग्रहं बालं सबलं बालवत्सला ।
नीलमेघनिभाकारं यशोदा समतोषयत् ॥ ६१॥

कदाचिदौद्धत्यमनन्तवीर्ये
हरौ विलोक्याप्रतिमं यशोदा ।
बबन्ध धाम्ना तमशेषबन्धु-
मुलूखले बालविलासलोलम् ॥ ६२॥

आकृष्योलूखलं तस्मात् यमळार्जुनमध्यकः ।
बभञ्ज बलवान् कृष्णः तावार्जुनतरू हरिः ॥ ६३॥

नारदमुनिवरशापात् यमळार्जुनवृक्षभावमापन्नौ ।
यक्षसुतौ सविचित्रं दाम्ना बद्धोप्यमोचयद्बन्धात् ॥ ६४॥

---

[३४]पूरि

*अथ शापविमुक्तयोर्यक्षसुतयोरागमनं गीयते ॥*

*दरु १५*

रागम्: कांभोजि   ताळम्: आदि

वृक्षभावबन्धमुक्तौ कृष्णेन
यक्षसुतावनुरक्तौ ।
लक्षितविषयविरक्तौ सततं
लक्ष्मीपतिपादभक्तौ ।
प्रक्षीणकल्मषपारतया हरि-
भक्तिसुधारसगिरमुद्गिरन्तौ ॥

श्लोकम्
तं तुष्टुवतुरत्यन्तं सन्तुष्टौ दिव्यसुन्दरौ ।
कुबेरतनयौ यक्षौ दामोदरमरिन्दमम् ॥ ६५ ॥

२४ दामोदर तावक

# दामोदर तावक

रागम्: कल्याणि   ताळम्: आदि (त्रिपुट)

*पल्लवि*

दामोदर तावकपरभावमहं सदा जाने (दामोदर)

*अनुपल्लवि*

श्यामधामन् भूमन् सामादिसर्वनिगमावसाने (दामोदर)

*चरणम्*

पुण्डरीकपुरमध्य- पुरुषभावेन सिद्धं
चण्डभानुकोटिप्रकाशं चिद्घनाकाशम्
पण्डितपरिभावितं पापसङ्गविवर्जितं
खण्डितमायाविलासं कारणमखण्डानन्दरसम् (दामोदर) ॥ १॥

सत्यकामादिगुणकं सर्वहृदयाभासकं
नित्यमङ्गळनिवहं निर्गतमोहम्
प्रत्ययबाधितशोकं प्रतिभासितसर्वलोकं
मृत्युजन्मादिविरहं सत्यलोकादिसर्वदेहम् (दामोदर) ॥ २॥

कमलासनादिगीतं कामयानादिफलितम्
श्रीमदशेषविभवं धीरानुभाव्यम्
समरसतया नित्यं विमलयोगिविदितं
अमररम्यश्रीगोकुल- कमनीयगोपालशरीरम् (दामोदर) ॥ ३॥

नरकभयवारकं नामरूपनिर्वाहकं
परिपूर्णानन्ददायकं भक्ताधारकम्
सुरगुरुगीतमेकं सूदितासुरनायकं
वर नारायणतीर्थ -वन्दितपादपद्मकम् (दामोदर) ॥ ४॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

देवं ब्रह्मपुरान्तस्थं पुण्डरीकान्तरस्थितम् ।
चिदाकाशं जगद्बीजं वासुदेवं समाश्रये ॥ ६६॥

भगवति यमळार्जुनस्य भङ्गं
कृतवति गोकुलवासिभिर्यशोदा ।
सपदि निजकृपाविमुक्तबन्धं
हृदि परिरभ्य चकार मङ्गळानि ॥ ६७॥

## *गद्यम् १८*

अथ कदाचिदरविन्दलोचने भगवति वासुदेवे सबले गोपबालबृन्द- परानन्द- सुधामहोदधि- पूर्ण- शशाङ्कबिंबे स्वकुक्षिपरिरक्षितानेककोटि- ब्रह्माण्डनायके कृत्रिममानुष- बालचापलेन संदर्शित- मृद्भक्षणादिचरिते सुचरिते विहरति तदीयलीलाविलसिततच्चरितं बलभद्रमुखादाकर्ण्य स्वकीयबालहितैक्षिणी दण्डोद्यतकरा संताडयन्तीव तत्सविधमागता यशोदा भयादिव मुखविदारणं कुर्वति तस्मिन् सकलमपि जगदण्डमात्मानं सविस्मयमवलोकयामास ॥

श्लोकम्

कर्तारं सर्वलोकानां मायामानुषबालकम् ।
कुक्षौ संरक्षिताशेषमुच्चैः स्तौतीति सा हरिम् ॥ ६८॥

२५ हरिमीडे श्रीहरिमीडे

# हरिमीडे श्रीहरिमीडे

रागम्: शङ्कराभरणम्     ताळम्: त्रिपुट

## *पल्लवि*

हरिमीडे श्रीहरिमीडे देवम् (हरिमीडे)

## *अनुपल्लवि*

गुरुतरासुरभारहरमहमीडे (हरिमीडे)

## *चरणम्*

अखिलाण्डकोटिब्रह्माण्डनायक-
मिह निखिलभुवनकर्तारम्
प्रकटितनिजविश्वरूपमनामयं
अघटितघटनाकारम् (हरिमीडे) ॥ १॥

स्वर्धाममस्तकं सूर्यचन्द्रनयनं
विध्वस्तमोहमहम्

वर्धिताखिलवेदवाचमाशाश्रुति-
मनिलासुमखिलदेहम् (हरिमीडे) ॥ २॥

विश्वहृदयदेशं विपुलमहीचरणं
शाश्वतानन्दघनम्
निश्वसितागमनिर्मलविज्ञान-
नित्यकल्याणनिदानम् (हरिमीडे) ॥ ३॥

भक्तजनसमूहभद्रदं भवभयमुक्तममरमृतुगीतम्
मुक्तसङ्गमुनीन्द्र मुक्तिदाननिपुण-
मूलमागमबोधितम् (हरिमीडे) ॥ ४॥

तरणिशशिमण्डलकोटिकोटिभास्वरं
अरविन्दभवकारणम्
हरिभक्तशिव नारायणतीर्थ कृतमिदं
अखिलपातकहरणम् (हरि) ॥ ५॥

✠ ✠ ✠ ✠ ✠

श्लोकम्
गोविन्द घटयानन्दं परमाम्नायगोचर ।
श्रीनन्दनयाशेषयोगिध्येयपदांबुज ॥ ६९॥

२६ गोविन्द घटय

# गोविन्द घटय परमानन्द

रागम्: भैरवि (कांभोजि) ताळम्: झंप (खण्ड चापु)

*पल्लवि*

गोविन्द घटय परमानन्दममृतमिह हरे

*अनुपल्लवि*

श्रीनन्दतनय बहुयोगीन्द्रसुरविनुत (गोविन्द)

*चरणम्*

अगणितगुणग्राम अपरिमितनिजकाम
निगमपरमाराम निखिलमोहविराम
नगधरघनश्याम नतजनकुमुदसोम
अघहरण सर्वसम असुरमण्डलभीम (गोविन्द) ॥ १ ॥

परमपुरुषाशेष- पाल परिजनतोष
परिहृताखिलदोष पदगवाहन शेष-
पर्यङ्कमृदुभाष परममङ्गळवेष
निरवद्यगोपपुरि- नियत वरमणिभूष (गोविन्द) ॥ २ ॥

नवमौक्तिकहार नन्दगोपकुमार
भवबन्धनविदूर भद्रद सुखाकार
अवनत जनाधार अपरिमितशुभचार[३५]
नवनीतचोर नर- नारायणावतार (गोविन्द) ॥ ३ ॥

शरदिन्दुसमवदन शतमन्मथसमान
गुरुतरानन्दघन कुन्दसुन्दररदन
परिपन्थितगणदळन पालिताखिलभुवन
सरस नारायणतीर्थ -सत्यफलदान (गोविन्द) ॥ ४ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

इयेवं प्रार्तयन्तीं तां यशोदं नन्दनन्दनः ।
भूयः सन्दर्शयामास बालभावं स्वलीलया ॥ ७० ॥

*॥ इति श्रीनारायणतीर्थयतीन्द्रविरचिताय्यं*

[३५] अनुपमशुभाचार

श्रीकृष्णलीलातरङ्गिण्यां
श्रीकृष्णबाललीलावर्णनं नाम
द्वितीयस्तरङ्गः समाप्तः ॥

✠ ✠ ✠ ✠ ✠

# ॥ तृतीयस्तरङ्गः ॥

## श्रीकृष्णगोवत्सपालनकरणं

श्लोकम्
अथाभिनीयते कृष्णकृतं गोवत्सपालनम् ।
आदौ नन्दस्ततो गोप्यो बलभद्रस्ततो हरिः ॥ ७१॥

बलेन सह कृष्णेन वत्सानां पालनं कृतम् ।
कृते वत्सापहारे च ब्रह्मणा कृतसंस्तुतिः ।
यज्ञपत्नीस्तुतिश्चात्र संग्रहस्तु तृतीयके ॥ ७२॥

नन्दाद्यागमनादूर्ध्वं गोपबालैर्बलेन च ।
सहैवागमनं बालकृष्णस्याथ सुगीयते ॥ ७३॥

*अथ बलरामस्यागमनम् ॥*

*दरु १६* [३६]

रागम्: नाथनामक्रिया      ताळम्: आदि

हली बली च मुसली ललिताङ्गदकुण्डली ।
नीलांबरी श्वेतरूपी बलभद्रो विराजते ॥

*अथ श्रीकृष्णस्यागमनं देवाङ्गनाभिर्गीयते ॥*

---
[३६] not printed in some versions

# आलोकये श्रीबालकृष्णम्

रागम्: हुशेनि      ताळम्: आदि

*पल्लवि*

आलोकये श्रीबालकृष्णं सखि

*अनुपल्लवि*

आनन्दसुन्दरताण्डवकृष्णं सखि (आलोकये)

*चरणम्*

नवनीतखण्डदधिचोरकृष्णं भक्त-
भवपाशबन्धमोचनकृष्णम् (आलोकये) ॥१॥

नीलमेघश्यामळसुन्दरकृष्णं नित्य-
निर्मलानन्दबोधलक्षणकृष्णम् (आलोकये) ॥२॥

चरण निक्कणितनूपुरकृष्णं कर-
कलितकनककङ्कणकृष्णम् (आलोकये) ॥३॥

किङ्किणीजालघणङ्घनकृष्णं लोक-
शङ्कितताराकावळिमौक्तिककृष्णम् (आलोकये) ॥४॥

सुन्दरनासामौक्तिकशोभितकृष्णं नन्द-
नन्दनमखण्डविभूतिकृष्णम् (आलोकये) ॥५॥

कण्ठोपकण्ठशोभिकौस्तुभकृष्णं कलि-
कल्मषतिमिरभास्करकृष्णम् (आलोकये) ॥६॥

वंशीनाथविनोदसुन्दर कृष्णं परम-
हंसकुलशंसितचरित्रकृष्णम् (आलोकये) ॥७॥

गोवत्सबृन्दपालनकृष्णं कृत-
गोपिकाबालकखेलनकृष्णम् (आलोकये) ॥८॥

नन्दसुनन्दादिवन्दितकृष्णं श्री-
नारायणतीर्थवरद कृष्णम् (आलोकये) ॥ ९ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

नन्दसूनुरथ गोपसूनुभिः
नन्दितेन्दुवदनः शनैः शनैः ।
ख्यापयन्नखिलदीनबन्धुतां
वत्सपालनविधौ स दीक्षितः ॥ ७४ ॥

## *गद्यम् १९*

असौ खलु भगवानपरिमितकरुणारसालवालो भूमाख्यो निजजन- संतापहरण्- प्रवीणः परिगृहीतगोपकुमारभावः वेणुविषाणनिनादविशेषैः उपवनपरिमिलितान् आगमभागवचो- विलासैरिव परतत्वपरिमिलितान् अशेष- योगिचित्तवृत्ति- विशेषानिव अशेषगोवत्सान् निजकरकलित- वेत्रसञ्चारविलासैर्नियमेन सञ्चारयन् समुदित- महोत्साहस- हास- वालोकनभाषणादिभिः अखिलानपि गोपबालान् आनन्दयन् वैमानिक- बृन्दननय- महोत्सवो मोहातीत- विशुद्ध- बोधैकमूर्तिरपि विहरति हरिरिह दीनबन्धुः ॥

श्लोकम्

वैमानिकाः परं तत्वं मत्वा गोपालनन्दनम् ।
परस्परं जगुर्भक्त्या गोवत्सानुचरं हरिम् ॥ ७५ ॥

२८ कलयत गोपिका

# कलयत गोपिकाकारुण्यरसपूर

रागम्: पन्तुवराळि ताळम्: रूपकम्

*पल्लवि*

कलयत गोपिकाकारुण्यरसपूर-
काळमेगाभिरामम्

*अनुपल्लवि*

चलदधराञ्चितचारुमुरळीनाद-
फलितकैवल्यकामम् (कलयतु)

*चरणम्*

कुत्सितासुरतिमिरकोटिसूर्यं
अमरकुमुदबान्धवम्
मत्स्यकूर्मादिश्री महनीयाविर्भाव-
मायोल्लसितवैभवम्
सत्सुखामृतजलधिसततखेलननिरतं
साधुजनात्मदेवम्
वत्ससंरक्षणवात्सल्यपरिपूर्ण-
वल्लव बालभावम् (कलयत) ॥१॥

अक्षीणसंपदामाश्रयमखिल
संरक्षणदीक्षाधारम्
पक्षीशवाहनंपङ्कजभव
भावितभद्राकारम्
कुक्षिस्थब्रह्माण्डकोटिविराजितं
कुटिलकुन्तलसुन्दरम्
वीक्षणसमुदितविविधविश्वाकारं
विमलविज्ञानसारम् (कलयत) ॥२॥

करसरोरुहगतकनकनिर्मितवलय-
कमनीयतरविग्रहम्
गुरुतरमौक्तिकं गुणमणिगणभारं

गोपीसन्तापापहम्
सुरराजरिपुवत्सासुरसूदनचरित[37] -
सुललितमतिसुग्रहम्
वर नारायणतीर्थ वरणीय परमार्था -
वरणमोहविनिग्रहम् (कलयत) ॥ ३ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

यज्ञं यज्ञभुजं विष्णुं गोपबालैः समन्वितम् ।
दध्यन्नपूर्णशिक्याद्यैः जगुर्वैमानिका वने ॥ ७६ ॥

२९ पश्यत पश्यत

# पश्यत पश्यत भगवन्तम्

राागम्: भैरवि ताळम्: त्रिपुट

*पल्लवि*

पश्यत पश्यत भगवन्तं गोप -
बालकशिक्यमपहरन्तम्

*अनुपल्लवि*

रस्यधवळदधिमिळितान्नपूरित -
रमणीयकलशविशेषाश्रितम् (पश्यत)

*चरणम्*

शरमारुतमानससमवेगवन्तं
शतकोटिगोपबालमपिलालयन्तम्
सुरुचिरपरिहाससुधामुद्गिरन्तं
सुरलोकवनितागणमाकर्षयन्तम् (पश्यत) ॥ १ ॥

[37]सूदनमचलित

शाखामृगलङ्घनानुग्रहणचतुरं
श्यामसुन्दराकारमतुलविहारम्
अखिललोकाधारमिह वत्सानुचरं
अधिक साहसोत्साहवीर्यमुदारम् (पश्यत) ॥ २ ॥

प्रणयकलहकोलाहलमतिसरसं
प्रकटितनिजपरमानन्दविलासम्
क्वणितकिङ्किणीघणघणललितलास्यं
क्वापि मधुमधुरगीतरसास्यम् (पश्यत) ॥ ३ ॥

सरसमसृणकबळमिह तु भुञ्जानं
सबलसकलगोपमखिलनिदानम्
तरळकुण्डलहारमतिनर्महासं
वर नारायणतीर्थ हृदयविलासम् (पश्यत) ॥ ४ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

आनीतं शिक्यभाण्डस्थं दध्यन्नं गोपबालकैः ।
भुक्त्वा वने चरन् कृष्णस्त्वघासुरमुखं ययौ ॥ ७७ ॥

अघासुरमुखाविष्टाः सवत्सा गोपबालकाः ।
प्राप्तमोहापनुत्यर्थं प्रार्थयन्तो जगुर्हरिम् ॥ ७८ ॥

परमकरुणया मां पालय त्वां प्रपन्नं
निजपरिजनकामं पूरयाचिन्त्यकीर्ते ।
निरवधिककृपाब्धे निर्मलानन्दमूर्ते
भवजलधिनिमग्नं दीनमुद्धारयेश ॥ ७९ ॥

## ३० परमकरुणया

# परमकरुणया मां पालय

रागम्: सौराष्ट्रम्      ताळम्: आदि

परमकारुण्य मां पालय कृष्ण भक्तमनोरथं पूरय
परिपन्थिगणमिह वारय भवसागरपतितं तारय (परम) ॥१॥

मधुकैटभादिविजयादर मत्स्यकूर्मादिरूपसादर
अधिकदयावलोक सुन्दर अपरिमितानन्दसागर (परम) ॥२॥

अखिलाण्डकोटिपरिपालक अनवद्यगोकुलनायक
अघहरण दुष्टनिवाकण आश्रितजनापदुद्धारक (परम) ॥३॥

तरळमणिमकरकुण्डल ताण्डवनटनकृतमण्डल
सरसपरिपालिताखण्डल साधुगोकुलवरस्थण्डिल (परम) ॥४॥

अवनिमण्डलभारखण्डन आश्रितजनहृदयमण्डन
ध्रुवविभूतिदानविचक्षण (कृ.स्ण) शिव नारायणतीर्थ रक्षण (परम) ॥५॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

एवं स्तुतः स गोविन्दः प्रवृत्तस्तमघासुरम् ।
आस्फाट्य बालैर्गोवत्सैः सह गोकुलमागतः ॥८०॥

कदाचिद्गोविन्दे कलितमुरळीनादललिते
सदासे गोवत्सान्वनभुवि सुखं चारयति सः ।
विधिस्तत्सौभाग्यं निरवधिकमालोक्य कुतुकात्
मुहुर्वत्सान् बालानहरदजमायापरवशः ॥८१॥

हृतेषु वत्सबालेषु ज्ञात्वा विधिविचेष्टितम् ।
तन्मातॄस्तोषयामास स्वयं वत्सादिदेहभाक् ॥८२॥

## दरु १७ [३८]

[३८] some versions omit this *daru*

रागम्: नाथनामक्रिया ताळम्: आदि

आयाति चतुरास्यो ब्रह्मा सदसि
गायन् गायन् ध्यायन् ध्यायन् विष्णुं चेतसि ॥१॥

दण्डकमण्डलुधारी दानववैरी
अण्डब्रह्माण्डविधाता अखिलजनयिता ॥२॥

श्लोकम्
इत्थं भूतं हरिं धृष्ट्वा वत्सरान्ते विधिः स्वयम् ।
सन्दर्शितजगत्कोटिशरीरं स्तौति सादरम् ॥८३॥



# जय जय गोकुलबाल

रागम्: कुरञ्जि (भैरवि) ताळम्: आदि

*पल्लवि*

जय जय गोकुलबाल जय सकलागममूल
दयया मां गोपाल दीनं पालय बाल (जय जय)

*चरणम्*

देव मयाचरितमिदं दीनधिया अपराधं
श्रीवसुधाधव कृपया केवलमेव धुनीहि (जय जय) ॥१॥

ईक्षे तावकदेहे ईश जगन्ति निरीहे
वीक्षाशिक्षितमोहे वेदान्तातुलगेहे (जय जय) ॥२॥

जगदण्डकोटितनो जगदुदरान्तर सुतनो
अगणितसञ्ज्ञातमनो अपरिमिताश्रितधेनो (जय जय) ॥३॥

वितर मयीश्वर करुणां विघटय मोहावरणं[३९]
सततं मे भव शरणं साधय संसृतिधरणम् (जय जय) ॥ ४ ॥

इति विधिना परिगीतं श्रुतिवचसा हरिचरितं
यति नारायण कथितं यदुकुलभूषणमुदितम् (जय जय) ॥ ५ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

लीलामानुषदेहं लक्ष्मीशं त्वां प्रसादये देवम् ।
संसारार्णवपतितं कंसरिपो मां त्वमुद्धर त्वरया ॥ ८४ ॥

३२ देव देव प्रसीद

# देव देव प्रसीद

रागम्: मोहनम् (रेवगुप्ति) ताळम्: आदि

*पल्लवि*

देव देव प्रसीद मे

*पल्लवि*

देवकीवरबाल दीनजनपरिपाल (देव देव)

*चरणम्*

लीलाविनोदविग्रह लक्ष्मीपते
बालमोहनविनिग्रह बालोन्नते
कलितसेवकानुग्रह कामाकृते
अलघुवीर्यपरिग्रह अखिलाण्डपते
अखिलमुनिबृन्दानुग्रह गोपालकृष्ण
बाल घननीलादिसुशील हेमचेलानन्त-

[३९] मोक्षावरणं

लीलागममूल श्रीलोलातिविशालफाल
बाल गोपालकृष्ण (देव देव) ॥१॥

श्रीवत्सलक्षणाञ्चित श्रीभावित
देवगन्धर्वसेवित दिव्यायुध
गोवत्सगणसंवृत गोपावृत
अव्यय मुनिवन्दित अचिन्तित
भव्यगोकुलनिरत गोपालकृष्ण
पीतांबरवीत विधुशीताखिलताताघवि-
घातार्जुनसूतामरगीतागमजातभात
बाल गोपालकृष्ण (देव देव) ॥२॥

पूर्णेन्दुमण्डलानन पुरातन
पूर्णसुपर्णवाहन वरानन
तीर्णसंसारमोहन धीरायन
कर्णकुण्डलशोभन कञ्जासन-
वर्णितवीर्यवामन गोपालकृष्ण
नारायण धीरागमसाराघविदूरातुल-
भारारिविदारामरवीरा संसारपार
बाल गोपालकृष्ण (देव देव) ॥३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

कर्पूराभः कुवलयदळश्यामळश्चाभिरामौ
कल्याणानां सकलजगतामाश्रयौ गोपबालौ ।
भक्तत्राणाध्वरवरविधौ दीक्षितौ मोक्षहेतू
मायाशक्त्या विरचिततनू रामकृष्णौ स्मरामि ॥८५॥

भगवन्तमिति स्तुत्वा विधिः स्वं धाम सत्वरम् ।
हरिणा गुरुणाज्ञातो ययौ कृष्णोऽपि गोकुलम् ॥८६॥

*अथ याज्ञीकानामागमनम् ॥*

*दरु १८*

रागम्: सौराष्ट्रम्  ताळम्: आदि

अरणिपात्रपलाशकुशभारं वहन्तो
धरणितले सततं धावन्तो याज्ञिका आयान्ति ॥१॥

पवित्रपाणयो नित्यं पशुलक्षणविदः ।
सवितृमण्डलान्तरस्थं ध्यायन्तो याज्ञिका आयान्ति ॥२॥

अहं पूर्वमहं पूर्वमिति यज्ञकुशला ।
गहनकर्मसामानि गायन्तो याज्ञिका आयान्ति ॥३॥

*अथ यज्ञपत्नीनामागमनम् ॥*

*दरु १९*

रागम्: यदुकुलकांभोजि  ताळम्: आदि

यज्ञपत्नीबृन्दमधुनाऽयाति
यागशालामनिन्द्य कर्मविधिना
विज्ञानपूरितशुद्धमनसा सह
विश्वासपूर्वकनम्रशिरसा ।
दिव्यसुन्दरं भव्यकन्धरं धृत-
नव्यपीतांबरमद्भुतहारम्
चारु कबरीभारभरितं दिव्य-
चामीकराभरणगणभासितम् ॥

*गद्यम् २०*

एवं यज्ञपत्नीसहिते यजमानयाज्ञिकप्रवर्तिते यज्ञकर्मणि साक्षात् यज्ञस्वरूपी भगवान् कन्दर्पदर्पमहासर्पगरुडायमानदिव्यमूर्तिधरो गोपबालैः सह शनैः शनैः सञ्चरन् चारयन्नपि गोवत्सान् तदुपवनदेशमाजगाम । तत्र कदाचित् वत्सपालनसमये बाला ऊचुः ।

श्लोकम्

वयमिह विचरामो ह्यन्नमाकाङ्क्षमाणाः
कथमिह भगवन्नो बालकानामिहान्नम् ।
इति वनभुवि पृष्टो बालकैर्बालकृष्णो-
प्यवददिह भूयादन्नमत्यन्तमृष्टम् ॥ ८७॥

यज्ञशालेयमस्माभिरत्रैवान्नं हि लभ्यते ।
गच्च पृच्छेज्यशालायां यजमानञ्च याज्ञिकान् ॥ ८८॥

यदि ते न प्रयच्छन्ति याचस्वान्नमशङ्कितः ।
तत्पत्न्यः प्रति जानन्त्यो दास्यन्त्यन्नानि ताः स्त्रियः ॥ ८९॥

याज्ञिकान् याचमानस्तु प्रत्याख्यातास्च तैर्द्विजैः ।
ययाचे यज्ञपत्नीस्ताः कृष्णार्थे गोपबालकः ॥ ९०॥

सकृच्छ्रवणमात्रेण स्वाद्वन्नानि बहून्यपि ।
आदाय ताः परं कृष्णं मुक्तसङ्गाः प्रदुद्रुवुः ॥ ९१॥

तत्र गत्वा तु गोपालं गोपीजनमनोहरम् ॥
भोजयित्वाथ सन्तुष्टं विहिताञ्जलयोऽस्तुवन् ॥ ९२॥

३३ बालगोपाल कृष्ण

# बालगोपाल कृष्ण पाहि पाहि

रागम्ः मोहनम् ताळम्ः आदि

*पल्लवि*

बालगोपाल कृष्ण पाहि पाहि (बाल)

*अनुपल्लवि*

नीलमेघशरीर नित्यानन्दं देहि (बाल)

*चरणम्*

कळभसुन्दरगमन कस्तूरिशोभितानन
नळिनदळायतनयन नन्दनन्दन
मिळितगोपवधूजन मीनाङ्ककोटिमोहन
दळितसंसारबन्धन दारुणवैरिनाशन (बाल) ॥१॥

यज्ञ यज्ञसंरक्षण यादववंशाभरण
यज्ञफलविदरण यमिजनशरण
अज्ञानघनसमीरण अखिललोकैककारण
विज्ञानदळितावरण वेदान्तवाक्यप्रमाण (बाल) ॥२॥

व्यत्यस्तपादारविन्द विश्ववन्दित मुकुन्द
सत्याखण्डबोधानन्द सद्गुणबृन्द
प्रत्यस्तमितभेदकन्द पालितनन्दसुनन्द
नित्यदनारायणतीर्थ-निर्मलानन्द गोविन्द ॥३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

यज्ञपत्न्यस्तमीशानं लीलागोपालविग्रहम् ।
प्रसादयन्ति यं वेदास्तात्पर्येणामनन्ति ते ॥१३॥

३४ बालगोपाल मामुद्धर

# बालगोपाल मामुद्धर

रागम्: मोहनम्     ताळम्: चापु

## पल्लवि

बालगोपाल मामुद्धर कृष्ण
परमकल्याणगुणाकर (बाल)

## अनुपल्लवि

नीरदनीलकळेभर कृष्ण
निरुपमकौस्तुभकन्धर (बाल)

## चरणम्

नन्दनन्दन भक्तचन्दन सुर-
बृन्दरचित बहुवन्दन
मन्दस्मितसुन्दरानन - कोटि
मदनसुन्दर जगन्मोहन
इन्दिरामन्दिर भक्तसुन्दर हृदयार-
विन्दभृङ्ग भक्तिमकरन्द नन्दित गोपिकाबृन्द
तां ताहतधैधत्तत्तां तङ्कतो धीमिणाङ्किणतो
धिमिरे तङ्कतोधीमिधीकिट तोधिम्मिरे
तङ्कातोधि गिणाङ्ग गिणत्तोङ्ग धिर्गुडु धधिगुडु
धत्तोङ्ग तोधिगिणङ्गत्तिरुत्तोङ्गडदिरुगुडु
दद्धीकि तकिट दधिगिणतोम् (बाल) ॥१॥

यज्ञादिकर्मफलप्रद कृष्ण यदुकुलजात सुखप्रद
यज्ञसंरक्षणदीक्षण कृष्ण
यतिजनमुक्तिद सुव्रत
ताधय्यद्धैयत्तत्ता किटतकतत्किण्णं धरिकिट
धरिकिटधिमि धिंधिंधिमिकिट तोङ्गिटगिट त्तोङ्गतोङ्गिण
किणकिणधरिधरिकुं धकधक धिर्गुडु तक
तकधिर्कुडु तक (बाल) ॥२॥

गणपति गुरु श्रीपति षण्मुख जय जय जय

झन्तरिकिटतक तत्तोङ्किटतोङ्गत्तककिण दिनहतधिमिताताधां
तकधिर्गुड्डुतक दधिगिणतों दिनहतधिमि तातादां
तकधिर्गुड्डु तक दधिगिणतोम् (बाल) ॥ ३॥

चिन्तितजन चिन्तामणिगण सन्ततसुखसन्तानप्रद
मन्दरधर मञ्जुळमौक्तिक नन्दितजन नन्दात्मजवर
बृन्दावनबृन्दारकगणवन्दितपद वसुदेवात्मज जय जय जय
झन्तरिकिटतक तत्तोङ्गिटतोङ्गत्तोक
गिण दिनहित धिमि ताताधां
तकधिर्गुड्डुतक दधिगिणतोम् (बाल) ॥ ४॥

अन्नमयादिषु पञ्चसू त्वां
अन्तरमानन्दविग्रहम्
उन्नतफलमामनन्ति ते जग-
दुदयलयादिसुलक्षितम्
तद्धित्वमेवासि तद्धित्वमेवासि
तत्सर्वमेतत्त्वमेवासि नूनम्
तदुत्तुङ्गमुक्तामणिप्रस्फुरद्दिव्य-
मत्तेभवद्योगिचित्ते स्फुरन्तम्
नृत्यन्तमत्यन्तमानन्दमीडे
हितं त्वामहं त्वामहं त्वामहम्
तद्धितक कुद्धि कुकुत्तत्त तोङ्गुतक किटकिट
कुधरी किटताधितककिटधिङ्गिणतोम् (बाल) ॥ ५॥

सन्ततमन्दरवस्थितं
हृदि सत्यविज्ञानसुखाकृतिम्
अन्तर्यामितयोदितां
योगिचिन्तितमाकलयामि तम्
तत्तधिकिट तत्तां तत्ततिकिट तत्तां तरिकिट तत्तरि
कुध्तोकिट तधोकिट धों धों कुन्द

किटकिट धरि कुकुंदत्त कुकुंधरिकिडेकुडेकु कुंधरि
किडि कक प्रबेधमिह झेकु कुझगण झझण
जयशील नटनम् (बाल) ॥ ६॥

सकलजगदादिं सकलमुनिगीतं
सकलनिगमान्तजनितान्तमतिविदितम्
तं परमयोगिगणविचिन्तितमखण्डसुख-
सम्पदमपारमहिमानमणिमानमिह
रङ्गतुरङ्गमातङ्गवरहंसगति-
मञ्जीरमञ्जुरटन्नटनमखिलरञ्जनम्
तगिन्ध तगिन्ध तकिटधिमि धिमिधिमि तधीतकिट धिमितकिट
धिमितकिट हन्तधीं ताहत्तधीं ताहत्तधिन्नाम्
ताहत्तधीं धिन्ना धिनाहत्तधां धिन्न धिन्ना
धीं ताताधिन्नधीं तद्धिन्न तकधिन्न ताहद्ध
ध्तिन्नं कद्धरिडि कद्धरिडि काहुरे काहुरे
कञ्चरिडि कञ्चरिडि धेहुरे राहुरे (बाल) ॥ ७॥

सङ्गीतसहित्यविद्याविनोदवर
गोविन्द गोपाल गोपीमनोहरे
मतिरस्तु गतिरस्तु मङ्गळं भवतु मम
तद्धिन्त तद्धिन्त तकिट धिमिधिमि धिमित धीतकिट धिमितकिट
गिड्तक तकिट तधिघिणतोम् (बाल) ॥ ८॥

तारकसममुक्तहारकं
भक्तकरुण्यरसपूरधारकं
नारदमुनिक्षेमकारकं धीर
(श्री) नारायणतीर्थ तारकं
तां ताहत तणधां तणां तणधां
तण्णं तण्णताम्
तधिम्मि तद्धिम्मि ताण्डवलोलं

रिंझिरिंझिरिङ्गण राधालोलम्
कुन्दकिटकिट धरिकि गोपिकाजारं
नगधरं धोधित्त नवनीतचोरम् (बाल) ॥९॥

त्वामहं कलयामि धीरमनामयं
सकलकामदं भुवि सन्ततमानन्दताण्डवलोलम्
सद्गुणमणिगणभूषणजालं
सुन्दरगोकुलबालगोपालम्
सत्यप्रतिज्ञसन्तानगोपालं
विख्य्यतसत्कीर्तिविजयगोपालम्
मन्दस्मितानन्दमदनगोपालं
कन्दर्पकोटिकल्याणगोपालम्
भक्तजनबृन्दप्रसन्नगोपालं
सिद्धजनसिद्धान्तसिद्धगोपालम्
मत्स्यावतारादिमहितगोपालं
तं त्वामहं त्वामहं त्वामहम्
तद्धि तगुगु तिगुगु तत्तद्धगुगु तिगुगु तत्त तोङ्गुतक
किटकिट कुतरिकिट तत्तोङ्ग किड्तकिट तकिट तधिगिण तोम्
धै तरिकिट ताहं धित्ता झेझेझ तरिधिकिधिकि धित्ता
धित्तरि धिकिधिर्गुडु धित्ता तधिमितो धिमि
तोङ्किटधित्ता तद्धों तत्तोङ्कि्कट तक्किट
धणध धणध धिमिहिण्णं तळङ्गु धाकधक तधिघिण तोम् (बाल)

✠ ✠ ✠ ✠ ✠

दरु २०

रागम्: नाथनामक्रिया ताळम्: आदि

स्वामिनं विचित्रवनमालिनं पदत्रिराजगामिनम् ।
परिपालित गोधनं भुजगपतिशायिनम् ॥
सदानन्ददायिनं समस्तवेदसाधनम् ।
सनातनं बालगोपालं भजामि[४०] ॥

रे हूरे हूरे रिङ्कण रिङ्घण काहु काहुरे
कञ्झरि कञ्झरि झेकुझेकुरे झणतझकघिण डेकु
डेकुरे डिङ्कुकु डिङ्कुकु डिङ्कुकु रुंझ रुंझ रिहरिटकुमु
रिङ्घण धङ्किट किटतक धिङ्किट किटतक धोङ्किट किटतक
नङ्किट किटतक धहत धहत धिमित धणेरु घतिकिण तोम् ॥

श्लोकम्

स्तुत्वा तं यज्ञपुरुषं यज्ञपत्न्यस्तदाज्ञया ।
पुनः प्रविविशुर्यज्ञशालां तद्गतमानसाः ॥ ९४ ॥
याज्ञीकास्तेऽपि ताः पत्नीः प्रशस्य च पुनः पुनः ।
अङ्गीचक्रुर्भगवतो[४१] माहात्म्याद्गतकल्मषाः ॥

*॥ इति श्रीनारायणतीर्थयतीन्द्रविरचितायां*
*श्रीकृष्णलीलातरङ्गिण्यां*
*श्रीकृष्णगोवत्सपालनवर्णनं नाम*
*तृतीयस्तरङ्गः समाप्तः ॥*

✠ ✠ ✠ ✠ ✠

[४०] भजे
[४१] अभिचक्रुः

# ॥ चतुर्थस्तरङ्गः ॥

## श्रीकृष्णगोपालनवर्णनं

*श्रीकृष्णगोपालनवर्णनाभिनयः क्रियते ॥*

श्लोकम्

गीयते रामकृष्णाभ्यां कृतं गोपालनं ततः ।
नन्दाद्यागमनं पूर्वं ततश्च बलकृष्णयोः ॥ १६ ॥

काळीयमर्द्दनं नागपत्नीस्तोत्रं ततः परम् ।
खरासुरवधश्चाथ प्रलम्बस्य च मर्दनम् ।
दावाग्निभक्षणं बालस्तुतिरत्र निगद्यते ॥ ॥ १७ ॥

*अथ बलभद्रस्यागमनम् ॥*

*दरु २१* [४२]

रागम्: सौराष्ट्रम्     ताळम्: आदि

हली बली च मुसली ललिताङ्गदकुण्डली ।
नीलांबरी श्वेतरूपी बलभद्रो विराजते ॥ ॥

*दरु २२*

*अथ कृष्णस्यागमनम् ॥*

[४२] this *daru* is the same as *daru* 16 except for the *rāgam*

रागम्: नाथनामक्रिया ताळम्: आदि

शङ्खी चक्री गदी पद्मी शार्ङ्गी किरीटकुण्डली ।
श्रीवत्सकौस्तुभी दिव्य पीतांबरो विराजते ॥ ॥

३५ पाहि पाहि जगन् मोहनकृष्ण

# पाहि पाहि जगन्मोहन कृष्ण

रागम्: नाथनामक्रिया ताळम्: चापु

*पल्लवि*

पाहि पाहि जगन्मोहन कृष्ण
परमानन्द श्रीकृष्ण

*चरणम्*

देवकीवसुदेवनन्दन कृष्ण
दिव्यसुन्दर श्रीकृष्ण (पाहि पाहि) ॥१॥

नन्दयशोदानन्दन कृष्ण
इन्दुवदन श्रीकृष्ण (पाहि पाहि) ॥२॥

कुन्दरदन कुटिलाळक कृष्ण
मन्दस्मित श्रीकृष्ण (पाहि पाहि) ॥३॥

किङ्किणीरचित घणंघण कृष्ण
क्रीडालोल श्रीकृष्ण (पाहि पाहि) ॥४॥

कुङ्कुमपङ्कविपङ्किल कृष्ण
गूडमहिम श्रीकृष्ण (पाहि पाहि) ॥५॥

चञ्चलझलञ्झलनूपुर कृष्ण
मञ्जुळवेष श्रीकृष्ण (पाहि पाहि) ॥६॥

तरळितकुण्डलमण्डित कृष्ण
ताण्डवलोल श्रीकृष्ण (पाहि पाहि) ॥ ७ ॥

धिक्कृतसुररिपुमण्डल कृष्ण
दीनपालन श्रीकृष्ण (पाहि पाहि) ॥ ८ ॥

साधुसाधुनटवेष श्री कृष्ण
सत्यसन्ध श्रीकृष्ण (पाहि पाहि) ॥ ९ ॥

पालित नारायणतीर्थ कृष्ण
परमपावन श्रीकृष्ण (पाहि पाहि) ॥ १० ॥

✠ ✠ ✠ ✠ ✠

*गद्यम् २१*

अथ कदाचिदेतौ नन्दकुमारौ निर्मलनिरुपमरजताञ्जन- शिखरि- शिखर- समुत्तुङ्ग दिव्यमङ्गळ- सुन्दराङ्गौ दुर्विनय- दुर्वीर्य- गर्वपर्वत- विषयविपिन- सञ्चारि महासुरमत्तमातङ्गमदोदारकेसरिणौ सन्ततसमुल्लसित- कमलकुशेशय- कुमुद- कल्हारादि- कुसुम- सौरभ्य- सौभाग्यभोगसमुन्मिषदानन्दानुभव दिव्यदर्शनैः हंसकारण्डवसारस- चक्रवाकाद्- विविधविहङ्गमैरनुदिनमुदित- महोत्साहसाहससमृद्ध- समुच्छ्रुङ्खलक- लकलरवावबोधित- निजानन्दावधीरित- ब्रह्मलोकादि- सुखैर्निजतटसमागत- सुरविटपी बृन्दैश्च सन्ततपरिशोभमानायाः काळिन्द्यास्तटभुवि पर्यटन्तौ करकलित- वेणुविषाणवेत्रौ निरवधिक- कृपावलोकनहास- परिहास विलासैर्निजपरिजनानानन्दयन्तौ सकल- लोक- पालकाविह गोपालौ बभूवतुः ॥ ते च गोपबालाः तदीय- लीलविनोदसुधारस- माखण्डमापीयात्यन्त- तृप्ततया समुद्गिरन्त इव भगवतनुग्रहप्रतिबोधितसकलकलास्तदीय- कल्याणगुणानि गायन्तो वनभुवि सुखं चेरुः ॥ तथाहि ॥

३६ कलयत वनभुवि

# कलयत वनभुवि

रागम्: मध्यमावति ताळम्: आदि

## पल्लवि

कलयत वनभुवि कामगतिं
कळभगमनं अखिलात्मरतिम्

## चरणम्

रजतशैलशिखरोपमकायं
रमणीयमिह रामनामधेयम्
सजलजलधरुचिरं गतमायं
सकलवल्लवीजनभागदेयम् (कलयत) ॥ १ ॥

ललिततरमुरळीनादविनोदं
लावण्यरसपूरसरिदास्पदम्
अळिकुलमिळिततुळसीबृन्दमोदं
आनन्दनटनसुन्दरपादम् (कलयत) ॥ २ ॥

दिव्यत्रिभङ्गिललिततरगात्रं
देवादिविरचितनुति पात्रम्
भव्यकरकमलकमनीयवेत्रं
भास्करकोटिप्रभं जनमित्रम् (कलयत) ॥ ३ ॥

सकृदवलोकनकृतजगदण्डं
सरसकुण्डलशोभिमृदुगण्डम्
प्रकटितब्रह्माण्डशतकोटितुण्डं
प्राकृतासुरतिमिरमार्ताण्डम् (कलयत) ॥ ४ ॥

रवितनयातटसुखटितखेलं
रक्षितसकलगोकुलबालम्
नवरसपूर्णगानविलोलं
नारायणतीर्थगीतसुलीलम् (कलयत) ॥ ५ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

गोविन्दानुचराः सर्वे गोविन्दासक्तचेतसः ।
गोविन्दमनुगायन्तो सानन्दं ननृतुर्वने ॥

विना तु बलभद्रेण कृष्णो गोपालकैः सह ।
काळीयस्य ह्रदं गत्वा न्यपतत्तज्जले बलात् ॥

काळीयस्तु ध्वनिं श्रुत्वा क्रोधसंरक्तलोचनः ।
बबद्ध कृष्णं भोगेन ददृशस्तं व्रजौकसः ॥

पश्यत्सु नन्दादिषु गोपिकासु
श्रीकृष्णमेवाखिलमित्रभूतम् ।
तुष्टाव रामः सकलात्मदर्शी
सर्वात्मकं कृष्णमनन्यदृष्ट्या ॥

३७ बन्धनान्मोचय

# बन्धनान्मोचय

रागम्: सारङ्ग ताळम्: त्रिपुट

*पल्लवि*

बन्धनान्मोचय काळीयकृत- (बन्धनान्मोचय)

*अनुपल्लवि*

बन्धनान्मोचयात्मानमनुपम-
बलमनुस्मर तावकमधुना

*चरणम्*

कारणं जगतामघौघ विदारणं हि भवान्
दुरिताशेष शोक महीभार-
वारणाय कृत मानुष श्रीकृष्ण (बन्धनान्) ॥१॥

बालचापलतया तवानघ लीलयालमिह
काळीयविषमाशु विनाशय
कलय गोकुलकल्याणमथ भो (बन्धनान्) ॥ २ ॥

नन्दगोपमहिषी तवेयमनिन्दिनी जननी
नन्दमेनमानन्दय तामपि
नन्दनन्दन सुन्दर श्रीकृष्ण (बन्ध) ॥ ३ ॥

कृष्णतत्वविदा गीतमिति वृष्णिजनमुदे
विष्णुभक्त शिव नारायणतीर्थ-
विरचितं विपुलानन्दमुदितम् ॥ ४ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

रौहिणेयकृतं गीतं श्रुत्वास्फाल्य च काळियम् ।
पातयित्वा जले नृत्यमकरोत्तस्य मूर्धसु ॥ १०२ ॥

*अथ नागपत्नीनामागमनम् ॥*

दरु २३

रागम्: नाथनामक्रिया ताळम्: आदि

आयाति नागतारकदम्बं प्रति
मायाकलित लोककदम्बम् ।
नन्दादियोगिबृन्दचिन्त्यपादं परमा-
नन्दकन्दमाश्रितवेदम् ॥

फणिफणासमर्पितपादारविन्दं नित्य-

मणिमादिभूतितमखण्डित्तनन्दम् ।
कमनीयकाळमेघाभिरामं गोप-
कामिनीबृन्दकलित कामम् ।
नानाविचित्रलीलाविनोदम् श्री-
नारायणतीर्थाभयवरदम् ॥

श्लोकम्
फणेषु तस्य नृत्यन्तं क्षीणशक्तेर्मुहुर्मुहुः ।
भर्तृभिक्षां प्रार्थयन्त्यो नागपत्न्यो जगुर्हरिम् ॥१०३॥

३८ देव कुरु शिक्षाम्

# देव कुरु शिक्षाम्

रागम्: मुखारि  ताळम्: आदि

*पल्लवि*

देव कुरु शिक्षां देहि पतिभिक्षाम्

*अनुपल्लवि*

दीनपरिपालनाय स्वीकुरु दीक्षाम् (देव)

*चरणम्*

आगमैकशरणं अशेषलोककारणं
आहुरागमेन तत्वमानन्दमखण्डितम् (देव) ॥१॥

योगिमतिभूषणाघौघारिशोषण
भोगिशयन भवनभुष पाहि पतितम् (देव) ॥२॥

जातिकुलशरणंअशेषजन्तुधारणम्
जातं भवता कृतमित्यागमविदितम् (देव) ॥३॥

सर्वजन्तुसमता साधु तव विदिता
सर्वबुद्धिषु प्रहिता सा च वेदविदिता (देव) ॥ ४ ॥

अज्ञातवस्तु किमस्ति विज्ञानघनस्य ते
आज्ञापय यदुचितमस्माकं जगत्प्रभो (देव) ॥ ५ ॥

नागपत्नीगीतमिदं नारायणचरितम्
योगिवर नारायणतीर्थ यतिभणितम् ॥ ६ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

एवं स्तुते जगन्नाथे नागपत्नीभिरादरात् ।
नमस्ते देवदेवेति फणी प्राह शनैः शनैः ॥ १०४ ॥

श्रीकृष्णस्तं परित्यज्य सागरं गच्छ निर्भयः ।
मत्पादचिन्नितफणैरित्युक्त्वा गोकुलं ययौ ॥ १०५ ॥

समं गोपबालैर्महत्ताळबृन्दं
क्रमेण प्रविष्टौ खरान्संहरन्तौ ।
विचित्राश्च गाश्चारयन्तौ चरन्तौ
फलैस्तोषयामासतुर्गोपबालान् ॥ १०६ ॥

खरासुरवधं कृत्वा खगाधिपतिवाहनः ।
निरायासः परानन्तो रमते नन्दनन्दनः ॥ १०७ ॥

*गद्यम् २२*

तमेनमासुरकुलकदळीवनोन्मूलकेळिकलाकुशलकलपमूर्तिधरं नन्दकुमारं सर्वे च गोपालाः संपूर्णमनोरथाश्चेत्थं प्रार्थयामासुः ॥

३९ राम सखे कृष्ण सखे

# राम सखे कृष्ण सखे

रागम्: कांभोजि ताळम्: त्रिपुट

*पल्लवि*

राम सखे कृष्ण सखे

*अनुपल्लवि*

रमणीयगोकुलमथ यामः (राम)

*चरणम्*

कमलबन्धुरिह कमलमनुपतति
कमलिनी मलिनेव विभाति
कुमुदबन्धुरपि कुमुदमनुसरति
कुमुदिनी च परं परिहसति ॥१॥

शशधरं शनकैरनुपश्यति
शर्वरी वनिता निजकान्तम्
वचमुपैति वनिताझषबृन्दं
वाममन्मथदाशस्य मन्दम् ॥२॥

अळिकुलं कमलोदरमिळितं
अलघुगीतरसामृतभरितम्
कलय गोधनमिह तु समुदितं
ललितवेणुरवेण त्वरितम् ॥३॥

रक्तचन्दनलेपनलोला
रागिणी पश्चिमाभाति बला
मुक्तलज्जेव मुहुरतिचपला
मुञ्चति वीटिकारसमबला ॥४॥

चक्रवाकयुगळञ्च विगळितं
चारुनीरनिरन्तरमिळितम्
वक्रकण्ठ विगळितरवललितं
वनजबृन्दमधुनैव मुकुळितम् ॥५॥

वारुणीसेवनादब्जमित्रं
वारुणं नीतवान्निजगात्रम्
तारकामलनिजदन्तकान्त्या
तामसी हसतीति विचित्रम् ॥ ६ ॥

शृण्वता गोपबालगीतं
श्रीधरेण गोकुलमायातम्
तृणचरानुसरेण समुदितं
धीर नारायणतीर्थ भणितम् ॥ ७ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

उषित्वा गोकुले रात्रौ बलेन सहितः सुखम् ।
उषयुत्थाय गोविन्दश्चोदयामास गा वनम् ॥ १०८ ॥

अद्य भाण्डीरकं नाम वनं यामो वयं मुदा ।
इत्याह भगवान् बालान् बलञ्च बलिनां वरम् ॥ १०९ ॥

४० राम राम विचरामो

# राम राम विचरामो

रागम्: सावेरि ताळम्: आदि

*पल्लवि*

राम राम विचरामो वयं
रम्यभाण्डीरकं वनमधुना

*अनुपल्लवि*

राम रविकिरणदूरं रमणीयसरोवरबहुळम् (राम)

*चरणम्*

चन्द्रकान्तोपलमणिवालुकं
चारुतरझरीसुन्दरसलिलम्
चन्दनचंपकमन्दार-
छायातिमिरसूर्यमणिजालम् (राम) ॥ १ ॥

उन्नततरुषु समुन्नतबलवत्-
पन्नगरिपुमुखा निह्नुतविहगाः
उन्मत्ता इव सन्नद्ध युधि
मन्यन्ते मुहुरिह खलु योद्धुम् (राम) ॥ २ ॥

नन्दनं वनमेतदुपमितं
नानारसफलैरभिमधुसुधया
मन्दमारुतस्पन्दनविगळित-
मन्दारादिश्रीचन्दनकुसुमैः (राम) ॥ ३ ॥

मुक्ताफलसममुद्रितवल्ली-
सक्तमधुव्रतशंसितविभवम्
त्यक्ताशंसद्दिवि वनमेतत्
चेतः स्पृहयति दिव्यवधूनाम् (राम) ॥ ४ ॥

स्वर्गारोहणसोपानपङ्क्तिरिव
सुरलोकावधिसुन्दरविटपाः
निर्गळितोपममतिरमणीयं
निह्नुतसकलसंतापविभूति (राम) ॥ ५ ॥

बन्धुप्रिय इव बन्धूनयमिह
संद्दत्ते खिल सादरमस्मन्
मन्दस्मेरसुधामधुसेचन-
मङ्गळपूर्वमहो वनदेशः (राम) ॥ ६ ॥

नारायणभणितं रमणीयं

धीरोदातगिरा बलभद्रम्
घोराघौघनिवारणमेतन्-
नारायणतीर्थार्य सुघटितम् ॥ ७॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

गायं गायं वनमथ शनैर्गोपबालैः समेतो
देयं देयं करतलमिति प्रीतिदस्ताडयंस्तत् ।
पायं पायं सरसवचनाह्लादपीयूषधारां
सोऽयं मायी विहरति मुहुर्वादयन्वेणुमीशः ॥ ११०॥

क्रीडामारब्धवान् कृष्णो जयशीलान् पराजिताः ।
स्कन्धे वहन्ति यस्यां तां बालकैः सह संभ्रमात् ॥ १११॥

प्रलम्बो नाम गोपालवेषधारी महासुरः ।
पराजितो रौहिणेयं स्कन्धेनोढ्वा पलायितः ॥ ११२॥

सङ्केतस्थानमुल्लङ्घ्य पलायनपरो बलः ।
मां नयत्येष किं कार्यं वद कृष्णेत्यभाषत ॥ ११३॥

वीर्यमावेदयन् कृष्णो बलभद्रस्य धीमतः ।
इदमाह महावीर्यमार्यं बलसमुन्नतम् ॥ ११४॥

४१ तावकं परभावम्

# तावकं परभावम्

रागम्: कापि  ताळम्: आदि

*पल्लवि*

तावकं परभावमनुस्मर ताम्

*अनुपल्लवि*

सेवक सङ्कल्प सिद्ध तनो पर-
दैवत नरभावभावनयालम् (तावकं)

*चरणम्*

स्मर तवातुलबलमतिवीर्यं
साहसञ्च बलभद्र गांभीर्यम्
नरवपुर्धरसुरमिमं जहि
नगवराधिकधैर्यदुर्वीर्यम् (तावकं) ॥१॥

अघटितं घटयति तव माया
अखिललोकजननी
विघटितभवबन्धमूलमोह विशुद्ध-
विपुलबोधानन्दरसघन जय भो (तावकं) ॥२॥

खेलन समयो नायमिह
बल नीलांबर तव भो
तालपताक ताडय कुटिलं
तव खेलनमित्रममरशत्रुभृत्यम् (तावकं) ॥३॥

लोकबन्धुभणितमेतदाश्रित-
शोकमूलहरणम्
भक्त संसिद्धिसाधकश्रीहरि-
भक्तनारायणतीर्थाभरणम् (तावकं) ॥४॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

जघान बलभद्रस्तं श्रीकृष्णेन प्रचोदितः ।
प्रलम्बं मुष्टिना मूर्ध्नि प्रलम्बो निपतात च ॥११५॥

अघासुरबकासुरप्रमुखकंसदूतासुराः
हतास्तु हरिणा गुणव्यतिकरप्रसूतः खलाः ।

वने विचरता घने वकुळमञ्जरीपुञ्जके
स्रवन्मधुझरीचरन्भ्रमर[43]कमविद्यागुरौ ॥ ११६ ॥

दृष्ट्वा दावानलं बालाः कृष्ण कृष्णेति चुक्रुशुः ।
गृहीत्वाञ्जलिना कृष्णो दावानलमभक्षयत् ॥ ११७ ॥

जीर्णो दावानलो यस्य जाठरेण महात्मना ।
बालास्तमस्तुवन् कृष्णं वेदान्तैर्यस्तु लक्ष्यते ॥ ११८ ॥

श्रीगोपालकमेकमेव परमं दैवं सदा मानये
श्रीवत्साङ्कितवक्षसं श्रितजनाधारं समाराधये ।
आम्नायान्तसरोजहंसमखिलानन्दात्मकं शाश्वतं
कुक्षिस्थाखिललोकरक्षकममुं गीर्वाणगेयं प्रभुम् ॥ ११९ ॥

४२ श्रीगोपालकमेकमेव

# श्रीगोपालकमेकमेव

रागम्: कल्याणि तालम्: झंप

## *पल्लवि*

श्रीगोपालकमेकमेव दैवतं हृदये

## *अनुपल्लवि*

आगमारविन्दबृन्दहंसमाकलये (श्रीगोपालक)

## *चरणम्*

निजजनस्वर्गापवर्गनित्यादातारं
अजमव्ययमादिदेवमनुपमाचारम्
विजयसारथिमशेषविदुषामाधारं
भुजबलनिर्जितवैरिभूपालशूरम् (श्रीगोपालक) ॥ १ ॥

[43]मधुप

सर्वलोकैकशरण्यचरणारविन्दं
दुर्विनीतमदभङ्गदोर्दण्डबृन्दम्
निर्विशेषनिरन्तरनिर्मलानन्दं
गीर्वाणगन्धर्वकोटिगीतगोविन्दम् (श्रीगोपालक) ॥ २॥

रक्षितसर्वभुवनलक्षणमेकं
पक्षिराजवाहं विपक्षशिक्षकम्
कुक्षिगतजगदण्डकोटिधारकं
अक्षीणगोकुलनिवासलक्ष्मीनायकम् (श्रीगोपालक) ॥ ३॥

नारदादिमुनिगेयनामधेयकं
नामरूपनिर्वाहकमरूपमनामकम्
वारिजासनादिविनुतं निवारितशोकं
नारायणतीर्थानन्ददायकम् (श्रीगोपालक)॥ ४॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

इत्थं गोपालकैर्गीतो भगवान् भक्तकामदः ।
गोभिर्गोपालकैः कृष्णो गोकुलं पुनरागतः ॥१२० ॥

*॥ इति श्रीनारायणतीर्थयतीन्द्रविरचितायां*
*श्रीकृष्णलीलातरङ्गिण्यां*
*श्रीकृष्णगोपालनवर्णनं नाम*
*चतुर्थस्तरङ्गः समाप्तः ॥*

# ॥ पञ्चमस्तरङ्गः ॥

श्रीकृष्णगोपीवस्त्रापहारगोवर्धनोद्धारवर्नणं

*श्रीकृष्णगोपीवस्त्रापहारगोवर्धनोद्धारवर्णनाभिनयः क्रियते ॥*

श्लोकम्

गोपीवस्त्रापहाराख्यं चरित्रमभिनीयते ।
गोवर्धनाद्रेरुद्धारः चरितं हरिणा कृतम् ॥१२१॥

पादप्रवेशस्तु पुनर्नन्दो गोप्यस्ततः परम् ।
बलकृष्णौ ततः कृष्णकृतं वस्त्रापहारणम् ॥१२२॥

उद्धृत्य रक्षिते चास्मिन् गोकुलेऽद्रिं कृता स्तुतिः ।
इन्द्रेण कामधेन्वा च कृष्णस्यात्रैष सङ्ग्रहः ॥१२३॥

निदम्बिनीगणं ह्रदे दिगम्बरं विलोक्य त-
द्वराम्बरं बहिःस्थितं कराम्बुजे समुद्वहन् ।
बहून्नते तटद्रुमे महोन्नतो हरिः स्थितो
वदन्विचित्रनर्म तं हसन्नगायदेदृशम् ॥१२४॥

बद्ध्वा दुकूलं शाखाग्रे कुतूहलितया हरिः ।
वल्लवीवल्लभः कृष्णो हसन्निथमुवाच ताः ॥१२५॥

४३ आयहि व्रजयुवतीबृन्द

## आयाहि व्रजयुवतीबृन्द

रागम्: केदारगौळ ताळम्: आदि

*पल्लवि*

आयाहि व्रजयुवतीबृन्द त्वरया
मा याहि सलिले दूरम्

*अनुपल्लवि*

आयासो मा भवतु अलमधुना तव
तोयक्रीडया परया (आयाहि)

*चरणम्*

परिणामविरसफलोदयकर्मणि
पाटवमतिवितथम्
परिणामविरहितपरमपुरुषमेव
भज जगदेकनाथम् (आयाहि) ॥१॥

परिगृहाण भुवनबाह्यदृगावरणं
परिहरसि वृथा कथम्
परमबान्धवस्तव प्रकटमेव वदति
परिहर खेलनबन्धम् (आयाहि) ॥२॥

आनन्दमयभवने तव जननी
सानन्दमनुसरति
मायातीतवपुषं माधवमेव जनकम्
मानय मानय सति (आयाहि) ॥३॥

हरिविरचितपरिहासकथारस-
गौरवसंस्मरणम्
गुरुभक्तशिवनारायणतीर्थकृतमिदं
गोविन्दजनभूषणम् (आयाहि) ॥४॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

गोविन्दं गोपिकानन्दं वदन्तं शर्मनर्म ताः ।

पुन्नागविटपाग्रस्तं पुण्यपुञ्जफलोदयम् ॥१२६॥

भक्तानुग्रहसव्यग्रगृहीताद्भुतविग्रहम् ।
इत्थं गोप्यो जगुः कृष्णं कण्ठदघ्नजले स्थिताः ॥१२७ ॥



# श्रीकृष्ण तावक महिमा

रागम्: पुन्नागवराळि ताळम्: आदि

*पल्लवि*

श्रीकृष्ण तावकमहिमा केन भण्यते

*अनुपल्लवि*

लोकालोकनावरणं लोकेश देहि नौमि ते

*चरणम्*

पुन्नागराजाधिरूढ पुरुषोत्तम
उन्नतवंशविस्तार छिन्नपापखण्डित श्रीः (श्रीकृष्ण) ॥१॥

शाखाग्रलक्ष्यसद्विग्रह शं विधेहि भो
शोकसागरादुद्धर मां शुद्धभावं दर्शय भो (श्रीकृष्ण) ॥२॥

नन्दयशोदानन्दन नळिननाभ
सुन्दरहासविलाससूचितैरलं विमलाभ (श्रीकृष्ण) ॥३॥

सर्वकामादिगुण सर्वपलन
शर्वरीनायकानन शातकुम्भवर्णवसन (श्रीकृष्ण) ॥४॥

गोविन्द किं करवाम गोपपालक
नव्यगोपीगीतमिदं नारायणतीर्थ रचितम् (श्रीकृष्ण) ॥५॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

गोपीभिः प्रार्थितस्त्वेवं गोविन्दो भूर्यनुग्रहम् ।
कुर्वाणस्तासु संवादं भूयोप्यकृतसादरम् ॥१२८॥

४५ आवरणं मम नहि ते दातुम्

# आवरणं मम नहि ते दातुम्

रागम्: धन्याशि ताळम्: आदि

श्रीकृष्णः आवरणं मम नहि ते दातुं
भावय गोपवधूजनबृन्द ॥

गोप्यः देव यदावरणं मम नीतं
देहि विभो भवता तदनन्त ॥

श्रीकृष्णः नीतं नैव मया परकीयं
नैव ममावरणं निजदृष्ट्या (आवरणम्)॥

गोप्यः आह गृहाण भवानिति पूर्वं
देहि तदावरणं मम बन्धो ॥

श्रीकृष्णः अक्षि निमीलनमेवमयोक्तं
साक्षादिह तु गृहाणावरणम् ॥ (आवरणम्)

गोप्यः लोकालोकनविहितावरणं
लोकेश्वर मम देहि समुदितम् ॥

श्रीकृष्णः लोकस्यावरणं न विधातुं
लोके कोऽपि समर्थः पुरुषः ॥ (आवरणम्)

गोप्यः कश्चन नालोकयति यथास्मान्
कलय तथाविधमेवावरणम् ॥

श्रीकृष्णः लोक्यो नालोकयति हि लोके
नालोक्यं कश्चन कमपि विरोधात् ॥ (आवरणम्)

गोप्यः लोक्या एव वयं परभोग्याः
लोकेशावरणं तु विधेहि ॥

श्रीकृष्णः तर्हि तदावरणैरवलम्बैः[४४]
तस्य न किञ्चिदलोक्यमिहास्ति ॥ (आवरणम्)

गोप्यः किं नहि लौकिकसिद्धावरणं
किं नो वयमिह लज्जाभरणाः ॥

श्रीकृष्णः युक्तिसहं नहि भवदावरणं
योगिभिरिति मीमांसितमबलाः ॥ (आवरणम्)

गोप्यः अस्माभिर्न विधेयं किमपि
ह्यपगतमच्युत तद्वद भगवन् ॥
शिव नारायणतीर्थ सुगीतं
श्रीहरिगोपीजनसंवादम् ॥ (आवरणम्)

✠ ✠ ✠ ✠ ✠

श्लोकम्

आबाल्यमेतद्युष्माकमबलाः केवलम् मतम् ।
उभाभ्यामेव हस्ताभ्यां गृह्णन्तु वसनानि वः ॥१२९॥

इत्युक्त्वा वसनान्यासां दत्वा गोपालकैः सह ।

[४४]अलमल्पैः

अवरुह्य तरोः कृष्णः प्रययौ स्वगृहं मुदा ॥१३०॥

इन्द्रयागसमारम्भं नन्दादीनां विलोक्य सः ।
ऐश्वर्यं ख्यापयन् स्वीयं नन्दमाहेदमच्युतः ॥

४६ इन्द्रयागसमारंभ

# इन्द्रयागसमारंभ

रागम्ः कांभोजि ताळम्ः चापु

*पल्लवि*

इन्द्रयाग समारम्भसंभ्रम-
मिह तु मुदा मन्ये

*अनुपल्लवि*

चन्द्ररविपावकमुखसुरवर-
परिगणितविभूतिरयं हि तात (इन्द्र)

*चरणम्*

सकललोकजनकं सकलागम-
सम्बोधितमहिमानमनिन्द्रम्
प्रकटितजगदण्डकोटिवदनमिह
साक्षादेव विहाय महेन्द्रम् (इन्द्रयाग) ॥१॥

वनचरा हि वयं वनपर्वत-
वर्द्धिताब् हुवि वनमेतदधुना
अनुपमान्नरसादिभिरचलेन्द्रं
अनुपममाराधयामो विधिना (इन्द्रयाग) ॥२॥

गिरिवनसरिदमरनरखगादिषु
परिपूर्णबोधरसमागमविदितम्

हरिमिह गोवर्धनगिरिवरयुत-
मच्युतमेव भजामोऽविरतम् (इन्द्रयाग) ॥ ३ ॥

नन्दनन्दनगीतमिदं भुवि
नन्दगोपहितं मुहुरधुना
नन्दयोगि विचिन्तितमनु शिव-
नारायणतीर्थकृतमिति विधिना (इन्द्रयाग) ॥ ४ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

गोवर्धानगिरेः पूजां गोविन्दवचनादरात् ।
चक्रुर्नन्दादयस्तूर्णं सवनस्य गवां तथा ॥ १३२ ॥

*अथ देवेन्द्रागमनम् ॥*

*दरु २४ ॥*

रागम्: नाथनामक्रिया  ताळम्: आदि

सहस्रामरसेवितः सहस्राक्षः शतक्रतुः ।
सहस्रगोत्रभिद्वज्री शचीनाथो विराजते ।

श्लोकम्

क्रुद्धस्य तस्मादिन्द्रस्य ववृषु सततं घनाः ।
गोकुलं व्याकुलं तस्मात् विलोक्य धृतवान् गिरिम् ॥ १३३ ॥

छत्रीकृतगिरिराजे रक्षितगोपालगोधनसमाजे ।
गोविन्दे तमनन्तं भक्त्या गोप्यो जगुः परं तुष्टाः ॥ १३४ ॥

# गोवर्धनगिरिधर

रागम्: मुखारि     ताळम्: आदि

## *पल्लवि*

गोवर्धनगिरिधर गोविन्द
गोकुलबालक परमानन्द

## *अनुपल्लवि*

श्रीवत्साङ्कित श्रीकौस्तुभधर
भावकभयहर पाहि मुकुन्द (गोवर्धनगिरिधर)

## *चरणम्*

पुरुहूतमखविघातसुचतुर
पुरुषोत्तम पूरितजगदुदर
मेरुभूरिधैर्याघविदूर
मीनकेतुशत कोटिशरीर (गोवर्धनगिरिधर) ॥१॥

अमितकल्याणगुण अगणितलील
अपरिमितनन्दघन नन्दबाल
शमितदैत्यदम्भ शान्त्यादिमूल
विमलमानसवृत्तिनिवसनशील (गोवर्धनगिरिधर) ॥२॥

वहतो जगदण्डकोटिस्तवेदं
वरद किमद्भुतमचलेन्द्रवहनम्
महनीयकीर्तिमावहसि देहि मुदं
माघवनं मदमपनयसि घनम् (गोवर्धनगिरिधर) ॥३॥

आनन्दामृतवारिधिखेल
अलघुपराक्रम अनुपमलील

श्रीनन्दात्मज श्रितजनपाल
श्रीकरकिसलयलालनलोल (गोवर्धनगिरिधर) ॥ ४ ॥

पाटितसुररिपुपादप बृन्द
पावनचरित परमानन्द
नाट्यरसोत्कटनानाभरण
नारायणतीर्थार्चित चरण (गोवर्धनगिरिधर) ॥ ५ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

रक्षिते गोकुलजने हरिणा गिरिधारिणा ।
लज्जाभरानतशिराः सुरराजोऽभवत्तदा ॥ १३५ ॥

निवृत्ते मेघसङ्घाते स्वस्ते गोकुलवासिनि ।
स्थापिते च गिरौ कृष्णमिन्द्रः स्तौतीति सादरम् ॥ १३६ ॥

*इन्द्र उवाच ॥*

श्लोकम्

श्रीगोपालकृपानिधे करुणया स्वामिन्मयाऽनुष्ठितं
क्षन्तव्यं भवतापराधशतकं यद्यत्क्षणे तत्तदा ।
आदित्यादिसमस्तदेवनिवहो यस्याज्ञया वर्तते
स त्वं सात्वतपुङ्गवः श्रुतिशिरोवाग्गोपिकावल्लभः ॥ १३७ ॥

४८ मामकापराधशतम्

## मामकापराधसशतम्

रागम्: तोडि (शङ्कराभरणम्) ताळम्: त्रिपुट

*पल्लवि*

मामकापराधशतं क्षम्यतां त्वया

*अनुपल्लवि*

मामकापराधशतं मा गणयाथवायुतम्

श्यामवर्ण शमान्वित शाश्वतानन्दसन्दोह (मामकापराधशतं)

*चरणम्*

अत्यन्तकृपासागर आदिपुरुषानाधार
नित्यद जगदाधार निह्नुतासुर
श्रुत्यनन्तवनसञ्चार शोभनफलदाचार
भृत्यदयाधृताकार भ्रमकारणविदार (मामकापराधशतं) ॥ १ ॥

कामशतकोटिवेष खण्डितनिखिलदोष
दामोदरोदारभाष दासपोष
कमलाकृताभिलाष कामनाकलिताशेष
सामगीताश्रिताशेषसाधुजनसन्तोष (मामकापराधशतं) ॥ २ ॥

आदित्यचन्द्रमण्डलाभ्यन्तराधार निर्मल
बोधरूपानन्दाचल पोषिताखिल
वेदपुराणादिमूल वेणुगानक्रीडालोल
सुन्दरतरगोकुलश्रीधरनाथ गोपाल (मामकापराधशतं) ॥ ३ ॥

धाराधराकार धीर घोरारिसम्हार शूर
नीरजनाभ निरुपम निर्मलानन्द-
पारावार श्रीविहार पापतिमिरभास्कर
नारायणतीर्थसन्तार नानागमान्तसञ्चार (मामकापराधशतं) ॥ ४ ॥

✠ ✠ ✠ ✠ ✠

*गद्यम् २३*

इन्द्रसहायार्थमागता कामधेनुः स्वकीयक्षीराभिषेकपूर्वकं श्रीकृष्णमिदमाह ॥

श्लोकम्

नन्दकुमारकमनघं नौमि परानन्दमखिलवन्द्यम् ।
सुन्दरसरसिजनेत्रं मन्दस्मितसान्द्रचन्द्रिकाचन्द्रम् ॥१३८॥



# नन्दनन्दन गोविन्द

रागम्: सावेरि ताळम्: त्रिपुट

*पल्लवि*

नन्दनन्दन गोविन्द (कृष्ण) नौमि ते पदम्

*अनुपल्लवि*

मन्दरभूधरोद्धार मदनगोपालकृष्ण (नन्दनन्दन)

*चरणम्*

सरससुन्दरहास समुदितनिजभास
निरसितान्धतमस नित्यानन्दरस (नन्दनन्दन) ॥१॥

अपरिमितकरुण असुरबृन्दनिर्हरण
तपनीयाम्बराभरण दासपोषण (नन्दनन्दन) ॥२॥

कलितकस्तूरीतिलक कमनीयफालफलक
ललितत्रिवलिपुळक लक्ष्मीपालक (नन्दनन्दन)॥३॥

कौस्तुभशोभितकण्ठ कलितश्रीवैकुण्ठ
विस्तीर्णदयोत्कण्ठ विधितश्रीकण्ठ (नन्दनन्दन) ॥४॥

हरिहयमणिनील हाटकमणिकुण्डल
नारायण लीलनन्दिताखिल (नन्दनन्दन) ॥५॥

गोपरमणीनयन कुमुदचन्द्रवदन
तापसमानसशयन तापनाशन (नन्दनन्दन) ॥६॥

शरणागतहितार्थ शम्सक नतपार्थ
वर नारायणतीर्थ- वर्यपुरुषार्थ (नन्दनन्दन) ॥ ८ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

स्तुत्वा सुरेन्द्रः श्रीकृष्णं विज्ञाप्य ज्ञातकौशलम् ।
आज्ञातो लोकगुरुणा धेन्वा सह दिवं गतः ॥ १३९ ॥

*॥ इति श्रीनारायणतीर्थयतीन्द्रविरचितायां*
*श्रीकृष्णलीलातरङ्गिण्यां*
*श्रीकृष्णगोपीवस्त्रापहारगोवर्धनोद्धारवर्णनं नाम*
*पञ्चमस्तरङ्गः समाप्तः ॥*

# ॥ षष्टस्तरङ्गः ॥

श्रीकृष्णगोपीसमागमन वर्ननं

*श्रीकृष्णगोपीसमागमनवर्णनाभिनयः क्रियते ॥*

श्लोकम्

बृन्दावनेऽथ श्रीकृष्णगोपीसङ्गोऽभिनीयते ।
आदौ गोप्यस्ततः कृष्णो गोपीनां कृष्णसङ्गमः ॥१४०॥

गोपीश्रीकृष्णसंवादस्ततो गोपीपरिग्रहः ।
षष्टेस्मिन् सङ्ग्रहस्त्वेवं रासारंभो निगद्यते ॥१४१॥

शारदेव शरदागता स्वयं तारकोदयविशेषभासुरा ।
वारितेषु सलिलेषु धीमतां स्मारितार्थमिव भासयन्त्यसौ ॥१४२॥

*गद्यम् २४*

तत्र भगवति श्रीनिवासे परिपलित निजदासे सन्ततानन्दकल्याणगुणगण- नवरत्नरत्नाकरे सरळ- मुरळीनादसमुदञ्चितविविधगीत- समुद्घोष- मन्द- गमनोल्लास- विविधलीलाविलास- बहुतरकल्लोलजाले भुवनसुन्दरे श्रीकृष्णे विहरति तस्मिन् व्रजयुवतीमनोनद्यः स्यन्दमानाः समभिव्यक्तशारद- विमली- कृत- वृत्ति- विशेषानुभाव- रसाढ्याः तदैकरस्यमभिलषन्त्यः सत्वरमाविविशुः ।इत्थं च तासां वचोविलासाः प्रादुर्भूवुः ॥

५० परमपुरुषमनुयाम

## परमपुरुषमनुयाम

रागम्: केदारगौळ (तोडि) ताळम्: आदि

*पल्लवि*

परमपुरुषमनुयाम वयं सखि (प)

*अनुपल्लवि*

सुरुचिरहासं सुन्दरनासं

तरुणारुणकिरणाधरसरसम् (परमपुरुषं)

*चरणम्*

नन्दकुमारं नगवरधीरं

बृन्दावनभुवि विविधविहारम्

बृन्दारकगण वन्दितचरणार-

विन्दं मिळितमणिमधुकर निकरम् (परमपुरुषं) ॥ १ ॥

भावुकशरणं भवसन्तरणं

भव्यसेवकजनभाग्यवितरणम्

अव्ययविमलविभूति विजृम्भित-

दिव्यमणिरचितविविधाभरणम् (परमपुरुषं) ॥ २ ॥

परमोदारं पापविदूरं

स्मरसायकस्रग्धरमतिचतुरम्

विरचितमुरळीगीतरसामृत-

भरितघनं घनकौस्तुभ हारम् (परमपुरुषं) ॥ ३ ॥

युवतीगीतं योगिसुललितं

कविजनमानसकमलविलसितम्

शिव नारायणतीर्थ विरचितं

श्रीगोपालदयारसमिळितम् (परमपुरुषं) ॥ ४ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

भो भो व्रजपुरनार्यः शारदसमयं परं शिवं मत्वा ।

कृपया तस्य भजामो प्राहुरिति तदान्योन्यम् ॥१४३॥

५१ शङ्के शङ्करं शारदसमयम्

# शङ्के शङ्करं शारदसमयम्

रागम्: कल्याणि (सारङ्ग) ताळम्: त्रिपुट

*पल्लवि*

शङ्के शङ्करं शारदसमयं
पङ्केरुहपरागविभूतिधवळम् (शङ्के)

*चरणम्*

पापपङ्कशोषणपटुतरकिरणं
परिहृतापरिमितघनघनावरणम्
कपटकेतकीकुसुमभारविरहितं
कलिततारकगणस्फटिकाक्षाभरणम् (शङ्के) ॥१॥

परमपुरुषसुरतिपतिकामविदूरं
पण्डितमण्डलपरमाह्लादकरम्
परमहंसगतिविघ्नपाटनचतुरं
परशुकसमुदितफलविधातारम् (शङ्के) ॥२॥

निर्मलरसपूरनिरुपमगाङ्गं
निखिलमानिनीजनमानविभङ्गम्
शर्मदशशिधरसरसोत्तमाङ्गं
समुदितगोविन्दकृत बहुसङ्गम् (शङ्के) ॥३॥

इति गोपवधूगीतमिदमतिललैतं
ईशोपमशारदसमयविलसितम्
यतिवरशिव नारायणतीर्थ भणितं

यादवाब्धिजरत्नसम्मिळितम् (शङ्के) ॥ ४॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

इति प्रलपति व्रजे शरदि गोपिकामण्डले
सुधाकिरणमण्डले परिहृतान्धकारे निशि ।
पराक्प्रवणमानसाः स खलु कृष्णसाराः स्फुटं
मुरारिमुरळीरवः समुदिताः समाकर्षति ॥ १४४॥

कापि गोपी परं कान्तं कामचार फलोदयम् ।
गन्तुकामेतरा गोपीस्तवयन्तीदमाह तु ॥ १४५॥

५२ बृन्दावनमधुना मन्ये

# बृन्दावनमधुना मन्ये

रागम्: मुखारि (पुन्नागवरळि)  ताळम्: त्रिपुट्

*पल्लवि*

बृण्दावनमधुना मन्ये सखि
बृहदारण्यमहम्

*अनुपल्लवि*

सुन्दरतरवंशनादसंसूचित-
स्वानन्दबोधामृतमयपुरुषम् (बृन्दावनमधुना)

*चरणम्*

उन्नतशाखाग्रसदानन्द-
निर्णयरसपूरफलभारम्
पुण्यवतामतिरमणीयं अमरेन्द्र-
वर्णितभूमपदं भवपारम् (बृन्दावनमधुना) ॥ १॥

मुनिवरपरिसेवितं मोहविराम-
मूलमशेषविशेषास्पदम्
अनिकेतनिकेतनमखिलशोकहरं
अनुदयलयपरतरसिद्धफलदम् (बृन्दावनमधुना) ॥ २॥

सकृदिदमवलोकितं सम्यगिह
स्वसुतकळत्रादिधनविरसम्
प्रकटयति परमहंससामकुलं
अमलमानसवृत्तिविलसित सरसम् (बृन्दावनमधुना) ॥ ३॥

परिहृतरिपुवर्गं परमयोगि-
परिपूर्णभावविशेषोदयम्
हरिपरभावनया गोपिकागीदमिति
भणितं नारायणतीर्थ यतिना (बृन्दावनमधुना) ॥ ४॥

✠ ✠ ✠ ✠ ✠

## *गद्यम् २५*

इत्थमन्योन्यस्नेहदयारसस्यन्दनद्रवीकृतचित्तवृत्ति- विलासोल्लासित विविधवाग्विलासवत्यो गोकुलपुरवरयुवत्यो गोविन्दं बृन्दावनसमुसञ्चितविपुलतर- लक्ष्मीविलास लास्यरङ्गस्थलायमान- रम्यवक्षोविशालफालादि- सुन्दरसर्वाङ्गं स्वकान्तमालक्ष्य मदनमहीपति- कार्मुख- महामेघ- समुद्गळित- शरवर्षधारा इव निबिडतरबृन्दारण्य- निकूटं नवनीतमुषं समासाद्य सकल- लोकाभीष्ट- फलं फलयन्तं विश्वम्भरमिव वर्षधाराः श्रुतय इव श्रोत्रियं समधिगताः सत्वरमाजग्मुः ॥ नयनोत्पलानि च तस्मिन् श्रीनिवासे प्रसारयामासुः ॥

श्लोकम्

ज्ञात्वा हरिः स्थिरं भावं परस्मिन् पुंसि योषिताम् ।
आविष्करिष्यन् गोविन्दस्तासां प्राहेतमादरात् ॥ १४६॥

# वल्लवाङ्गना मा कलयत

रागम्: शङ्कराभरणम्     ताळम्: त्रिपुट

## *पल्लवि*

वल्लवाङ्गना मा कलयत धर्मोल्लङ्घनम्

## *अनुपल्लवि*

वल्लवाङ्गना निजवल्लभपदयुग-
पल्लवसेवनमेव परो धर्मो (वल्लवाङ्गना)

## *चरणम्*

कुलशीलमर्यादाकुळीरादिजालं
कोपसंतापादिनिबिडकल्लोलम्
अलमिह संसारजलधिमागमकृत-
कुलधर्मसेतुरथ तारयति बहुळम् (वल्लवाङ्गना) ॥१॥

रहसि निशि वने किं रमणीयचरणं
महनीयगृहपतिमपहाय तरुणम्
सहसा परमपुरुषानुसरणेनालमिह
गृहपतिमिह यात गृहिणी शरणम् (वल्लवाङ्गना) ॥२॥

गुरुबन्धुजनावज्ञाकुत्सिताचारं
परिहरत कुरुत परपरिहारम्
त्वरयैव गृहमनुयात पातकबुद्धिं
अरिवर्गमपि परिहरत निस्सारम् (वल्लवाङ्गना) ॥३॥

परिपूर्णबोधैकरसमखिलसारं
परमपुरुषमनुसरत गोपबालम्
गुरुवरकरुणासुधामुदञ्चित-

शिव नारायणतीर्थ यतिगीतमतुलम् (वल्लवाङ्गना) ॥ ४ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

श्रवणाञ्जलिभिर्गोप्यो गोविन्दवचनामृतम् ।
पीत्वापि जातिस्वाभाव्यात् लज्जाभारभरैः स्थिताः ॥ १४७ ॥

पुनः पुनर्बोधयन्तं धर्मसारगिरा हरिम् ।
ऊचुर्गोप्यो हरेस्तत्वं व्यञ्जयन्त्यो यथागमाः ॥ १४८ ॥

५४ शरणं भव कृष्ण

# शरणं भव कृष्ण

रागम्: नाथनामक्रिया ताळम्: आदि

### *पल्लवि*

शरणं भव कृष्ण संसरताम्

### *अनुपल्लवि*

करुणा तव संस्मरणपयोधि सं-
तरणी त्वामनुभवतामस्माकम् (शरणम्)

### *चरणम्*

नूनं त्रिभुवनगृहिणीपतिरिति
गानं महतामनुसंविदितम्
श्रीनन्दात्मजश्रीवसुधाधिपा-
नन्दं त्वामनुयामोऽविरतम् (शरणम्) ॥ १ ॥

आरंभणमिह जगदि फलावधि
धीरमुनिभिरिह निश्चितमखिलम्

भूरिकृपालयमाहुरिहागम-
सारं त्वामखिलात्मकममलम् (शरणम्) ॥ २॥

कामिनीजनसकलकामदुहं
परमकारुणीकं प्राहुरेव भवन्तम्
कोमलगिरा गोपिकागणगीतं
गोविन्दमिति नारायणतीर्थ भणितम् (शरणम्) ॥ ३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

जन्मान्तरसहस्रेषु कृतपुण्यफलोदया ।
इदमाहापरा कान्तं कुर्वन्ती प्रणतीर्मुहुः ॥ १४९॥

५५ पूरय मम कामम्

# पूरय मम कामम्

रागम्: बिलहरि ताळम्: आदि

*पल्लवि*

पूरय मम कामं गोपाल

*अनुपल्लवि*

वारं वारं वन्दनमस्तु ते
वारिजदळनयन गोपाल (पूरय)

*चरणम्*

मन्ये त्वामिह माधव दैवं
मायास्वीकृतमानुषभावम्
धन्यैरादृततत्वस्वभावं
धातारं जगतामतिविभवम् (पूरय) ॥ १॥

बृन्दावनचर बर्हावतंस
बद्धकुञ्जवनबहुतर विलास
सान्द्रानन्द समुत्गीर्णहास
सङ्कतकेयूर समुदितहास (पूरय) ॥ २ ॥

मत्स्यकूर्मादिदश महितावतार
मदनुग्रहादार मदन गोपाल
वात्सल्यपालितवरयोगिबृन्द
वर नारायणतीर्थ वर्धितमोद (पूरय) ॥ ३ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्
नृणां बन्धहर्तिं कुर्वन् नृसिंहोऽसि दयानघ ।
इति संबोध्य गोविन्दं सानन्दं प्राह गोपिका ॥ १५० ॥



## करुणयावलोकय माम्

रागम्: सावेरि ताळम्: त्रिपुट

*पल्लवि*

करुणयाऽवलोकय मां श्रीनरसिंह

*अनुपल्लवि*

शूरासुरसंहार शोभनाद्रिश्रीनरसिंह (करुणया)

*चरणम्*

परिपूर्णदयारस पाथोदिब्रह्मण
प्रह्लादचन्द्रोदय श्रीनृसिंह

निरसिततामस निर्विशेषमहसा
गुरुतरवीर श्री गूढ सुगुणालय (करुणया) ॥१॥

पातकमहाटवीपङ्क्तिकोपानल
भक्तचन्दनशीतळ श्रीनृसिंह
उत्तुङ्गसुकिरीट उन्नतकेयूर
मत्तचित्तमातङ्गमर्दन महाबल (करुणया) ॥२॥

त्रैगुण्यफलातीत तत्वफलात्मक
तापजलधितारक श्रीनृषिंह
श्रीगुरुकरुणयाश्रितभक्तिसुधारस
श्री नारायणतीर्थ श्रेयोविधायक (करुणया) ॥३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्
अन्यापि युवती काचिदन्यादृशगिरा हरिम् ।
धन्या संबोधयन्त्यद्धा सन्यायं प्राह सादरम् ॥१५१॥

५७ भूयो भूयो याचे

## भूयो भूयो याचेऽञ्जलिना

रागम्: पुन्नागवराळि ताळम्: अट (आदि)

*पल्लवि*

भूयो भूयो याचेऽञ्जलिना
भूमन् त्वयि मे दास्यं देहि

*चरणम्*

निमिषार्धमपि तव दर्शनविधुरा
निन्द्या हि तनुरेषा
तामरसेक्षण तव पादकमले
तनुतां तनुतां मम तनोरतुलाम् (भूयो भूयो) ॥१॥

कान्तं कान्तारमपि तव योगे
कमलेक्षण मन्ये
कान्तारं गृहमपि तु वियोगे
करुणातरुणी मयि तव भवतु (भूयो भूयो) ॥२॥

वरयामि गोपालवल्लभमधुना
त्वरयाहमखिल गुरुम्
सरसगिरा गोपयुवतीकथितमिति
गुरुकृपया नारायणतीर्थभणितम् (भूयो भूयो) ॥३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

मुरारिवचनाव्यग्रा वल्लवी कापि तत्परा ।
संबोधयित्वा स्वसखीमिति गायति सादरम् ॥१५२॥

५८ वद किं करवाणि

# वद किं करवाणि सखि हे

रागम्: कल्याणि ताळम्: त्रिपुट

*पल्लवि*

वद किं करवाणि सखि हे
वरकोकिलशुक वाणि

*अनुपल्लवि*

पतवनभुवि बर्हिबर्हावतंसो
वदति किमपि वक्रतयालम् (वद किं)

*चरणम्*

निमिषमपि युगसहस्रसमतया
नीतं मया दिनमासायम्
अमितकृपानिधिरयमिति सहसा
अधुना गतमिह त्यज्यति कथमयम् (वद किं) ॥१॥

गृहपति पुत्र धनादिषु ममता
ग्रहपरिगृहीतान्तरङ्गम्
महनीयमुरळीसरळगीतमन्त्रेण
मोचितमपि रचयति गृहसङ्गम् (वद किं) ॥२॥

तपसा किल महता भुवि कल्प-
तरुमुपलभ्य कापि कामितदम्
सफलनीतिमनुसरति सोयमित
विवृतं शिव नारायणतीर्थेनेदम् (वद किं) ॥३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

मध्ये कृष्णं मरकतमणिच्छायमिच्छाविहारं
कृत्वा गोप्यः कुवलयदृशो नायकं वेष्टयन्त्यः ।
गायन्त्यस्तं सरसवचसा दास्यभावं भजन्त्यो
बृन्दारण्ये मणय इव ताः पद्मरागा इवासन् ॥१५३॥

निगमबृन्दसरोरुहसङ्गतं
निखिललोकमधु स्वसुखात्मकम् ।
मधुरिपुं प्रतिलभ्य वल्लवी-
मधुकराः सुकराः जगुरित्यलम् ॥१५४॥

# वनभुवि गोविन्दमिह

रागम्: केदारगौळ (कांभोधि) तालम्: त्रिपुट

*पल्लवि*

वनभुवि गोविन्दमिह विहरन्तम्

*अनुपल्लवि*

वल्लवयुवतीजनभास्वन्तम् (वनभुवि)

*चरणम्*

निगमसरोरुह नित्यसङ्गमधुं
मधुकरात्मतयेह समुदितम्
अगणितगोधनमपरिमितानन्दं
आनन्दकरममरेशितुरपि तम् (वनभुवि) ॥१॥

इनशशिपावकतारकभासक-
मीक्षणसमुदितजगदेकनाथम्
मुनिजनमानससारसवर हंसं
महनीयदैवतमखिलदेहरथम् (वनभुवि) ॥२॥

लावण्यसरिदेकनायकमखिल सं-
रक्षणममरसंरक्षणमधुना
सेवक शिव नारायणतीर्थ भावित-
श्रेयोविधायकमिह वेदविधिना (वनभुवि) ॥३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

गयन्त्यो ननृतुश्चेत्थं गायन्तं नन्दनन्दनम् ।
वेणुनादसुधाधारामुद्गिरन्तं मुहुर्मुहुः ॥१५५॥

॥ इति श्रीनारायणतीर्थयतीन्द्रविरचितायां
श्रीकृष्णलीलातरङ्गिण्यां
श्रीकृष्णगोपीसमागमनवर्णनं नाम
षष्टमस्तरङ्गः समाप्तः ॥

# ॥ सप्तमस्तरङ्गः ॥

## रासक्रीडावर्णनं

*रासक्रीडमहोत्सववर्णनाभिनयः क्रियते ॥*

श्लोकम्

अथाभिनीयते रासक्रीडाख्यं चरितं हरेः ।
गोपीकदम्बसहितश्रीकृष्णागमनं वने ॥ १५६ ॥

तासां तत्वोपदेशश्च ताभिरानन्दताण्डवम् ।
यत्कृतं हरिणा सर्वं पुष्पवृष्टिः सुरैः कृता ॥ १५७ ॥

हास्यताण्डवसङ्गीतैः गोपीनां चित्तरञ्जनम् ।
सङ्ग्रहः कथितस्त्वेवं सप्तमेस्मिन् तरङ्गके ॥ १५८ ॥

अनेकजन्मसाहस्रतपसा परितोषितः ।
आविर्भूतः स भगवान् तासां गोप्यां सुजन्मनि ॥ १५९ ॥

*गद्यम् २६*

तर्त खलु बृन्दावने मन्दार पारिजात सन्तान कल्पक हरिचन्दनादि तरु बृन्दानन्दित शुक पिक शारिकादि बृन्द विनिन्दित[४५] नन्दनोद्याने समुत्फुल्ल शारद मल्लिकादि मकरन्द परिमळ लालसतया सञ्चरच्चञ्चरीक झणझणात्कार नूपुररवैः विचित्रपतत्रि वक्त्रोद्गळित नानाविध विनोद निनाद ताळ मृदङ्ग सङ्गीतादि कलाविशेषैः आलक्षितानन्तकोटि वनदेवता नाट्य रसोत्कटे कळिन्दनन्दिनी पुळिन्द समुल्लसित ललित लवङ्ग लतादि विविधलता भवने क्वापि क्वापि शारद सान्द्र चन्द्रिका सङ्गविलसित मनिवालुका मौक्तिक सितसिकता सुधारमणीय वेदिकाजाले दिव्य विमान समारुढ सुर किन्नरादि वर वनितागणेषु पश्यत्सु वर्षत्सु च मुहुर्मुहुः पारिजातादि दिव्य सुगन्धिकुसुमानि भक्त सङ्कल्प सिद्धमातन्वानो गोपरमणीनयनोत्पलाराधित मदनगोपालमूर्तिः वासुदेवो

[४५]बृन्दानन्दित

गोपीभिः सह रासक्रीडा महोत्सवारंभ संभ्रमचेताः गोपीभिः सार्धमात्मातत्वमुपदिशन् इदमाह ॥

श्लोकम्

ब्रह्मानुभूतिरसिकां शौरेर्वाग्लक्षणां सुधाम् ।
भूयः पिबन्त्यो मोदन्ते कृष्णब्रह्मणि ताः भृशम् ॥१६०॥

नृत्यन्तस्तेन तद्गीतं गायन्त्यो रासमण्डले ।
तेनोपदिष्टमद्वैतमनुकुर्वन्ति मानतः ॥१६१॥

६० अद्वयमखण्डितम्

# अद्वयमखण्डितम्

रागम्: नाथनामक्रिया ताळम्: झंप

अद्वयमखण्डितमशेषजगददिं
यत्र च जगत्त्रितयमास्तितमनन्ते ।
यत्र विलयं पुनरुपैति मृति कुम्भो
यद्वदवधारयत सत्यमिति ममोम् ॥१॥

यच्च निजशक्तियुतमैक्षत पुरस्तात्
यत्पुनरभूद्विकृतमैक्षत सुतेजः ।
यच्च कमभूत्पुनरैक्षत यदन्नं
जातमवधारयत सत्यमिति मामोम् ॥२॥

यत्पुनतभूत्त्रिविधपूरुषशरीरं
यत्तदनुविश्य सकलं त्रिविधमासीत् ।
जीवकलय सकलसाक्ष्यविकृतं सत्
तत्वमवधारयत सत्यमिति मामोम् ॥३॥

अन्नसलिले अभवतामशितपीते
प्राणमानसपरिणते परमसूक्ष्मे ।
वागभवदप्यशितमल्पपरिणामि
ज्योतिरवधारयत सत्यमिति मामोम् ॥ ४ ॥

षोडशकलः पुरुष एष परिशिष्टः
तासु विलयं प्रतिगतासु न च वेद ।
तासु तु समस्तमनुपश्यति तदित्थं
तत्वमवधारयत सत्यमिति मामोम् ॥ ५ ॥

येन पुरुषः समरसत्वमुपलभ्य
स्वापसमये स्वपितिनामक इह स्यात् ।
यत्र विलयं समनुयाति मन आदिः
तत्वमवधारयत सत्यमिति मामोम् ॥ ६ ॥

यत्र मधुपाहृतमधूपमितिमेतत्
चित्ररसमेकरसतां समधिगम्य ।
नैव रसभेदमिह वेद जगदादिं
तत्वमधारयत सत्यमिति मामोम्॥ ७ ॥

यत्र जलधौ समरसत्वमनुयाताः
तत्पृथगशेषसरितो न विदुरेव ।
ब्रह्मणि जना अनुदिनं समनुयाताः
तत्वमवधारयत सत्यमिति मामोम् ॥ ८ ॥

यस्य कलयाऽयमखिलस्य स हि भोक्ता
तत्परिहृतोऽमृत इति प्रतिवदन्ति ।
यच्च भवमृत्युरहितः सकलसाक्षी
तत्वमवदारयत सत्यमिति मामोम् ॥ ९ ॥

यत्र च विजृंभितमिदं स्वगतशक्त्या
स्वापृथगवस्थितमशेषजडजातम् ।

यच्च वटबीजसदृशं परमसूक्ष्मं
तत्वमवधारयत सत्यमिति मामोम् ॥१०॥

सिन्धुजनितं सलिलमिश्रितमिवात्मा
सर्वगत एकरसतामनुगतो यः ।
वेदशिरसां परिचयेन सुविविक्ताः
तत्वमवधारयत सत्यमिति मामोम् ॥११॥

बद्धनयनो वनभुवि प्रतिविमुक्तः
प्रश्नमुपलभ्य नगरं पुनरवाप ।
यद्गुरुमतं पुनरवाप निजबुध्या
तत्वमवधारयत सत्यमिति मामोम्॥१२।

यत्र लयमेति मन आदि परमात्म-
न्न्यन्यदनुपश्यति न बन्धुजनमेषः ।
सर्वविलयेऽप्यविलयं यदवशिष्टं
तत्वमवधारयत सत्यमिति मामोम् ॥१३॥

अक्रियतया सकलविक्रियदृशित्वात्
नैव हननादिविषयो यदवशिष्टम् ।
तप्तपर्शुसपृगिव सत्यपरिगुप्तः
तत्वमवधारयत सत्यमिति मामोम् ॥१४॥

किन्नु कमनीयमबलायतनुभूतं
सर्वमनुभूतमपहाय न तु तत्वम् ।
नित्यमनुभूति सुखविग्रहमचिन्त्यं
तत्वमवधारयत सत्यमिति मामोम् ॥१५॥

सत्सदिति सर्वविषयेष्वनुगतं यत्
भासकतया प्रियतया च परिशिष्टम् ।
मानमिति मेयमिति हीनमतिरिक्तं
विद्वदनुभूतमवधारयत सत्यम् ॥१६॥

निश्चितमशेषनिगमान्तवचनैर्यत्
तत्वमयमित्यखिलसारमनुभूतैः ।
तर्कशतकैरपि दुरेकरसमाद्यं
धीरमतिगम्यमवधारयत सत्यम् ॥ १७ ॥

पर्यवसितं निगमवाग्शतकमिश्र-
लक्षणकतयान्यविषयेऽपरिसमाप्तेः ।
सर्वविषयस्य च तदात्मकतया तं
शिष्टमवधारयत सत्यमिति मामोम् ॥ १८ ॥

श्रीमुररिपोर्वदनपद्ममकरन्दं
ब्रह्मसुखसारवचनं बहु पिबन्तः ।
गोकुलवधूमधुकरास्सुपरितृप्ताः
रासभुवि मण्डलकृतो बहु रमन्ते ॥ १९ ॥

समनिगमान्तवचनार्थमुपलभ्य
स्वानुभवमेकमखिलैकरसभूतम् ।
एतदमृतं भवभयापहरमाद्यं
नारायणानन्दतीर्थपरिगीतम् ॥ २० ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

संसाररोगसंतप्ताः कृष्णब्रह्मरसायनम् ।
गोप्यः पिबन्त्यस्तन्मुक्ता रमन्ते ह्यभयं गताः ॥ १६२ ॥

आत्मारामाः परानन्दनित्यतृप्ताः पुनः पुनः ।
आत्मानुभूतिं गायन्त्यः कृष्णैकरसतां गताः ॥ १६३ ॥

रमन्ते परमानदकृष्णब्रह्मणि ता भृशम् ।
त्यक्तदेहाद्यहम्माना निर्विशेषसुखे स्थिताः ॥ १६४ ॥

# परमिह पश्यत पुरुषम्

रागम्: भैरवि (घण्टा) ताळम्: त्रिपुट

*पल्लवि*

परमिह पश्यत पुरुषं स्वीकृतमायिकमानुषम्

*चरणम्*

निजपरभेदरहितदृशमक्षरं
ईक्षणकृतभुवनं विभुम्
उपनिषदेकसमधिकतमद्वय-
बोधसुखैकरसं प्रभुम् (परमिह) ॥ १ ॥

इदमिदमित्यखिलेषु समनुगतं
सत्यचिदद्वयविग्रहम्
श्रुतिशिरसि प्रविविक्तमसक्तं
अभक्तजनैरतिदुर्ग्रहम् (परमिह) ॥ २ ॥

गगनमरुन्मुखभूतसमुदित
समस्तजगत्प्रतिभासकम्
तदनु तदन्नरसमयमशेष-
विशेषमखण्डसुखात्मलम् (परमिह) ॥ ३ ॥

अधिगतमन्नमयादिषु योगिभि-
रान्तमरमान्तरमव्ययम्
हरिरखिलैकरसं जननादि-
विकारविहीनमनामयम् (परमिह) ॥ ४ ॥

विदुरिह यन्निगमान्तवचोभि-
रपोह्य पराङ्गमखण्डितम्

अघटितसङ्घटनाघटिताकृतिं
अद्भुतकुण्डलमण्डितम् (परमिह) ॥ ५ ॥

स्वजनदयाधृतदेहमदेहतया
विहरन्तमिह भूतले
वनभुवि रासरसमयरसपण्डित-
गोपवधूकृतमण्डले (परमिह) ॥ ६ ॥

अतनुमशेषतनुं जगतां
अभयं भयकारणतारणम्
निजकलया परिबृंहितसर्व-
जनात्मतयाऽघनिवारणम् (परमिह) ॥ ७ ॥

सकृदवलोकनिराकृतगोप-
वधूजनतापमरिन्दम्
नवजलदाभतनुं तटिताभ-
पटं नटवेषधरं समम् (परमिह) ॥ ८ ॥

हरिचरणस्मरणैकपरायण
जनसुखदं परदैवतम्
मुनि नारायणतीर्थ सुविरचित-
गीतमिदं निगमान्वितम् (परमिह) ॥ ९ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

जगदुदयलयादेः साधकं साधकैर्यत्
श्रुतिगुरुदृढभक्त्या लभ्धमद्वैततत्वम् ।
श्रुतिशिरसि विविक्तं पञ्चकोशान्तरस्थं
वनभुवि विहरन्तं तं तु पश्यन्ति गोप्यः ॥ १६५ ॥

एवं कृष्णात्मतत्वज्ञाः कृष्णब्रह्मात्मना स्थिताः ।

सर्वोपनिषषां सारं गायन्त्यः कृष्णमासते ॥ १६६ ॥

हृदयनिहितं कान्तं काचित्कळिन्दसुधातटे
प्रियतममथालिङ्गत्यद्धा निरङ्कुश तृप्तितः ।
निजपरिभिदातीतं धैराच्छ्रुतेः शिरसां बलात्
मुहुरपि भृशं गायन्त्येनं चिरं बहु मोदते ॥ १६७ ॥

६२ कलये देवमिह

# कलये देवमिह

रागम्ः पुन्नागवराळि ताळम्ः त्रिपुट

*पल्लवि*

कलये देवमिह सुखकन्दम्

*अनुपल्लवि*

निगमनिगूढमखिलदृशमेकरसं
व्रजानदमनन्तम् (कलये)

*चरणम्*

यदशनयादिविकारविहीनमशेषमजय्यमनन्तम्
इह मुनयो मृगयन्ति शमादिभिरान्तरमेनमचिन्त्यम् (कलये)

इह परभोगममरपदवीमपि यदधिगमे न भजन्ते
विषमिव धीरधियोऽमरमृग्यपरैकसुखे विहरन्ते (कलये) ॥ २ ॥

निखिलतपःश्रुतयोनुवदन्ति यमवधितया परदेवम्
अभिलषितं मुनिभिः स्वतपोभिरशेषभवाम्बुधिनावम् (कलये) ॥ ३ ॥

सकलसुधर्मविधर्मकृताकृतभूतभविष्यदतीतम्
निजपरिब्रह्मितजगतनुकूलतया सततं सुविभातम् (कलये) ॥ ४ ॥

प्रणवतुरीयसुलक्षितमक्षरमात्मतया यदनन्यम्
यदयमनुस्मरति स्वयमव्ययमाशु सविन्दति धन्यम् (कलये) ॥ ५ ॥

यदधिगमाधिह जन्ममृतीहननादिभव्यानि तरन्ति
पुनरिह मोहविझ्रृंभितमेतदधो मुनयो न भजन्ति (कलये) ॥ ६ ॥

विरतिशमादिविहीनदुरापमबोधसुबोधसमानम्
यदवगतिप्रतिषिद्धमबोधविजृंभित्यमाहुरिहैनम् (कलये) ॥ ७ ॥

विभुमशरीरमशेषशरीरगुहासु निविष्टचिदंशम्
व्रजयुवतीजनवल्लभमात्मतया परिशिष्टमधीशम् (कलये) ॥ ८ ॥

भणितमनन्तपरायणशिव नारायणतीर्थे नेदम्
निगमशिरोरसभावनया गतमत्सरहृदयविनोदम् (कलये) ॥ ९ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

निर्विशेषचिदानन्दमाविर्भूतं निजेच्छया ।
कृष्णभावेन बुद्ध्यादि तत्वभूषं जगुश्च ताः ॥ १६८ ॥

बुद्ध्यादितत्वपरिचिह्नितगोपवेषं
सिद्धानुभावितमशेषजगन्निदानम् ।
नासाग्रलग्ननवमौक्तिकचन्द्रबिम्बं
बिम्बाधरं भवभयप्रशमं नमामि ॥ १६९ ॥

६३ माधव मामव देव

# माधव मामव देव

रागम्: नीलांबरि ताळम्: आदि

*पल्लवि*

माधव ममव देव
यादव कृष्ण यदुकुल कृष्ण

### *अनुपल्लवि*

साधुजनाधार सार्वभौम
माधव मामव देव (माधव)

### *चरणम्*

अम्बुजलोचन कम्बुशुभग्रीव
बिम्बाधर चन्द्रबिम्बानन
चाम्पेयनासाग्रलग्नसुमौक्तिक
शारदचन्द्रजनितमदन (माधव) ॥१॥

शङ्खचक्रपद्मशार्ङ्गखड्ग-
वैजयन्तीकौस्तुभादिभूष
स्वीकृतबुद्ध्यादितत्वसमन्वित
दिव्यमङ्गळ गोपबालवेष (माधव) ॥२॥

कपटमानुषदेह कल्पितजगदण्ड
कोटिमोहितभारतीरमण
अपगतमोहतदुद्भव निजजन-
करुणाधृत[४६]देह सुलक्षण (माधव) ॥३॥

तरळकुण्डल रविमण्डलविकसित
निजजनमानसपङ्केरुह
करुणाहाससुधनिधिकिरण-
शमितभवताप जनमोह (माधव) ॥४॥

मुरळीगानरसामृतपूरित
व्रजयुवतीमानसार्णव भो
सरसगुणार्णव तीर्णभवार्णव
सततं गीतकीर्तिमण्डल भो (माधव) ॥५॥

---

[४६]करुणया

आगमगिरिशिखरोदित सत्यचि-
दद्वयलक्षणसुखभानो
भोगिकुलोत्तमभोगशयन दुग्ध-
सागरजा लक्षणाढ्यतनो (माधव) ॥ ६ ॥

इन्दिरया सह सुन्दर कृष्ण
पुरन्दरादिवन्द्यपदकमल
नन्दनन्दन योगिवर्यधुरन्धर
नारायणतीर्थमतिविहार (माधव) ॥ ७ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्
सानन्दं नन्दसूनुं सकलजनिमतां
सारमाराद्रुपास्यम्
दास्यो लास्यं रसाढ्याः करतलकलितै-
स्ताळवाद्यैः सुगीतैः ।
कुर्वन्त्यो निर्विशङ्काः कुवलयसुदृशो
दिव्यताटङ्कवत्यः
बृण्दारण्ये भजन्ते सुरवरवनिता-
स्तं जगुः स्यन्दनस्थाः ॥

६४ गोविन्दमिह

## गोविन्दमिह

रागम्: बागेश्री (भैरवि) ताळम्: झंप (चापु)

*पल्लवि*

गोविन्दमिह गोपिकानन्दकन्दं

सानन्दमवलोकयामो मुकुन्दम् (गोविन्दमिह)

*चरणम्*

गोपिकागणनयनकुमुदपूर्णेन्दुं
गोपालकुलतिलकमखिलजनबन्धुम्
श्रीपतिमनिन्द्यहरिचन्दनसुगन्धिं
श्रेयोविधयिकरुणारससिन्धुम् (गोविन्दमिह) ॥ १ ॥

सङ्गीतरसरसिकसरससल्लापं
सरसमुरळीगळितसाधुसन्तापम्
शृङ्गाररसपूरश्रीमदनगोपं
श्रितजनानन्दमखिलानन्दरूपम् (गोविन्दमिह) ॥ २ ॥

अङ्गनामुखपद्मसङ्गिभृङ्गाक्षं
आलोलमकरकुण्डलनटनदक्षम्
मङ्गळाकरमखिललोकसंरक्षं
माधवमशेषसुररिपुगणविपक्षम् (गोविन्दमिह) ॥ ३ ॥

वल्लवीमाणिक्यमणियुगळमध्ये
मरकतमणिच्छ्रायमदनगोपालम्
मल्लिकाजाजीचंपकादिसुमभारं
महनीयलावण्यललिततरपूरम् (गोविन्दमिह) ॥ ४ ॥

स्पुरदधरकलितमुरळीनादसुधया
सुरसुन्दरीगणमिहाकर्षयन्तम्
गुरुकरुणया रचितमेतदतिललितं
नारायणानन्दतीर्थसमुदितम् (गोविन्दमिह) ॥ ५ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

ध्रुवमठ्यमुखमुख्यैः ताळभेदैरटन्त्यो

वनभुवि वरनार्यो रासगोष्ठीकरिष्ठाः ।
अलघुलघुपदादिन्यासभेदैश्च नाट्यैः
सरसमभिनयन्त्यो नन्दसूनुं भजन्ते ॥ १७१ ॥

मुहुरपि सुरनार्यो रासलीलाविलासं
जगुरिति दिवि दिव्यस्यन्दनानन्दवत्यः ।
अभिनयमपि तासां वल्लवीनां मुरारे-
रधिकमभिनयन्त्यः पुष्पवृष्ट्यार्चयन्त्यः ॥ १७२ ॥

६५ ध्रुवमण्डलपण्डितम्

# ध्रुवमण्डलपण्डितम्

रागम् : नाट ताळम् : ध्रुवम्

ध्रुवमण्डलपण्डितं वधूजनमण्डलमहोन्नतम्[४७]
भवसागरतारकं गिरा परिभावुकसुलक्षितम्
द्रुतमध्यमन्थरगतिरवलोकयत सुन्दरीः
कृतपुण्यफलात्मकं हरिं परिपश्यत व्रजौकसाम्
त्रिपताकपताकसुकरैः कटकामुखशिलीमुखैः
परभावरसोत्कटपरैरपि वीक्षणसुशिक्षितैः
तनुमध्यनियोजितकरैरपि नाट्यरसोत्कटाः
नारायणानन्दतीर्थकृतं गीतं यतिजनतोषणम्

तां तककिण तधिमि तकिट तझणु तकिटतक तकतरिकिट
झणुताह तधण तिमिधिनु तकिट तधिमि तकिटधक झणुता
किटतक तणधा तकतणां तकिटझं तरिकिट तकझं णं
तरिकिटतक तणं तकिट तझं तकिट तिर्घुडु ततैय्यत्तक धा

[४७] मण्डलमिहोन्नतम्

किटतक झं तरिकिटतक तळङ्कुतक झं तकिटतक तधिमि तकिट
तण धिमि तरितक ततघिट तकतक झणुत तण तद्धिमि तकतति
किणतोम्

६६ जगदीशं पश्यन्त

# जगदीशं पश्यन्त

रागम्: मध्यमावति ताळम्: मठ्यम्

जगदीशं पश्यत सुरवरवनिता
व्रजाङ्गनाभिरिह नवनवमणिदिव्य-
कुण्डलतरणिनिचयशशिगणसंजात
श्रीधरजितसत्यलोकविचित्रभूतिरयम्
लीलामयदिव्यसुन्दर् मदनकोटिविलसित
तनुर्वसुधासुधाराशिर्नृत्यति भुवि
निजदासवर्गसुखकरकृपाम्बुराशिरेनम् ॥

तकधीनुत जककिणण कधितणकिणण कतिकित तिमित झणु
तत्तण तत्तिमि तकिट तकतों तरिकिट तिं तिर्धुडु तत्तेय्य
तकतीनुत धिति तककण झन्ध्तरि कुन्धरि तकिट झन्ध तकतणन्धरि
तकिट धाकिटतक झन्धरि किटतक ताह तधिकितक तधिमि
तकिट तकझणुतक धितिमित धीमित तकतधीघिणतोम्

६७ नित्यानन्दमिह

# नित्यानन्दमिह

रागम्: तोडि (मुखार्) ताळम्: रूपकम्

नित्यानन्दमिह पश्यत नरसिंहं
व्रजवधूभिरधिकलास्यकृतं परिजनहितचरितम्
भक्तानामभयदं भवबन्धनविदळनं
मुनिवर्यमोक्षैकफलं वेदविदितम्
इन्दिरालिङ्गितं दयासुधयापरिमितामोददं
गोपीजनमनसिजानेकरूपधरमिह
परिपालितनिजजनं निरवधिककरुणारसम्

तझन्धक झणुतक तधिमि तकिट तण धीमितक तरिकिटझणु
तझक्तधी तकत धिमित किणझन्धरि तणधा जणुना हत तधिमि
तकिटझणु तकितक धण तिमितरि तधणक तधिमि तकिट धाणुम्
तणन्त तणन्त झणुन्धक झन्धरि तत्तळङ्गु तकझणु तकधीमित
तकिट तकधक झणुत तधिमि तकिट धिनुत तणतिमि
तकतति घिणतोम्

६८ सुरलोकवनिताः

# सुरलोकवनिताः

रागम्ः पन्तुवराळि (वराळि) ताळम्ः झंप

सुरलोकवनिताः समवलोकयत देवं
अखिललोकाधारमधिकतरलीलम्
शरणागतत्राणकलितसङ्कल्पमिह
वनभुवि महोल्लासरासरसरसिकम्
व्रजपुरवधूकलितविविधताळमृदङ्ग-
सङ्गीतरसविज्ञमखिलसारज्ञम्
उदयविलयातीतरसघनमचिन्त्यं

सदयाहृदयालोककलितकैवल्यम्
अधिकतरसाहसोत्साहगाम्भीर्यं
विधिमुखविमृग्यपदं विमलविज्ञानम्
कनककटिसूत्रवलयाङ्गदपटीकं
कलितकौस्तुभश्भिकमनीयकण्ठम्
श्रीवत्सलक्षणमशेषसुररक्षं
श्रेयसामास्पदमशेषभुवनानाम्

तं तिरिना तिरिना त्रिम् त्रिं नुतक ततिमि तकिटतक झणम्
तकणं तत्तिक् किटतक तत्तिक् किटतक तिंतिं तत्ताति
तत्तारि किणकणांकिण तोतिकितीकी तातुकुतुकु झं झं
तझं तत्तिमिति झन्तरि ततणां ताणुतण झणुता
हन्त ततिमि तकिटझं तकझं झणुताहत झन्तरि ततिमि
तकिटतक तणतिमिझणु तकतति किणतोम्

६९ गोपालमालोकये

# गोपालमालोकये

रागम्: मोहनम् ताळम्: त्रिपुट

गोपालमाकलय सखि हे गोपिकायुतमण्डले
चण्डभानुसमग्रमण्डल-
नियतदेवमखिलसारमादिदेव-
मतुललीलममरगीतमप्रमेयबलपराक्रमं
नित्यसिद्धसुखैकविग्रहमच्युतम्

ततक्तीतिसुत झन्तरि ततिमि तकिटततिमि तझं तझं तणां
झणुं तणां तिमिततीं तणतक ततिमि तकिट झणुत

तकिटतकि तकझणु तणतिमि ततिमित तकतणत झणुताहत
तिमित झणुत तकतरिकिट झणुत तत्तिमि तकिटतकितक झणुतक
तकतति किणतोम्

७० कलयत सुरवनिता

# कलयत सुरवनिता

रागम्: आनदभैरवि ताळम्: अट

कलयत सुरवनिता मदनगोपालं
अनुपमलावण्यसरिदेकनाथम्
वनभुवि रवितनयातटिनीतटे
हरिचन्दनलवङ्गलतादिविलसिते
निरुपमरासरसोल्लासिते वल्लव-
युवतीजनमानसपूर्णेन्दुम्
मृदमदतिलकललितभास[४८]सञ्जात
श्रमजलकणमुक्ताफलजालसरसम्
चरणकमलगतमणिमयनूपुर-
मधुकररवमदनिगमशिक्षागुरुं
मन्दमध्यमलघुलघुतरगतिभेद-
सुन्दरलास्यानन्दितयुवतीबृन्दम्
हरिचन्दनतुळसीकमलचम्पकादि-
कुमुदकुन्दपारिजातादिकुसुमसुगन्धिम्

तां तङ्किणकिण तकझं तकझं तकुन्तरि तत्तणं
तत्तणां तत्तिनुत तनतत्तिमि तकजन्त तकजन्त तत्त्णान्त

[४८]फाल

तिमितक ताहु झन्तरि तनां झणुता तकिटझं तकझं
ततिमितक झणुत तणतिमि तझं तकिट तकझं
किणझं तकतित्तकझं झणुताहत तणतिनुत तझणं तत
तणत तत्तिमि तकिटतक झणुतकरे तकतति किणतोम्

७१ कलयत वनभुवि

# कलयत वनभुवि

रागम्: कांभोजि ताळम्: एकम्

कलयत वनभुवि कमलेक्षणमिह
कलितललितमुरळीकलनिदनम्
कल्पितबहुविधकामविशेषं
करुणारसघनमनुपमवेषम्
कल्याणाकृतिकृतबहुखेलं
श्रीगोपालकरासक्रीडा
सिद्धमहोत्सववर्णनमधुना
शिव नारायणानन्दतीर्थ सुघटितम्
सूळादिकमिति हरिगुरुकृपया

तकझं तकतीतिनुतकझं तत्तिमि तक्किट झणुतणतां
तक्किण झन्तरि तण तिमित तकतरिकिट झणु तत्तिमि
तत्तिन्नां तकझणुत तकिट ततमित तिकितक झणुताह ततिमि
ततिमि तकिट झन्तरि तकझणु तक तकतकि कणतोम्

श्लोकम्
अङ्गप्रत्यङ्गगौणस्फुटसमविषम-

व्यञ्जकव्यक्तिसिद्धं
शृङ्गाराद्यैरनिन्द्यैरधिकमभिनयं
व्यञ्जयन्त्यो युवत्यः ।
रासक्रीडविलासैर्वनभुवि नितरां
माधवं तोषयन्त्यः
तुष्टाः स्वैरं रमन्ते चिरमिह गुरुणा
श्रीधरेणाप्तकामाः ॥ १७३ ॥

*॥ इति श्रीनारायणतीर्थयतीन्द्रविरचितायां*
*श्रीकृष्णलीलातरङ्गिण्यां*
*रासक्रीडामहोत्सववर्णनं नाम*
*सप्तमस्तरङ्गः समाप्तः ॥*

# ॥ अष्टमस्तरङ्गः ॥

## श्रीकृष्ण रासक्रीडावर्णनं

*रासक्रीडामहोत्सववर्णनाभिनयः क्रियते ॥*

श्लोकम्

अष्टमे गोपिकागीतमादरेणाभिनीयते ।
गोपीभिः सह कृष्णस्य रहस्यागमनं वने ॥ १७४ ॥

अन्तर्धानं च कृष्णस्य ततो गोपीप्रलापनम् ।
कृष्णस्यान्वेषणं भूयस्तासां श्रीकृष्णदर्शनम् ॥ १७५ ॥

एतच्चरित्रमधुना संग्रहेण हरेः कृतम् ।१७६ ॥

आनन्दं नन्दयन्तं हृदयगतं
अविद्याश्रयं नादगम्यं
प्राणादीन् षोडशारानिव रथचरणे
स्थापितान्नाभिदेशे ।
आकाशादींश्च भावान्निजपरिकलया
जृंभितान्मायया तं
गोपीमध्ये मुकुन्दं व्रजपुरवनिता
कापि गायत्युदारम् ॥ १७७ ॥

७२ भावये सखि भावये

## भावये सखि भावये

रागम्: आहिरि ताळम्: आदि (त्रिपुट)

*पल्लवि*

भावये सखि भावये

भावये सखि भादृशमीशम्

*चरणम्*

मधुरिपुमिह रासभुवि[49] विहरन्तं
माधवमिन्द्रियादीषु[50] वसन्तम् (भावये) ॥ १॥

दिनकरमण्डलगं सुतपन्तं
विश्वतनुं वियदादिषु सन्तम् (भावये) ॥ २॥

पवनगतमखिलकारणमादिं
प्रणतया परिविदितमनादिम् (भावये) ॥ ३॥

सकलविलयमनुभवति यदेकं
यत्र तदा निजमेति सदेकम् (भावये) ॥ ४॥

यमवधिलयमनुयाति तु तारं
तं परमव्ययमागमपारम् (भावये)॥ ५॥

अरमिव रथचरणस्य पिनद्धं
यत्र कला नियमेन सुसिद्धाः (भावये) ॥ ६॥

निगमविचारजनितमतिगम्यं
जन्मलयादिरहितमतिरम्यम् (भावये)॥७॥

अभिनवजलधरसुन्दरदेहं
वारितगोपवधूजनमोहम् (भावये)॥ ८॥

हरिगुरुपरिजनहृदयविनोदं

---

[49] वनभुवि
[50] इन्द्रियधीषु

नारायणतीर्थभणितमिहेदम् (भावये) ॥ ९ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्
सर्व प्रत्यञ्चमेकं प्रकृतिमखिलभावं
स्वयं भासयन्तम्
नित्यासङ्गस्वभावं सकलहृदयगं
व्योमवन्निर्विकारम् ।
आचार्यस्य प्रसादाद्विदुरिह मुनयो
वेदभागे मुकुन्दम्
नृत्यन्तं गायतीति व्रजपुरवनिता
भक्तसंकल्प सिद्धम् ॥ १७८ ॥

७३ श्रीनिलयं सखि श्रीनिलयम्

# श्रीनिलयं सखि श्रीनिलयम्

रागम्: मुखारि (वराळि) ताळम्: आदि

## *पल्लवि*

श्रीनिलयं सखि श्रीनिलयम्

## *अनुपल्लवि*

धीमहि गोपीमानसनिलयम्[५१] (श्रीनिलयम्)

## *चरणम्*

गगनपवनमुखभूतनिदानं
प्रियतममागममृगितमिहैनम् (श्रीनिलयं) ॥ १ ॥

यदपि सृजति जगदवति पुनाति
ग्रसति चिदात्मतया सुविभाति (श्रीनिलयं) ॥ २ ॥

[५१] सुखनिलयं

दिव्यतनुमजरममरमसङ्गं
आन्तरबाह्यततं जगदङ्गम् (श्रीनिलयं) ॥ ३ ॥

अनलशिरःश्रुतिवाचमधीशं[५२]
दिनकर शशधर लोचन देशम् (श्रीनिलयं) ॥ ४ ॥

विश्वहृदयं मेदिनीपदमादिं
प्राणतयाकृतपवनमनादिम् (श्रीनिलयं) ॥ ५ ॥

विश्वनगरवरराजमराजं
विविधकलामृतजीवसमजम् (श्रीनिलयं) ॥ ६ ॥

मुहुरपरम्परबृह्मितभावं
निजकलया परिहृतभवभावम् (श्रीनिलयं) ॥७ ॥

व्रजयुवतीजनकृतपरिहासं
वनभुवि मुनिवरहृदयनिवासम् (श्रीनिलयं) ॥ ८ ॥

बुधजनमानसमण्डनभूतं
इदमिह नारायणतीर्थ गीतम् (श्रीनिलयं) ॥ ९ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

इति गोप्यः परानन्दं गायन्त्यस्ताः पृथक् पृथक् ।
अपरा श्रुतयो भूयो भूयस्तत्रैव सङ्गताः ॥ १७९ ॥

कदाचिद्गोविन्दे गतवति परानन्दसदनं
निराकारं धामस्वकमितिच विज्ञापयति ताः ।
तदाकारं साक्षात्परमधिगताः कृष्णरसिकाः
पुनस्तां गायन्त्यो रहसि मृगयन्ति प्रियतमम् ॥ १८० ॥

---

[५२] वेद्यमधीशं

# मृगयत राधामाधवं सखि

रागम्: शङ्कराभरणम् (कांभोजि) ताळम्: त्रिपुट

*पल्लवि*

मृगयत राधामाधवं सखि
मुहुरिह निगमवने धवम्

*चरणम्*

अनुपदमखिलफलप्रदशाखिषु
मृगितमदृष्टमनन्तम्
क्वचिदपि गूढतया निज धामनि
कृतसुकृतैरनुभूतम् (मृगयत) ॥ १॥

यदखिलदूरतरेऽपि यदान्तिक-
मात्मतया वियदादिम्
अनुगतमधिगतमागमपार-
मनन्यमनोभिरनादिम् (मृगयत) ॥ २॥

स्वयमवगतिरवगन्तृनियन्तृ
यदखिलजनस्य निरीहम्
श्रवणनयनवचनादिदुराप-
मपुण्यवतातिदुरूहम् (मृगयत)॥ ३॥

यदनु मनसि परिधावति धावति
दूरत एव दुरन्तम्
विभुतरमखिल जनान्तर बाह्य-
मखण्डचिदात्मतया तम् (मृगयत)॥ ४॥

यदखिलभूतनिदानमवैति
तदात्मतयात्मनि सर्वम्

स तरति शोकमहोदधिमाशु
विवर्जितमानुषगर्वम् (मृगयत) ॥ ५ ॥

चलति जगति यदचञ्चलमातत
मुखविनिहितजगदण्डम्
प्रभवति भवति पिनद्धमिदं
निजमायिकमेकमखण्डम् (मृगयत) ॥ ६ ॥

असुरधियामतिदुर्गममप्रिय-
मात्महनो हि परं ते
इति निगमा जगुरेनमपार-
सुखैकरसं न भजन्ते (मृगयत) ॥ ७ ॥

कुवलयदळरुचिराकृतिमनन्य-
मनोभिरुपाहृतदेहम्
गुरुकृपया हृतगोपवधूजन-
शोकमपाकृतमोहम् (मृगयत) ॥ ८ ॥

श्रुतिशिरसामनुभूषणमद्वय-
मात्मरतिप्रिय शेषम्
मुररिपुभवरसिकवर नारा-
यणतीर्थभणितमदोषम् (मृगयत) ॥ ९ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

इत्थं गोपीजनाः शौरेः परभावविदः पुनः ।
भुवि शिक्षां वितन्वन्त्यो मृगयन्ताऽदिकारणम् ॥ १८१ ॥

सर्वान्तःकरणान्तस्थं माधवं प्राणवल्लभम् ।
मृगयन्तीर्वने पुष्पैः हसन्त इव पादपाः ॥ १८२ ॥

मल्लिकादिलतास्तद्वतोषध्योऽन्याश्च तद्वने ।

संबोध्य नामभिस्तेषां तानाहुर्वल्लवाङ्गनाः ॥१८३॥

७५ माधवं् दर्शय हे

# माधवं दर्शय हे

रागम्: काम्बोजि (भैरवि) ताळम्: चापु

*पल्लवि*

माधवं दर्शय हे मन्दार- माधवं दर्शय

*अनुपल्लवि*

माधवमिह राधिकाराधितमथ
साधकजनफलसाधकमधुना (माधवं)

*चरणम्*

रे रे मन्दार सन्तान कल्पक
पारिजात चन्दन
रे रे चंपक नाग पुन्नग जंबीर
पनस नारीकेळ रसाल (माधवं) ॥१॥

सरसकदम्ब पलाश
कुरवक वटसमूह
विलसदशोक कपित्थ कदळिवन
ललितदेवदारुबृन्द पिचुमन्द (माधवं) ॥२॥

बृन्दे बृन्दावनचन्द्रमहर्निशि
नन्दनन्दनमतुलम्
कुन्द लवङ्गलते कुटिलाळकमिन्दु-
सुन्दराननमीशमतिबलम् (माधवं) ॥३॥

फुल्लकुसुममल्लिके जाजि मालति
वल्लि वनजलतिके

कल्लोल खेलश्रीकमलमालिके कुमुद-
कल्हारादिकुसुमचयपङ्क्तिललिते (माधवं) ॥ ४ ॥

शुक कोकिल सारिकाबृन्द शाकुन्त-
शोभनहम्स कुला-
प्रकटाकशानिलानल जल धरणि
सकलदेवगण सरसगुणगण (माधवं) ॥ ५ ॥

सकलनिगमगाढमखिललोकाधारं
अच्युतमखिलगुरुम्
सरसगोपीगणपरिगीतमनु शिव
नारायणतीर्थभणितमुदारम् (माधवं) ॥ ६ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

गोपीषु मृगयन्तीषु वने गोपालनन्दनम् ।
आत्मानं दर्शयामास चिकीर्षुर्भूर्यनुग्रहम् ॥ १८४ ॥

## *गद्यम् २७*

अथ खलु वल्लवयुवत्यो निजवल्लभ विरह सन्ताप जनित दुरन्त चिन्ता सन्ताप[५३] मन्दीकृत बाह्यविषय विवेक वृत्तिमच्चित्यवत्यः मुहुर्मुहुः तदीय लीलाविनोद नवर-साविष्करण प्रवीणाः अपाङ्ग प्रत्यङ्ग गुणागण सम विषम बलाबल विलास विलसित ग्रीवाशिरः कंप त्रिभङ्गि ललित दिव्यगात्र भ्रूनेत्र हस्त विशेषाद्याविष्कृत नवरसालङ्कार-लङ्कृत विविध लास्य विशेषं स्पुरदधर मणिपरिमिळित मुरळीकलरव सुधावतीरित सुधाखण्ड मण्डलं स्मारं स्मारं स्वस्वान्तःकरणापायेन सर्वान्तरङ्गं मदनशतकोटि सुन्दराङ्गं ध्यायन्त्यो मनसा प्रणमन्त्यः शिरसा गायन्त्यो वचसा च पुरः स्थितमिव संबोध्य प्रत्येकं गोपालमागायन्त ॥

[५३] सन्तति

श्लोकम्

मदनशतकोटिवेषं माधवमाधाय मामके मनसि ।
विदळितसुररिपुबृन्दं विष्णुं गायामि विश्वभर्तारम् ॥१८५॥

७६ नन्द नन्दन गोपाल

# नन्द नन्दन गोपाल

रागम्: सहाना (मोहनम्) ताळम्: आदि (चापु)

*पल्लवि*

नन्द नन्दन गोल्पाल जय
नवनीतचोर गोपाल

*चरणम्*

कन्दर्पशतकोटिसुन्दर सुखकर
मन्दहास श्रीगोपाल
बृन्दावनगोबृन्दयमुनानन्द
चन्द्रानन श्रीगोपाल (नन्दनन्दन) ॥१॥

लीलामानुषबालकवेष
बलानुजविग्रह गोपाल
मुरळीधर मुनिबृन्दविचिन्तित
मुक्तजनाश्रय गोपाल (नन्दनन्दन) ॥२॥

नन्दसुनन्दादिवन्दितचरणार-
विन्द महोन्नत गोपाल
बाधितरिपुबृन्द बोधरसानन्द[५८]
साधितजगदण्ड गोपाल (नन्दनन्दन) ॥३॥

---

[५८] घनानन्द

गोपीमन्मथ गोपरिपालन
गोवर्धनोद्धार गोपाल
रासमण्डलनट दासजनावन
वासवादिनुत गोपाल (नन्दनन्दन) ॥ ४ ॥

मूलकारण मोहवारकलक्ष्मी-
बाल वार्याधिप गोपाल
घोरभवार्णवतारक पालित-
नारायणतीर्थ गोपाल (नन्दनन्दन) ॥ ५ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्
माधवचरणसरोजे वनभुवि
सिकतासु रेखयानुमिते ।
दृष्ट्वा तदनु च तन्व्याश्चरणौ
कस्या इतीतराः प्रताहुः ॥ १८६ ॥

काचिद्गोपी कनकलतिकाकान्तिरन्तादिहीनं
कान्तं स्वान्तस्थितमनुगतं कामकामां श्रियश्च ।
लक्षीकृत्यश्रुतिरिव परानन्दमूर्तिं प्रगल्भा
नृत्यन्ती गायतीति प्रकृतिपरतरं मृग्यमाणं मुकुन्दम् ॥ १८७ ॥

७७ नन्दमुकुन्दे परमानन्दे

# नन्दमुकुन्दे परमानन्दे

रागम्: केदारगौळ ताळम्: आदि

*पल्लवि*

नन्दमुकुन्दे परमानन्दे

वयमिह किमु मृगयाम

*चरणम्*

विहरति गोपे गतभवतापे कामनुसरति दुरापे
क्वचिदपनीते हृतनवनीते निजकलया सुविभाते (नन्दमुकुन्दे) ॥ १ ॥

अमृतकलायामतिविमलायां अचलविभूतिनिदाने
स्वसुखरतायामतितरळायां अनुपममिह रममाणे (नन्दमुकुन्दे) ॥ २ ॥

कृतजगदण्डे सुखचिदकण्डे सकलजगत्प्रतिभाने
श्रुतिपरिगीते महदनुभूते निजसुखसाधितमाने (नन्दमुकुन्दे) ॥ ३ ॥

नभसि सदंशे मनसि चिदंशे पश्यति विततमशेषं
प्रकृतिकृतादिं रथतुरगादौ भानसमयकृतवेषे (नन्दमुकुन्दे) ॥ ४ ॥

मनसि विलीने गतवति माने कलयति रतिमिह देवे
निजपदगतया सुकृतभिमतया सहगतनिजपरभावे (नन्दमुकुन्दे) ॥ ५ ॥

अपगतकामे जगदभिरामे जटजसमस्तविरामे
असुकृतवामे विगळितभीमे भीतपवनरविसोमे (नन्दमुकुन्दे) ॥ ६ ॥

व्यवहृतिहीने महदभिधाने बोधलयादिसमाने
प्रणवतुरीये शिवपदमेये नादलयावधिमाने (नन्दमुकुन्दे) ॥ ७ ॥

विगतकळङ्के परिहृतशङ्के गळितपरापरभेदे
विनिहतशोके कृतपरिपाके गोपवधूजनमोदे (नन्दमुकुन्दे) ॥ ८ ॥

सदसदतीतं सततविभातं केशवपदतरभावम्
अनुपरिगीतं निगमसमेतं नारायणतीर्थेनेऽदम् (नन्दमुकुन्दे) ॥ ९ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

पाणावाधाय पणिं व्रजपुरवनिता

कापि कस्याः प्रगल्भा
ग्राह्यं गृह्णन्तमन्तर्बहिरपि विततं
स्वानुभूतिप्रसिद्धम् ।
सिद्धं वेदाग्रभागे तदनुगुणनये
ब्रह्मवित्सु प्रसिद्धं
नृत्यन्ती गायतीति प्रकृतिपरतरं
मानतो दर्शयन्ती ॥१८८॥



# देवदेवं क्वेति तम्

रागम्: सिन्धुभैरवि (मध्यमावति) ताळम्: मिश्र चापु

*पल्लवि*

देवदेवं क्वेति तं मृगयामो वयमिह

*चरणम्*

दृश्यवस्तुषु दृक्तया सततं सति[५५] प्रतिभाति
प्रत्यगात्मतयापि बुद्धिषु नित्यमेव पुनाति (देव्देवं) ॥१॥

प्राणबुद्धिलयोदयावपि भासयत्यमलेन
स्वप्रकाशसुखात्मनोदयहानिधीरहितेन (देवदेवं) ॥२॥

येन विश्वपदाभिधान इहैकतामनुयाति
तत्र सर्वलये सुखैकरसे परात्मनि भाति (देवदेवं) ॥३॥

चिन्तये यदचिन्त्यरूपतयैव योगिवरेण
सन्ततं हृदयान्तरं सखि भाति धीरवरेण (देवदेवं) ॥४॥

नन्दयत्यखिलं नरं निजनित्यबोधसुखेन
छन्दसामखिलाग्रभागविनिश्चितेन समेन (देवदेवं) ॥५॥

[५५] सखि

पौरजानुपदानुगो रमते नृपो हि यथैव
प्राणभृद्यनुगस्तनौ विकृतिं विहाति [५६] विनैव (देवदेवं) ॥ ६ ॥

राजवत्फलमत्रभोगितया तनौ सुविभाति
बालवद्विगतानुरागतयाऽपि यो न विभेति (देवदेवं) ॥७॥

गोपनीयतयापि गोपवधूभिराभिरमानि
श्रीमुरान्तकभावभावनया स एव भवानि (देवदेवं)॥ ८॥

वेदभागविचारजातमतिप्रियप्रणयेन
वर्णितं शिवेरामतीर्थपदाम्बुजभ्रमणेन (देवदेवं) ॥ ९॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

मूर्तामूर्ते यदनुवितते मायया यस्य रूपे
सच्चत्यच्चेत्युभयरस इत्यागमोक्तो य आत्मा ।
नेतीत्येवं यदवति जगद्बाध्यते यस्य सृष्ट्या
सर्वं दृष्टं तमिह मृगयन्त्याह गोपी मुकुन्दम् ॥ १८९ ॥

७९ सहचरि समरसमिह

# सहचरि समरसमिह

रागम्: कांभोजि (वसन्त) ताळम्: त्रिपुट

## *पल्लवि*

सहचरि समरसमिह मृगयन्ते

## *अनुपल्लवि*

सज्जनसङ्गरता मुनयो भुवि निगमशिरस्सु कथयन्ते (सह)

[५६] विभाति

*चरणम्*

गिरितरुसागरसरिदपरात्मतया सति भाति मुकुन्दं
सुरनरखगमृगरूपितयापि विभाति चिरं सुखकन्दम् (सहचरि) ॥१॥

इह मधुमाधवमुखऋतुवत्सररूपतयापि विभाति
दिनकरतारनिशाकरपावकभूजलभावमुपैति (सहचरि) ॥ २॥

गगनमरुद्विविधात्मतयापि परात्मनि सर्वदृगंशे
अहमहमित्यनुभूतिविशेषणभूततयानुभवांशे (सहचरि) ॥ ३॥

इहमिह दृश्यमदृश्यतयात्मनि भासयति स्वविभाते
अपगतशोकभये गगनोपमदेहतयाखिलभूते (सहचरि) ॥ ४॥

जगदुपमर्दितमागमभागविचारधिया पुनरेतं
चिरमविवेकसमर्पितमात्मनि यत्र जनैरनुभूतम् (सहचरि) ॥ ५॥

धनपशुपुत्रकळत्रफलानि यदर्थतया भुवि सन्ति
स्वयमपरोक्षतया सकलस्य महत्युपलब्धरि भाति (सहचरि)॥ ६॥

सकलजगन्मधुनिस्वयमव्ययबोधतया सुविभाते
अमृतरसे जगदि व्ययमेति सदात्मतयाप्यनुभूते (सहचरि) ॥७॥

व्रजयुवतीजनवल्लभभावमुपेयुषि नवजलदाभे
नवरसशालिनि शुभवनमलिनि कामितकनकलताभे (सहचरि)॥ ८॥

मुररिपुभावरसाभिनिवेशजनान्तरभूषणभूतं
अतिगत[५७]बोधनिदानमिदं शिव नारायण यतिगीतम् (सहचरि) ॥ ९॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

मधुत्वेन च यः सिद्धः भूतिभौतिकवर्गयोः ।
सोऽयं साक्षात्परानन्दः सहचर्यानुवर्त्यते ॥१९०॥

---

[५७] कृत

*अथ राधामाधवसंवादः कथ्यते ॥*

८० कळभगतिशोभ

## कळभगतिशोभ

रागम्: मध्यमावति (नाथनामक्रिया)     ताळम्: झम्पे

राधा
कळभगतिशोभ घनकाळमेघाभ
कलय मम रहसि कुतुकनि सुबहूनि ॥

कृष्णः
कलहंसकामिनि तदैव करवाणि
कथयसि यदा सपदि कथय परमद्य ॥

राधा
विमलकल्याणगुण विविधविश्वात्मन्
विगळितदुकूलमथ रचय मम सुदृढम् ॥

कृष्णः
बाढं अबले तव दृढं विरचयामि
हाटकदुकूलमायाहि तरुमूलम् ॥

राधा
रचय मृगमदतिलकमतिललितमद्य
कुचकुम्भयुगमपि सकुंकुमविलेपम्[५८] ॥

कृष्णः
रचयामि तिलकमपि तव ललितफाले
कुचकुम्भयुगळेऽपि कुङ्कुमविलेपनम् ॥

---

[५८]सकुङ्कुमपङ्कम्

राधा
गळितकचनिचयमथ घटय मम कृष्ण
गमय मामिह रहसि केशव कृपालो ॥

कृष्णः
एहि मम हृदयकुतुकं कलय राधे
इह समुपविश रहसि देहि मुदमद्य ॥

राधा
कुसुमनिचयापचयमद्य कुरु कृष्ण
कुन्तलभरं घटय मम कुसुमभारैः ॥

कृष्णः
मम रमणि कुसुमभारैरलङ्कुर्वे
सुमशरशरासन समं तु कचनिचयम् ॥

राधा
सरसवरगण्डि सुरसालफलवर्गं
निरवधिसुखं देहि नित्यमपवर्गम् ॥

कृष्णः
निरुपमफलानि च गृहाण सरसानि
निर्विशङ्कं विहर मम हृदयरमण ॥

राधा
पानीयमानीयतां त्वया मह्यं
पातुं पिपसा हि भूयसि मम भो ॥

कृष्णः
मधुरं पयः पिब मधूनि सुबहूनि
मम वल्लभे तृप्तिरस्तु तव सुतारम् ॥

राधा

अधरसुधया मम मनोरथपयोधिं
अधिकमिह पूरय कृपापारजलधे ॥

कृष्णः

कलय वरवर्णिनि तथैव कलयामि
मिळतु तव हृदयं मदीयहृदयेन ॥

राधा

कथमनुसरामि वनभूमिषु भवन्तं
कलय सुभगाऽहमबला वह च कान्ताम् ॥

कृष्णः

अहमिह वहामि तु रमामि च सुशीले
विहितसरसालापगतमदनतापे ॥
इति कलितमिह राधिकाकृष्णचरितं
रहसि शिवनारायणानन्दयतिना ॥

✠ ✠ ✠ ✠ ✠

*गद्यम् २८*

कदाचिद् बृन्दावने शारदचन्द्र चन्द्रिका धवळित काळिन्दीपुळिने नळिननाभ चरण नळिनाङ्क रमणीयभागे विस्मृतपति पुत्र बान्धवास्तत्र गायं गायं सञ्चरन्त्यो मधुकरा इव माधवमभिलषन्त्यः विलपन्त्यश्च रहस्याराधित माधवं राधां क्वाप्युपकुञ्जं माधव विरह व्यकुलान्तरतया चोन्मादावस्थामास्थां सर्वाश्च गोपयुवत्यो ददृशुः ॥ इथं च तां ताः पप्रच्छुः ॥

८१ कथय कथय माधवम्

## कथय कथय माधवम्

रागम्: कल्याणि (आहिरि)      ताळम्: त्रिपुट

*पल्लवि*

कथय कथय माधवं हे राधे

*अनुपल्लवि*

अथ सखि कथय श्रीमधुसूदनमशेषं
विधिनावर्णितवीर्यमपरिमितविभवम् (कथय)

*चरणम्*

वनभुवि रहसि समाराधितो भगवन्
अनवद्यसुन्दराङ्गि हे राधे
घनजघनया त्वया घननीलकुन्तळश्री
वनमालि पीतवासा वसति क्व वा जगति (कथय) ॥१॥

मृगमदतिलकललित[५१]फालसुन्दरं
अगणितसुगुणमणिरत्नाकारम्
विगतमोहमखिलवेदभागविदितं
भगवन्तमाश्रितभावुकविधातारम् (कथय) ॥२॥

सरसहास परिहासं सरससकल-
मुरळीमिळितगोपवधूजनम्
अरविन्दलोचनमरिवर्गनिषूदनं
वरनारायणतीर्थवाञ्छितफलनिदानम् (कथय)॥३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

अथ चिरपरिभुक्ता शौरिणाखण्डरूपा
निजसुखपरितृप्ता ब्रह्मविद्येव गोपी ।
व्रजयुवतिभिरुच्चैः प्रार्थिता साभिलाषं

[५१]कलिततिलक

हरिपरतरभावं दर्शयन्तीदमाह ॥१९१॥

८२ हरिमेकरसाकृतिम्

# हरिमेकरसाकृतिमधुना

रागम्: धन्यासि ताळम्: त्रिपुट

*पल्लवि*

हरिमेकरसाकृतिमधुना

*अनुपल्लवि*

अवधारयतागमविधिना (हरि)

*चरणम्*

चिरतरपुरुषं प्रतिभावपुषम्
परमिह वियदादतम्
प्रशमितकलुषं भवरोगभयमुषं
प्रत्यगबेधेन तम् (हरि) ॥१॥

इदमिति सकलं जगदतिचपलम्
मायिकमधुनातनम्
परिणतिविकलं फलमिव विपुलं
कलयत परिशोधनम् (हरि) ॥२॥

विलसितमखिलं गुरुतरलीलम्[६०]
यद्वदबोधाधिकम्
क्षणमिह विदितं सत्[६१] पुनरुदितं
पश्यत पुरतो हितम् (हरि) ॥३॥

---

[६०] मरुतलसलिलम्
[६१] न तु

अनुदयविलयं प्रियतममभयं
जगदुदयादिदृशम्
यदवधिविदितं सकलमभिहितं
नियतमबोधावशम् (हरि) ॥ ४ ॥

असुकृतदुरितं फलयुगरहितं
केवलबोधात्मकम्
चिरमिह मृगितं मुनिजनविदितं
निरवधिकसुखात्मकम् (हरि) ॥ ५ ॥

यदपृथगखिलं निगमभागफलम्
भाति हि परदैवतम्
न भवति भूतं न च भावि सततम्
सुकृतिभिरिह भावितम् (हरि) ॥ ६ ॥

निरवधिविभवं नियतानुभवम्
निरुपशुभदेरितम्
फलमिव करगं सकलहृदयकम्
तय्त्वधियाखण्डितम् (हरि) ॥ ७ ॥

अवचनममितं गतलोभरतिम्
नित्यनिरस्ताखिलम्
व्रजपुरवनितागततनुममतम्
स्वात्मतैवामलम् (हरि) ॥ ८ ॥

इदमिह भणितं निगमैरनुगतं
कृष्णरसैकात्मना
हरिगुरुकृपया निगमजसुधिया
नारायणतीर्थेन (हरि) ॥ ९ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

एवं गोप्यः ततः श्रुत्वा समादाय परात्मनि ।
कृष्णे चित्तं तदाकाराकारितं मौनमास्तिताः ॥१९२॥

विस्मरन्त्यः स्वकं देहमात्ममात्रावशेषितम् ।
बालोन्मत्तादयो यद्वदात्मन्येव समहिताः ॥१९३॥

कृतकृत्यास्ततो दृष्ट्वा सर्वय्गोश्वरो हरिः ।
तासां तु पुरतः कुर्वन्नास्ते मायाविडंबनम् ॥१९४॥

मुग्धाः स्निग्धान्तरङ्गा मुरनरकरिपोः
मूर्तिमार्तार्तिहन्त्रीं
कामानां कामरूयां कलितनवरसां
कालमेघाभ्हिरामाम् ।
दृष्ट्वा हृष्टाः सुपुष्टा झटिति मुरभिदं
वेष्टयन्त्यो यथेष्टम्
त्वालिङ्गन्त्योऽनुरक्ताः श्रुतय इव पर-
ब्रह्म गोप्यो जगस्तम् ॥१९५॥

८३ नाथनाथमाकलय

# नाथनाथमाकलय

रागम्: भैरवि ताळम्: त्रिपुट

*पल्लवि*

नाथनाथमाकलय नन्दनन्दनं सखि

*अनुपल्लवि*

माधवमखिलगोपीमदनकोटिमोहनम् (नाथनाथं)

*चरणम्*

पादपल्लवकलितपद्मकलाशादिरेखं

वेदवेदान्तविदितं विपुलसुखदम्
सादरमखिललोकसाधकं तं कलय भुवन-
नाथममरेन्द्रवन्द्यनटनविनोदम् (नाथनाथं) ॥ १॥

बृन्दावनभुवि गोपीबृन्दानदसन्दोहं श्री-
कुन्दसुन्दररदनं मन्दहसनम्
इन्दिरासेव्यपदारविन्दं भक्तिमकरन्दा-
नन्दितामरभूसुरं नन्दनन्दनम् (नाथनाथं) ॥ २॥

कुटिलाळकशैवालं भ्रुकुटिभुजकं नयनशफरिं
पटुतरलावण्यरसतटिनीनायकम्
निटिलसुन्दरकस्तूरिचटुलतिलकानन्दितश्री-
घटितं नारायणतीर्थघनपरिपलम् (नाथनाथं) ॥ ९॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

उरसा मनसा दृष्ट्या परिष्वज्य मुहुर्मुहुः ।
कृतकृत्यास्तदात्मानं कृष्णं मत्वा समास्थिताः ॥ १९६॥

आत्मारामोऽपि भगवानात्मानं दर्शयन् परम् ।
ततः प्रभाते गोपीभिः सह गोकुलमागतः ॥ १९७॥

*॥ इति श्रीनारायणतीर्थयतीन्द्रविरचितायां*
*श्रीकृष्णलीलातरङ्गिण्यां*
*श्रीकृष्णरासक्रीडामहोत्सववर्णनं नाम*
*अष्टमस्तरङ्गः समाप्तः ॥*

# ॥ नवमस्तरङ्गः ॥

श्रीकृष्णमथुराप्रवेशवर्णनाभिनयः क्रियते ॥

श्लोकम्

श्रीकृष्णलीला मथुराप्रवेशाख्याऽत्र वर्ण्यते ।
कंसस्यागमनं पूर्वं देवकीवसुदेवयोः ॥

बृन्दावनेऽथ श्रीरामकृष्णयोस्तदनतरम् ॥
नारदागमनं पश्चादक्रूरागमनं ततः ॥

कंसस्यानुज्ञयाऽक्रूरागमनं कृष्णसन्निधौ ।
श्रीकृष्णदर्शनं तस्य विश्वरूपप्रदर्शनम् ।
मथुरायां प्रवेशश्च सङ्ग्रहोऽयं प्रकीर्तितः ॥

*अथ कंसागमनं नारदागमनम् ॥*

श्लोकम्

अथ निवसति तस्मिन् गोकुले वासुदेवे
व्रजयुवतिचकोरीबृन्दराकाशशाङ्के ।
इति कथयति कंसं नारदे कृष्णवृत्तं
भयविकलितचेताः प्राह कंसोऽपि दूतान् ॥ २०२॥

मन्त्रिभिर्मन्त्रयित्वाऽथ धनुर्यागचिकीर्षया ।
अक्रूरं चोदयामास कंसस्त्वानयने तयोः ॥ २०३॥

*दरु २५*

रागम्: नाथनामक्रिया     ताळम्: आदि

एकान्तभक्तिसंयुक्तः श्रीकान्ते देवकीसुते
लोकानुग्रहाय सर्वलोकाक्रूरो विराजते ॥ ॥

*अथ अक्रूरं प्रति कंसवचनम् ॥*

श्लोकम्

मयि द्वेषो दोषः खलु जगति तेषां खलजुषां
महान् रोषोमेऽद्य प्रसरति सर त्वं ति झटिति ।
तनुर्याकव्याजादथ मधुरिपुं रामसहितं
नयास्मत्सन्देशादिह मम सखेऽक्रूर सुमते ॥ २०४ ॥

*अथ कंसं प्रति अक्रूरवचनम् ॥*

श्लोकम्

महाराज श्रीमन् जगति महिमा ते विजयते
तथा कुर्वेऽहं त्वं वदसि तु महाराजतनय ।
अमोघं तद्वीर्यं बलमपि च लोके सुविदितं
विधेः सङ्कल्पः किं फलयति न जाने त्वयि परम् ॥ २०५ ॥

*अक्रूरं प्रति कंसवचनम् ॥*

श्लोकम्

अक्रूर त्वरया गत्व[६२] रामकृष्णाविहानय ।
बृन्दावनं धनुर्यागच्चलेन मम तौ रिपू ॥

[६२] गच्छ

*गोकुलं प्रति अक्रूरागमनम् ॥*

श्लोकम्

अक्रूरो गोकुलं गच्छन् मध्ये मार्गं मुहुः स्मरन् ।
कृष्णस्य गुणरत्नानि गायं गायं यथाविति ॥

८४ द्रक्ष्यामि गोकुलनिलयम्

## द्रक्ष्यामि गोकुलनिलयम्

रागम्: मध्यमावति ताळम्: आदि

### *पल्लवि*

द्रक्ष्यामि गोकुलनिलयं गोपीमाधवम्

### *अनुपल्लवि*

प्रक्षीणकल्मषयोगिप्रत्यक्षदैवं नूनम् (द्रक्ष्यामि)

### *चरणम्*

पातकारण्यकुटारपादपङ्कजं शुद्ध-
पादजसलिलपूतभक्तसमाजम्
केतकीचम्पकतुळसीललितवारिजश्रितं
केवलानन्दैकभावं गळितमोहजं नूनम् (द्रक्ष्यामि) ॥ १ ॥

पक्षिमृगबृन्दमिह याति दक्षिणं पथि
पश्यामि पूर्णकलशं भद्रलक्षणम्
अक्षीणशङ्खवीणादिनादमोक्षणं पर-
मद्य शृणोमि मधुरमखिलवरक्षणं नूनम् (द्रक्ष्यामि) ॥ २ ॥

चन्द्रवदनं सुन्दरं मन्दहसनं चारु
चम्पकनासमरुणारविन्दलोचनम्

नन्दनन्दनममररचितवन्दनं भूरि-
नन्दित नारायणतीर्था नन्दरसघनं नूनम् (द्रक्ष्यामि) ॥ ३ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

गत्वाथ यमुनां तस्याः पुळीनं ददृशे मुदा ।
श्रीहरेः चरणांभोजध्वजवज्रादिचिह्नितम् ॥ २०८ ॥

*अथ अक्रूरवचनम् ॥*

श्लोकम्

कळिन्दकन्यालहरीह धन्या
कळिन्दजायाः पुळिनं च धन्यम् ।
मिळन्मुकुन्दस्य पदारविन्द-
प्रसादभाग्योदयतः प्रसन्ने ॥ २०९ ॥

अहं च धन्यो यमिबृन्दमान्यो
यद्द्वहस्याङ्घ्रिसरोजचिह्नम् ।
पश्यामि यस्मादिति तत्वदर्शी
गायत्यथाक्रूरपदाभिदेयः ॥ २१० ॥

८५ धन्यधन्योऽहं जगतीतले

## धन्यधन्योऽहं जगदीतले

रागम्: पुन्नागवराळि ताळम्: चापु

*पल्लवि*

धन्यधन्योऽहं जगतीतले धन्यधन्योऽहम्

*अनुपल्लवि*

धन्यधन्येयं काळिन्दी धन्यमेव काळिन्दीपुळिनम्

*चरणम्*

श्रीहरिचरणाम्भोजविलसितमतुलं सङ्गत-
श्रीनिवासपुङ्गवं देहधारिणमतिदृष्टिरमणीयम्
गेहबान्धवपश्वादिगेहिनीपुत्रधनादौ
मोहपाशविमोचनं मुहुरपि दृश्यते (धन्य) ॥१॥

गोपगोपीजनबृन्दं गोकुलजन्तुकदम्बं
पापतापादिविहीनं परमपावनम्
श्रीपतिदृग्विलासितं श्रेयसाममितास्पदं
रूपयौवनसम्युतं रुचिरमिहाद्य पश्यामि ॥२॥

शङ्खचक्रवज्रपद्मचारुपताकदि-
रेखाङ्कितानि भुवि दृश्यन्ते अद्य नूनम्
पङ्कजनाभस्य यदुपुङ्गवस्य चिह्नानि शिव-
नारायणतीर्थशंसितं हरिपुरुकृपया ॥३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

श्रीहरिचरणसरोजे हृदयसरोजे निधाय भूयोऽपि ।
गायति नन्दकुमारं सम्बोध्यानन्यभक्तियुक्तात्मा ॥२११॥

८६ भावये हृदयारविन्दे

# भावये हृदयारविन्दे

रागम्: बिलहरि ताळम्: आदि

*पल्लवि*

भावये हृदयारविन्दे तावक पदारविन्दे

*अनुपल्लवि*

देवगन्धर्वादिबृन्दसेवित मामव मुकुन्द (भावये)

*चरणम्*

सकललोकनायक साधुजनतारक
मधुरकेतुजनक मायाधारक
विकटारिविदारक वेदसमुद्धारक
विकृतभयवारक विपुलसुखदायक (भावये) ॥ १ ॥

कनकमयदुकूल कलितकल्याणजाल
मुनिमानसानुकूल मुरळीलोल
विनयादिगुणशील वेदपुरणादिमूल
वीर विजयगोपाल विगतशोकादिमूल (भावये) ॥ २ ॥

काळिन्दीतटविहार करुणारससागर
मिळितगोपीनिकर मेरुसमधीर
कळीयमदहार कंसाधिभयङ्कर
गोकुलश्रीमन्दिर कोटिकामसुन्दर (भावये) ॥ ३ ॥

भक्तजनसंरक्ष परमकरुणवीक्ष
सक्तजनसुशिक्ष साधुजनपक्ष
रक्तकमलपत्राक्ष रमणीयचरण दक्ष
भक्त नारायणतीर्थ भवभयबन्धमोक्ष (भावये) ॥ ४ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

बृन्दावने गवां मध्ये गोपमण्डलमध्यगम् ।
दृष्ट्वाऽक्रूरः प्रणम्याथ भक्त्या प्रार्थयते हरिम् ॥ २१२ ॥

श्रीनन्दगोपतनयाखिलविश्वमूर्ते
श्रीमत्पयोधितनयाधव कृष्णमूर्ते ।
आनदयाखिलमशेषजगन्निधान
मीनाङ्ककोटिसमसुन्दर शुद्धकीर्ते ॥ २१३॥

*अक्रूरप्रार्थना ॥*

८७ नन्दगोपाल् कृष्णा

# नन्दगोपाल कृष्णा

रागम्: कांभोजि    ताळम्: आदि

*पल्लवि*

नन्दगोपाल कृष्णानन्दयाखिलम्

*अनुपल्लवि*

श्रीचन्दनकुङ्कुमतुळसीचाम्पेयादिसुगन्धिताङ्ग (नन्दगोपाल)

*चरणम्*

अजयार्चितलोक आगमबृन्दमानक
जगदार्तिनिवारक भद्रदायक
अजित लोकनायक आदित्यादिशासक
विजितासुरनायक विश्वमङ्गळकारक (नन्दगोपाल) ॥ १॥

गोपाङ्गनामण्डल गोगोपपरिपाल
तापसजनजाल तारकागममूल
श्रीपतेऽनन्दलील शृङ्गारकृपालवाल
श्रीवत्सचिह्नादिमूलकारणमूर्ते (नन्दगोपाल) ॥ २॥

अतुलकरुणासार अखिलजगदाधार

धृतदिव्यपीताम्बर दिव्यसुन्दर
हृतनवनीतोदार हृदयनिहितेन्दिर
श्रितभक्तमन्दार[63] श्रीवत्सकौस्तुभधर (नन्दगोपाल) ॥ ३ ॥

सन्ततानन्दकर साधुजननिकर-
चिन्तितार्थद धीर चिन्मयामर वीर
सत्यकामादिचतुर संसारपारावार
नित्यनिगमशिखरनियतविहार (नन्दगोपाल) ॥ ४ ॥

व्यत्यस्ताङ्घ्रिकमल विमलमणिकुण्डल
प्रत्यस्तमोहजाल प्रत्यगखिल
नित्यमुक्त निर्मल निखिलनिगममूल
भृत्यजननुकूल भ्राजद्गोकुलसुलील (नन्दगोपाल) ॥ ५ ॥

वैजयन्तिशोभित वामदेवादिसेवित
निजभक्तसुविधित नित्यकल्याणचरित
ऋजुमानसललित ऋग्यजुस्सामगीत
व्रजनारीपरिवृत विश्वविख्यात (नन्दगोपाल) ॥ ६ ॥

देवादिकृतमोद दिव्यमुरळीनाद
भाविताखिलवेद भव्यभक्तवरद
श्रीवसुधाविनोद श्रितजनमोक्षप्रद
शिव नारायणतीर्थ सेवितपाद (नन्दगोपाल) ॥ ७ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

मुहुर्मुहुर्नमन्नमन् मुकुन्दपादपद्मयोः
महन्महन्महीयसां प्रभो मम प्रबोधय ॥ २१४ ॥

इति स्वयंप्रभं प्रभुं हृदा हरिं स्मरन् गुणान्

[63] श्रितजनसन्तार

स गद्गदस्वरेण तत्समीपगोऽस्तुवन्मुदा ॥ २१५ ॥

मायामानुषदेही माधवनामाभिवाद्य तं सबलः ।
तेनालिङ्गितमूर्तिः सुररिपुवृत्तं तदुक्तमथ वेद ॥ २१६ ॥

अक्रूरो रामकृष्णाभ्यान्यवसद् गोकुले सुखम् ।
अथोत्थितो रात्रिशेषे समुत्थापयति स्म तौ ॥ २१७ ॥

८८ हे राम हे कृष्ण

# हे राम हे कृष्ण

रागम्: भूपालम् (मलहरि) ताळम्: झंप

*पल्लवि*

हे राम हे कृष्ण इह समुत्तिष्ठ

*अनुपल्लवि*

हे राम हे कृष्ण हे जगत्रयगुरो
हे पुण्डरीकाक्ष रक्ष निजपक्षम् (हे)

*चरणम्*

प्राचीगिगङ्गना परिहसति हे कृष्ण
पतियोगपरमसौभाग्यमहिता
प्राचीनवैरस्यमभिनयन्त्यथ सा
प्रतीचीं दिशं राम काममुदिता (हे राम हे कृष्ण) ॥ १ ॥

नळिनमुकुळोदरविदळनगळिताळयो
ललिततररविनिह्नुतान्ततिमिराः
मिळितनवनळिनपरिमळबहुळमकरन्द-
कलनया विचरन्ति काममुखराः (हे राम हे कृष्ण) ॥ २ ॥

दधिमथनसञ्जातमधुरतरसङ्गीत-
बुधजनागमघोषरम्यघोषम्

मधुमथन सङ्कलय माधव विधीन्द्रनुत-
पदकमल पद्माकृताभिलाषम् (हे राम हे कृष्ण) ॥ ३॥

भूपालदेशाक्षिदेवगान्धारिशुभ-
बिलहरी[६४]वसन्तमुखरागबृन्दम्
गोपिका गायन्ति गोविन्द तव तु शुभ-
गुणरत्नबृन्दमानदकन्दम् (हे राम हे कृष्ण ) ॥ ४॥

कलित[६५]नवमल्लिकाकुसुमानि विकसन्ति
काममिह तारकाबृन्दममितम्
ललितवचसाऽक्रूरकलितमिति गुरुभक्त-
नारायणानन्दतीर्थरचितम् (हे राम हे कृष्ण) ॥ ५॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

व्यतीतायां स तद्रात्रौ सबलं बलिनां बलम् ।
आरोप्य स्यन्दनं तूर्णमक्रूरोऽश्वानयूयुजत् ॥ २१८॥

स्यन्दने वसति नन्दनन्दने
चन्द्रमण्डलसमानने घने ।
मन्दहासरमणीयचन्द्रिका-
सुन्दरं जगुरिमा हि गोपिकाः ॥ २१९॥

८९ अक्रूरो नयति

# अक्रूरो नयति

रागम्: कल्याणि ताळम्: आदि (त्रिपुट)

---

[६४]मलहरी
[६५]ललित

*पल्लवि*

अक्रूरो नयति मथुरामच्युतमिह सखि सुतराम्

*अनुपल्लवि*

स क्रूरो मायावी तस्य तु साहसमथ सखि पश्य (अक्रूरो)

*चरणम्*

बृन्दावनचन्द्रमसं निजजनचन्दनमिन्द्रनुतं
नन्दनन्दनमानन्दितविधिमुखबृन्द-
मनिन्दितस्यन्दननियतम् (अक्रूरो) ॥१॥

सबलं गोपीजनहृदयाम्बुजसवितारं
सहसाकबळितनवनीतम्
अखिलागमकारणमसुरविदारणमीशम् (अक्रूरो) ॥२॥

सम्सारार्णवतारकविजयगोपलकमखिलगुरुं
कंसरिपुं शिव नारायणतीर्थ-
कलितमिदं कविहृदय विनोदम् (अक्रूरो) ॥३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

बलेन सहितं कृष्णमक्रूर स्यन्दने स्थितम् ।
मथुराभिमुखं दृष्ट्वा गोपिका कापि गायति ॥२२०॥

९० स्वामिनं वनमालिनम्

## स्वामिनं वनमालिनम्

रागम्: सावेरि ताळम्: अट (त्रिपुट)

*पल्लवि*

स्वामिनं वनमालिनं सखि कलय

*अनुपल्लवि*

श्रीमहोन्नतश्रीवत्सकौस्तुभं
विमलं कामदविजयगोपालम् (स्वामिनं)

*चरणम्*

सुन्दरं सत्यसुखबोधरसिकं
सोमवंशजलधिपूर्णसोमम्
नन्दनन्दनमिह परमानन्दस्यन्दने
नन्दयोगिनुतं सखि
सुरनरकिन्नरवरमुनिपरिगीतं
सरसगुणार्णवंसकलगुरुं मम (स्वामिनं) ॥१॥

अधरबिम्बसमर्पितमुरळी-
मधुरगीतसरसामृतभरितम्
मधुरिपुं सखि माधवमिह पश्य
माथुरीभाग्यभरमन्दहासम्
शक्रदिसन्नुतपदमिह
वक्रकुन्तळभरं रत्नाभरणम् (स्वामिनं) ॥२॥

भद्रदं कलय सखि बलभद्रं
भव्ययोगदळितमोहनिद्रम्
अद्रिराजधीरमरिवर्गरुद्रं
अच्युतेन सहितं सुख मुद्रम्
शिव नारायणतीर्थ सेवितमनुपम-
भव्यमुक्तामणिभवनविहरणम् (स्वामिनं) ॥३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

मथुरागमनोत्साहं माधवं वल्लवाङ्गनाः ।

मङ्गळान्याचरन्त्यस्तं जगुस्तस्य जयेच्छया ॥ २२१॥

९१ विजयगोपाल ते मङ्गळम्

# विजयगोपाल ते मङ्गळम्

रागम्: सुरटि ताळम्: आदि (चापु)

*पल्लवि*

विजयगोपाल ते मङ्गळम् जय
विश्वंभर ते मङ्गळम् (विजयगोपाल)

*चरणम्*

नन्दयशोदानन्दन सुन्दर
मन्दस्मित धृतमन्दर
नन्दसुनन्दादिवन्दितपादार-
विन्द गोविन्द जय मङ्गळम् (विजयगोपाल) ॥ १॥

चारुकदम्बकतरुमूलाश्रित
चञ्चलमणिमयकुण्डल
दारुणवैरिसंहरणपराक्रम
दासपोषण ते मङ्गळम् (विजयगोपाल) ॥ २॥

चन्दनचम्पकतुळसीकल्पक-
शीतळवनसञ्चारिणे
वाचामगोचरचरितसदानन्द
वासुदेवाय ते मङ्गळम् (विजयगोपाल) ॥ ३॥

गोपीमण्डलगूढ परानन्द
गोविन्द गोकुलनायक
आपदुद्धारकाखिलजनाधार
तापहरण ते मङ्गळम् (विजयगोपाल) ॥ ४॥

वर्धितगोबृन्द वनमालिन् गो-
वर्धनगिरिधर वमन
तीर्थीकृतशिव नारायणतीर्थ-
मानससारसमन्दिर (विजयगोपाल) ॥ ५ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

अक्रूरो रामकृष्णाभ्यां मथुराभिमुखं व्रजन् ।
आचरन्यामुने स्नानं सलिले दृष्टवान् हरिम् ॥ २२२ ॥

मुहुर्मुहुस्स्यन्दनस्तं सलिलस्तं हृदि स्थितम् ।
दृष्ट्वा सर्वात्मकं कृष्णं प्राह चेदं स तत्ववित् ॥ २२३ ॥

९२ जाने भुवनसृष्टिचातुरी

# जाने भुवनसृष्टिचातुरी

रागम्: तोडि ताळम्: आदि (त्रिपुट)

*पल्लवि*

जाने भुवनसृष्टिचातुरीदुरीणम्
गोनिकेतनं विजयगोपालमखिलशरणम् (जाने)

*चरणम्*

सकलहृदयकमलसवितृकोटिप्रकाशं
सलिलादिभावमध्यसङ्गमपूरिताशम्
प्रकटमेव फणीन्द्रप्रकरशयनदेशं
प्रत्यगभिन्नमखिलपरमानन्दनिवेशम् (जाने) ॥ १ ॥

निगमसारनिचयनित्यविधितभावं
सुगुणमणिसमूहसूत्रसत्स्वभावम्

अगणितजगदन्तरात्मानममितविभवं
खगमृगसुरनरादिघननामरूपमभवम् (जाने) ॥ २॥

नन्दादिव्रजजनानन्दघनभागदेयं
कन्दर्पशतकोटिकलितकान्तिकायम्
नन्दितयोगिनिचयं नारदादिमुनिगेयं
बृन्दावनविहारं बद्धमायूरवलयम् (जाने) ॥ ३॥

अवनिमण्डलतिलकमच्युतमखिलजनकं
नवनवनीतरसिकं नमदभयदायकम्
भवभयनिवारकं भव्यमुक्तिनायकं
शिव नारायणतीर्थ सिद्धानन्ददायकम् (जाने) ॥ ४॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

दृष्ट्वाथ मथुरां रामं नगरीं सुरनागरीम् ।
आह चेदं महोत्साहं माधवो मधुरं वचः ॥ २२४॥

९३ राम मथुरानगरि रम्या

# राम मथुरानगरि रम्या

रागम्: सौराष्टम् ताळम्: चापु

*पल्लवि*

राम मथुरानगरि रम्या

*अनुपल्लवि*

हेमगोपुरप्राकारा हीरकोटीरसंभारा (राम)

*चरणम्*

सौधचन्द्रशालाजालसोमरविलीलालोला
माधुरी बालामरखेला महनीयविभूतिविशाला (राम) ॥ १ ॥

नवनवमणिश्रेणी नागरमणिमनोहारिणी
अवनीसुरहारिणी अमरमणिपरिवारिणी (राम) ॥ २ ॥

कळिन्दगिरिनन्दिनी कल्लोललोलपद्मिनी
मिळितहम्सममालिनी मीनाङ्कराजराजधानी (राम) ॥ ३ ॥

अब्जयोनिकृत्यातीताखिलसंपदोपेता
लब्धविद्यावादाध्युषिता लक्षणलक्षितसहिता (राम) ॥ ४ ॥

माधवसुगीतमिदं महितबलराममोदम्
बाधितसम्सारखेदं भव्य नारायणतीर्थ सुखदम् (राम) ॥ ५ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

उपवन वनजेषु हंसमालाः
मुनिरिव मानसनिस्पृहास्तु यस्याः ।
निरवधिसुखमात्रलग्नचित्ताः
कथमपि बाह्यमनुस्मरन्ति नैव ॥ २२५ ॥

अवतीर्य रथात्तूर्णमक्रूराधिष्ठितात् प्रभुः ।
मथुराराजमार्गेण पद्भ्यामेव शनैययौ ॥ २२६ ॥

*॥ इति श्रीनारायणतीर्थयतीन्द्रविरचितायां*
*श्रीकृष्णलीलातरङ्गिण्यां*
*श्रीकृष्ण मथुराप्रवेशवर्णनं नाम*
*नवमस्तरङ्गः समाप्तः ॥*

# ॥ दशमस्तरङ्गः ॥

कंसनिर्हरनं

*कंसवधवर्णनाभिनयः क्रियते ॥*

श्लोकम्

श्रीकृष्ण चरितं कंसवधाख्यमभिनीयते ।
कंसस्यागमनं पूर्वं देवकीवसुदेवयोः ॥ २२७ ॥

मधुरानगरीवीथ्यां रजकातेर्विनिग्रहः ।
कुब्जाद्यनुग्रहश्चाथ मल्लमातङ्गमर्दनम् ॥ २२८ ॥

कंसासुरवदश्चाथ पित्रोर्दर्शनमादरात् ।
सङ्ग्रहोऽयं चरित्तेऽस्मिन् कथितः सावधारणम् ॥ २२९ ॥

## *गद्यम् २९*

तौ खलु रामकृष्णौ स्फुटतर नीलपीत दिव्य सुन्दर परिधानौ मध्यभाग समभिव्यक्त[६६] सरस्वती विलसित सितासित सरिद्वर संयोग समुल्लसित विचित्र कान्ति तिरस्करणप्रवीणौ[६७] सत्पथ पथिक परिश्रान्ति विराम रमणीय मुनिवर मनोहंसश्रेणी समाश्रय करचरण वदननयन नाभीसरसीरुह संपत्सरिद्वर कान्तिकायौ तुङ्गप्रसाद शृङ्गसङ्गत चन्द्रकान्त मणिगण शशाङ्क संयोग समुद्गळित ललिततरामृत संसिक्त रमणीय सैकत माथुरा राजमार्गगामिनौ विचित्र वनमालिनौ मानिनीजनमोहनौ सरळ मुरळीगीत सुधासमुद्बोधित सुरकिन्नरादि वारवनिता मनोमय राजहंसगणौ सत्यकामादि गुणौ सकललोक संरक्षणप्रवीनौ मथुरापुरनिवासि भाग्यपरिभाग विशेषलक्षणौ सुरनरनागरी गुरुतर गीतसुधा समाराध-नानन्दितौ दुर्मदमद विभङ्ग तुङ्ग धैर्य वीर्य गांभीर्यभावौ परिगृहीत गोपकुमारभावौ महानुभावौ दृष्ट्वा मुहुर्मुहुः सन्तुष्टास्तत्रत्य जनाव भूवुः ॥

[६६]मनभिवुअक्त
[६७]तिरस्क्रियाप्रवीणौ

श्लोकम्

आयान्तं राजमार्गेण मथुरापुरियोषितः ।
आश्चर्यरूपसंपन्नमाश्चर्यं सबलं जगुः ॥ २३० ॥

९४ नन्दनन्दनं निजभक्तचन्दनम्

# नन्दनन्दनं निजभक्तचन्दनम्

रागम्: आनन्दभैरवि    ताळम्: आदि

*पल्लवि*

नन्दनन्दनं निजभक्तचन्दनं आकलय

*चरणम्*

नन्दादिमुनीन्द्रभाव्यानन्दमाळि कलय (नन्दनन्दनं) ॥ १ ॥

सुन्दराननचन्द्र श्रीमन्दिरमाकलय (नन्दनन्दनं) ॥ २ ॥

शृङ्गाररसप्रवाह श्रीनिधिमाकलय (नन्दनन्दनं) ॥ ३ ॥

भ्रूभङ्गकटक्षलक्ष्यभूरिकरुणमाकलय[६८] (नन्दनन्दनं) ॥ ४ ॥

सर्वलावण्यतटिनीसागरमाकलय (नन्दनन्दनं) ॥ ५ ॥

कळभसुन्दरगमन कलितललितामाकलय[६९] (नन्दनन्दनं) ॥ ६ ॥

परिजनरक्षणबद्धपरिकरमाकलय (नन्दनन्दनं) ॥७ ॥

विजयगोपालमतुलविख्यातमाकलय (नन्दनन्दनं) ॥ ८ ॥

बलभद्रभद्रदबाहुबन्धमिहाकलय (नन्दनन्दनं) ॥ ९ ॥

मथुरामानिनीजन मनसिजमाकलय (नन्दनन्दनं) ॥ १० ॥

---

[६८] भूरिकरुणामळि
[६९] कलितलीलमाळि

शिव नारायणतीर्थ सेव्य दिव्यपदमाकलय (नन्दनन्दनं) ॥ ११ ॥

✠ ✠ ✠ ✠ ✠

*अथ रजकनिग्रहो वस्त्रापहरणश्च मालाकारानुग्रहः ॥*

श्लोकम्

हरन्तं राजवस्त्राणि चरन्तं चारुदर्शनम् ।
निरन्तरपरानन्दसदनं कलयाळि तम् ॥ २३१ ॥

*कुब्जागमनम् ॥*

दरु *26*

रागम्: नाथनामक्रिया    ताळम्: आदि

कुब्जा समायाति गोविन्दचित्ता
अब्जयोनिचातुर्यसर्वस्वभूता
उज्वलविचित्रभूषणोज्वलकज्जलनेत्रशोभिता
कस्तूरीफाला करधृतकस्तूरिचन्दनादिसऽम्भारा ॥

श्लोकम्

क्वापि कुब्जां सुनेत्राब्जामब्जनाभो विलोक्य ताम् ।
प्रातिलोम्यगिरां सारैः प्रहसन्निदमाह सः ॥ २३२ ॥

# काममोहिनि कथय

रागम्: पन्तुवराळि ताळम्: रूपकम्

## *पल्लवि*

काममोहिनि कथय निन्नु नाम ते पदम्

## *अनुपल्लवि*

कोमळाधरकरपदपल्लव
कुमुदबन्धुवदनकुन्तलजाले (काममोहिनि)

## *चरणम्*

तन्वङ्गितावक तनुरियमार्जवमति-
वहति सुन्दरमनदकारिणि
अन्वहमभिनवयौवनघनवन-
माचरसि भुवनजनमनोहारिणि (काममोहिनि) ॥१॥

चन्दनमृगनाभिचंपकादिकुसुम-
गन्धसुगन्धितगगनदिङ्मण्डले
कन्दर्परथिरथकल्पितशुभगात्रि
कलहंसभाषिणि कल्याणशीले (काममोहिनि) ॥२॥

तव रूपमन्वर्थनामविदितमिह भुवि
पौरजानपदैरपि विपुलम्
शिव नारायणतीर्थ शिवगीतमिदमिह
भवभञ्जनमभयदमतुलम् (काममोहिनि) ॥३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

हसन्तं वदन्तं समीपे वसन्तं
मुहुः संस्मरन्ती ततः प्राक्तनं तत् ।
परप्रेमभक्त्या प्रभुं प्रार्थयन्ती
स्वयं प्राह चेदं वचः साधु कुब्जा ॥ २३३॥

९६ एहि एहि विजयगोपाल

# एहि एहि विजयगोपल

रागम्: सौराष्ट्रम् ताळम्: आदि

*पल्लवि*

एहि एहि विजयगोपाल
मां पाहि पाहीह मां पालय लोकपाल (एहि एहि)

*चरणम्*

भुवनसुन्दर चारुवदन देव
भूरिकृपालय भूमाभिधान
सवितृमण्डलकोटिभास
संसृतिदृढपाशबन्धविदळन (एहि एहि) ॥ १॥

गोपरमणीजाररमण गोविन्द
गुण मणिगणवराभरण
पापासुरबृन्दनिर्हरण परम-
पावनचरित पातकहरण (एहि एहि) ॥ २॥

गन्धमाल्यादिगृहाण गळितभव
फणीन्द्रगरुडविहरण
सुन्दर मम देहि रमणं सुखय
मामिह देव मम भव शरणम् (एहि एहि) ॥ ३॥

कलितकस्तूरिकातिलक देव
करधृतमुरळीकळनिनदरसिक
बलजितसुरवैरिगणक देव
बद्धमायूरपिञ्छ वनजबीजप्रचयक (एहि एहि) ॥ ४ ॥

परिपूर्णानन्दसमुद्र देव
पाप महाटवीपावकरौद्र
परिजनकृतबहुभद्र देव
वर नारायणतीर्थ धृतबोधमुद्र (एहि एहि) ॥ ५ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

सर्वाङ्गसौन्दर्यसुधापगायां
अपारसंसारविशोधिकायाम् ।
कंसद्विषस्तस्य सुखं चरन्ती
कुब्जा मनोवृधिरतन्निवृत्ता ॥ २३४ ॥

आकर्ण्य कुब्जावचनमाश्चर्यं तामनिन्दिताम् ।
अकरोत्करसंस्पर्शादमरीं सुन्दरीं हरिः ॥ २३५ ॥

रिरंसया तेन साकं कुब्जा सा काममोहिता ।
पीतम्बरधरं श्यामं मधुरं प्राह माधवम् ॥ २३६ ॥

९७ माधव मे रतिं देहि

# माधव मे रतिं देहि

रागम्: कापि (भैरवि) ताळम्: त्रिपुट

*पल्लवि*

माधव मे रतिं देहि नाथ नाथ

*अनुपल्लवि*

मधुराधरकन्येयं माननीया त्वया नूनम् (माधव)

*चरणम्*

दीनजनदयाघन देवकीवरनन्दन
मानिनीमानभञ्जन मदनमदन
मुनिमनोनिकेतन मोहतिमिरनिधन
कनकमयपरिधान कलितनिखिलभुवन[७०] (माधव) ॥ १ ॥

न त्यजामि चेलाञ्चलं नाथ तव सुरतिमूलं
अतिनीलघनसुन्दरं आनन्दलीलम्
सत्यमाशासे गोपालं सर्वकामादिगुणजालं
भृत्यवर्गपरिपालं बलभद्रानुजं बालम्[७१] (माधव) ॥ २ ॥

तरणिकोटिकिरण तामसगुणनिर्हरण
तारकमुक्ताभरण दासपोषण
दुरितदुर्जनगण दोषरहितचरण
वर नारायणतीर्थ नामरूपनिर्वहण (माधव) ॥ ३ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

प्रार्थितस्त्वनया कृष्णस्तां समाधाय सत्वरम् ।
बलात्कुवलयापीडं कुञ्जरं निजघान सः ॥ २३७ ॥

हत्वा मुष्टिकचाणूरौ धनुर्भङ्गं विधाय च ।
साग्रजो मातुलसभां प्रविष्टो गीयतेऽमरैः ॥ २३८ ॥

---

[७०] कलिताखिलभुवन
[७१] अतिबालम्

# अवलोकयत श्रीगोविन्दम्

रागम्: सावेरि (शङ्कराभरणम्) ताळम्: त्रिपुट

## *पल्लवि*

अवलोकयत श्रीगोविन्दम्

## *अनुपल्लवि*

नवजलधरश्यामं नन्दितबलरामम् (अवलोकयत)

## *चरणम्*

भुवनसुन्दराकारं भूरिकरुणाकरं
अवनीभारसुरारिविदारम्
नवमुक्तामणिहारं नानाविधविहारं
ध्रुवपदविधातारं दुरितसंसारपारम् (अवलोकयत) ॥१॥

मल्लचाणूरनिधनं मत्तमातङ्गमथनम्
फुल्लपङ्कजदळसन्निभनयनम्
वल्लवाङ्गनमदनं वासुदेवाभिधानं
कल्लोलमालिशयनं कंसकुञ्जरकेसरिणम् (अवलोकयत) ॥२॥

एकान्तभक्तदैवतं यादवाभिसमुदितं
श्रीकरकोलनगरीश्रीभूमिसहितम्
विकटमोहरहितं विजयगोपलमसितं
नाकनगरीगीतं नारायणतीर्थरचितम् (अवलोकयत) ॥३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्
अवरुह्यासनाद्वीरः कंसो रङ्गगतः खलः ।

संयुद्ध्य सह कृष्णेन स्मरन् प्राग्देवभाषितम् ॥ २३९ ॥

हतः कंसारिणा कंसः संसारभयहारिणा ।

शौरिणा हरिण युद्धे जगस्तं सुरभूसुराः ॥ २४० ॥

९९ पाहि मां पाहि माम्

# पाहि मां पाहि माम्

रागम्ः सुरटि (भूपाळम्) ताळम्ः त्रिपुट

### *पल्लवि*

पाहि मां पाहि मां परमकृपालो

### *अनुपल्लवि*

देहि मे त्वयि देव देव रतिम् (पाहि मां)

### *चरणम्*

असुरसंहार श्रीविजयगोपाल
अमरसंरक्षण श्रीविजयगोपाल
वसुदेवतनय श्रीविजयगोपल
वासवादिनुत श्रीविजयगोपाल (पाहि मां) ॥ १ ॥

सङ्गीतलोल श्रीविजयगोपाल
सद्गुणशील श्रीविजयगोपाल
शृङ्गाररसपूर[७२] श्रीविजयगोपाल
श्रितजनपाल श्रीविजयगोपाल (पाहि मां) ॥ २ ॥

धीरगुणोदार श्रीविजयगोपाल
धेनुकादिहरण श्रीविजयगोपाल

---

[७२]पोष

नारदमुनिगेय श्रीविजयगोपल
नारायणतीर्थ श्रीविजयगोपाल (पाहि मां) ॥ ३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्
मथुरायं हते कम्से माधवेन महात्मना ।
ववर्षुः पारिजातादि पुष्पपाण्याकाशततः सुराः ॥ २४१॥

अनतकल्याणगुणाभिरामौ
दुरन्तसंसारतमो इरामौ ।
निरन्तरं संस्मरतोस्स्वपित्रो-
रथान्तिकं संयगवाप्तवन्तौ ॥ २४२॥

परिष्वज्याङ्कमारोप्य मूर्ध्न्युपाग्राय सादरं ।
देवकीवसुएवौ तावाशिषं चक्रतुर्मुदा ॥ २४३॥

जगतीपतिरपि भगवन् यदुपति
बन्धुस्सुबन्धुतखिलात्मा ।
हरिरथ मथुरानगरी नरपति-
मामन्दयन् स तत्रास्ते ॥ २४४ ॥

*॥ इति श्रीनारायणतीर्थयतीन्द्रविरचितायां*
*श्रीकृष्णलीलातरङ्गिण्यां*
*कम्सनिर्हरणवर्णनं नाम*
*दशमस्तरङ्गः समाप्तः ॥*

# ॥ एकादशस्तरङ्गः ॥

## श्रीकृष्णद्वारकाप्रवेशवर्ननं

*श्रीकृष्णद्वारकाप्रवेशवर्णनाभिनयः क्रियते ॥*

श्लोकम्

एकादशेऽथ श्रीकृष्णद्वारकागमनं तथा ।
उद्धवस्य च गोपीनां संवादोऽप्यभिनीयते ॥ २४५ ॥

बलेन सह कृष्णस्य भृत्यैरागमनं सह ।
बृन्दावने च नन्दाद्यैः गोपीनां च समागमः ॥ २४६ ॥

उद्धवागमनं कृष्णानुज्ञया गोकुलं प्रति ।
भृङ्गगीतमनुप्राप्य ततः परमतिप्रियम् ॥ २४७ ॥

गोपीनां च समाधानं जरासन्धादिनिग्रहः ।
मुचुकुन्दस्तुतिः पश्चात् द्वारकागमनं ततः ॥ २४८ ॥

*कृष्णानुज्ञया उद्धवागमनम् ॥*

दरु २७

रागम्: नाथनामक्रिया ताळम्: आदि

उद्धरुत सर्वभयं उग्रकंसादिनिधनम्
उच्चैरनुगायं गायमुद्धवोऽयं विराजते ॥

श्लोकम्

समाधानाय गोपीनां गोविन्देन प्रचोदितः ।
उद्धवो गोकुलजनैः पृष्टः प्रत्याह कौशलम् ॥ २४९ ॥

नन्दाद्यैस्तोषितस्तत्र माधवोक्तं निवेद्य च ।
सन्तं रहसि गोप्यस्तं प्राहुर्मधुपकल्पितम् ॥ २५०॥

१०० मधुप मधुप दूतम्

# मधुप मधुप दूतम्

रागम्: कल्याणि (सावेरि) ताळम्: त्रिपुट

### *पल्लवि*

मधुप मधुप दूतं मन्ये माधवीयं त्वाम्

### *अनुपल्लवि*

मथुरापुरनगरीवदनाम्बुज-
मकरन्दमाकलय मायाहि याहि (मधुप)

### *चरणम्*

मथुरापुरनारीवदनकमलं
माधवभास्करमहितकरविकसितम्
अधुना यादवकरुणासुधया समुल्लसितं
कथय कथय किमिह काममाकलय कामम् (मधुप) ॥ १॥

भ्रम भ्रमर मकरन्दसंभृतेषु
पावनगोविन्दपदचिह्नितेषु
कमनीयमथुराकान्तारपादपेषु
अमरभूतिमगणय्य अपि बिक्षामटन्ति स्म[७३]
किमपि माधववृत्तं केन वादरणीयमिह (मधुप) ॥ 2॥

अलमसितसख्येन स्मित[७४]भाषणेनालं
चल चञ्चल स्वभाव चञ्चरीकासितविचार

[७३] some versions omit this line
[७४] हसित

परिकलय माधवं प्रति मामकीनगीतं
वरनारायणतीर्थवरदं विजयगोपालम् (मधुप) ॥ ३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्
श्रुत्वा तद्गोपिकागीतं श्राव्यं श्रुतिमनोरमम् ।
तत्वमावेदयन् गोपीः प्रत्याहोद्धव उत्सुकः ॥ २५१॥

१०१ गोपालं विद्धि गोपालम्

# गोपालं विद्धि गोपालम्

रागम्: मोहनम् ताळम्: चापु

*पल्लवि*

गोपालं विद्धि गोपालं विद्धि गोपालम्

*अनुपल्लवि*

गोपीजनगोमध्यविहरं
गोविन्दं परमानन्दकन्दम् (गोपालं)

*चरणम्*

अन्तरङ्गे सन्तं भान्तं आदिमध्यान्तवसन्तं
सन्ततं सत्सु चरन्तं सत्यमेकान्तम्
अन्तिके योगिविचिन्त्यं अञ्चितसकलागमान्तं
हन्त दुरन्तसंसारबन्धहन्तारं विहरन्तम् (गोपालं) ॥ १॥

सम्योगवियोगविहीनं साधुमानसजीवनं
मायोपाधिविदळनं मानससनं गोपालम्
हेयोपादेयसाधकहेतुदृष्टान्तबाधनम्
भुयो भुयो विचयैनं भूमानं भूरिमहिमानम् (गोपालं) ॥ २॥

बुद्धिविकल्पितभेदाभेदं बोधबाधितसर्वखेदं
सिद्धजनभावितसिद्धिदं सेतुमभयविदम्
बद्धमुक्तैकसिद्धवेदबोधितानन्दैकप्रसादं
सिद्धनारायणतीर्थसिद्धं सेवकसेवितश्रीपादम् (गोपालं) ॥ ३ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

विगळितभयशोका विद्यया लब्धतत्वाः
कथमपि परतत्वे स्थापयित्वा मनांसि ।
मुहुरपि परभक्त्या विश्ववन्द्ये मुकुन्दे
मधुकर परिक्लृप्तं तं प्रति प्राहुरित्थम् ॥

१०२ किमु राजते राजसदसि

# किमु राजते राजसदसि

रागम्: धन्यासि ताळम्: त्रिपुट

*पल्लवि*

किमु राजते राजसदसि

*अनुपल्लवि*

कुमुदगणेषु कोटिकोटिसंख्याकेषु
कुमुदबन्धुरिव कोटिमदन इव (किमु)

*चरणम्*

मधुप कुलवतंस कथय मधुमाधवचरितमिह
मधुकराचाररसिको माधवो विजयते
कथमपि कथा किं स्मरति नः सदसि रहसि
किमु कुशली वनमाली सुगुणशाली (किमु) ॥ १ ॥

स्मरति किमथ बृन्दावनभुवि परम-
रहसि निशिमुदा परया यत्सुकृतम्
सरसमुरळीरवसुधया समाकृष्ट-
सुरवनितागणसरससङ्गीतमिह (किमु) ॥ २ ॥

कति कति सन्ति न कळहंसगत्ययस्तत्
परिचर्याविधानैककुशलाः
तदिह न स्मरतीति साधु विदितमिह
तदलमसितसङ्गवार्तय विफलाय (किमु) ॥ ३ ॥

मथुरानगरी नारी मधुरसङ्गीतरसिके
माधवे वसति मथुरायां मधुरम्
वन्दिमागधैरधिकं गीयते गीतं जय हे
गोपिकाजार गोपीनाथेति न हि किम् (किमु) ॥ ४ ॥

सृतपञ्चदशकलाचन्द्र इव जीवामो
ध्रुवकलया वयमधुना
इति जयमधुसूदनं वद याहि माधवं
प्रति नारायणतीर्थ प्रत्यगात्मानमसितम् (किमु) ॥ ५ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

दत्तोत्तरस्समादाय गोपीबृन्दं स चोद्धवः ।
पुनर्विवेश मथुरानगरीं हरिमन्दिरम् ॥ २५३ ॥

मधुरिपुं मथुरापुरनायकं
समदिगम्य स चोद्धवनामकः ।
रहसि गोपवधूपरिभाषितं
मधुरमाह मनोभवरूषितम् ॥ २५४ ॥

# इति वदति हि गोपी

रागम्: कांभोजि ताळम्: आदि

### *पल्लवि*

इति वदति हि गोपी गोपालकृष्ण

### *अनुपल्लवि*

नतयो नुतयः स्मृतयो कृतयः
प्रतिपदमस्माभिस्त्वयि विहितः (इति वदति)

### *चरणम्*

मधुरं मथुरानगरीनारी
मधुरं गायति मधुसूदन ते
अधुना माधव तव कियदस्मत्-
कृतिभिर्नुतिभिर्नतिभिः स्तुतिभिः (इति वदति) ॥१॥

नन्दमुकुन्दं परमानन्दं
मन्दस्मेरसुधावदनेन्दुम्
बृन्दावनभुवि सन्तं वन्दे
स्मारं स्मारं वारं वारम् (इति वदति) ॥२॥

श्रुतयः स्मृतयः कथयन्ति त्वां
सुधियः स्वान्तःकरणे सन्तम्
तदपि मानो मे नन्दकिशोरं
स्मरति हि युवती करिणीकळभम् (इति वदति) ॥३॥

मणिनायक मणिरपि परमधुना
गुणयोगे सति काचमणीनाम्
मरकतमणिरपि मध्ये घटितो
गणनीयः किं न हि काचेषु (इति वदति) ॥४॥

इति गोपीजनकथितं प्रथितं
निजजनकथितं विदितं हरिणा
यति नारायणतीर्थ प्रथितं
गुरुवरकरुणाभरितं गीतम् (इति वदति) ॥ ५ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

नित्यसिद्धागमज्ञोऽपि भगवान् सबलोऽगमत् ।
विद्यार्थी लोकशिक्षार्थं सान्दीपिनिमुनिं गुरुम् ॥

*सान्दीपिनेरागमनं गीयते ॥*

*दरु २८*

रागम्: नाथनामक्रिया ताळम्: आदि

निष्पन्नवेदविज्ञानो नित्यं स्वाध्यानतत्परः
शिष्योपशिष्यसेवितः सान्दीपिनिर्विराजते ॥

*अथ विद्याग्रहणम् ॥*

श्लोकम्

गृहीतविद्यो भगवान्[७५] बलभद्रसहायवान् ।
गुरुं प्रसाद्य विधिना गीतो ब्रह्मचारिभिः ॥ २५६ ॥

१०४ कंसासुरसंहरणम्

# कंसासुरसंहरणम्

[७५] बलवान्

रागम्ः सारङ्ग (केदारगौळ)     ताळम्ः चापु

*पल्लवि*

कंसासुरसंहरणं कलय कृष्ण
संसारसिन्धुतारण

*अनुपल्लवि*

पुंसामनन्यपुराणपुरुषोत्तम
हंसयतीश्वरशंसितचरण (कं)

*चरणम्*

पञ्चजनासुरपाटलकलित श्री-
पाञ्चजन्यशङ्खपावननिनद
अञ्चितगुरुपुत्रसञ्जीवनकरण
मञ्जुळमौक्तिक माधव धृतवेद (कंसासुर) ॥१॥

वाचामगोचर वासुदेवतनय
सदाचारपालक दनुजकुलमथन
हे चारुकमलविलोचन भवपाश-
मोचक शतकोटिमन्मथमोहन (कंसासुर) ॥२॥

वारिजसंभववन्दितपादाब्ज
भूरिदयारस भुवनैकनाथ
नारायणतीर्थनतचरणाम्बुज
नानाविधलीलाविनोद (कंसासुर) ॥३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

जरासन्धस्य सैन्यानि हतानि हरिणाऽसकृत् ।
निहतः कालयवनो मुचुकुन्दमुखाग्निना ॥२५७॥

चिरसुप्तोत्थितस्यास्य मुचुकुन्दस्य पश्यतः ।

अनुग्रहाय भगवानाविर्भूतो गुहान्तरे ॥ २५८॥

मुचुकुन्दोऽपि तं दृष्ट्वा बन्धहन्तारमात्मनः ।
नृसिंहपदसंलक्ष्यं प्रणमन् स्तौति दिव्यदृक् ॥ २५९॥



# वेदाद्रिसिंह त्वां

रागम्: कांभोजि (कल्याणि) ताळम्: झंप

वेदाद्रिसिंह त्वां नौमि विमल-
विद्युज्ज्वलितजिह्वं त्वां नौमि
वेदान्तवेद्यविमलानन्दविज्ञान-
विदळितदुरन्तभवमोहं प्रणमामि ॥ १॥

नरभावभावन दृढबन्धहरमखिल-
सुरवैरिदळनखरनखरम्
परिपूर्णकरुणासुधासमाह्लादित-
प्रह्लादभयहरमुदारं प्रणमामि ॥ २॥

घोरसंसारतरकाधिपति-
तरणिमण्डलकोटिभासम्
क्षीरगंभीरवारिधिमथनसञ्जात-
वरलक्ष्मीविलासं त्वां प्रणमामि ॥ ३॥

जगदण्डशतकोटिजननीकळत्रमिह
जन्ममरणादिभयविदूरम्
निगममय खगवरयानसञ्चार
नियतलीलामयशरीरं प्रणमामि ॥ ४॥

मणिमयकिरीटमणिमकरकुण्डलकान्ति-
मथितदिग्दशतिमिरहारम्

अणिमादिभूतिदमनन्यशरणार्त्तिनां
आधारमखिलसुखसारं प्रणमामि ॥ ५ ॥

निरवद्यगुणरत्ननिर्मलान्तःकरण-
वरयोगिवरदाननिपुणम्
धीरशिव नारायणतीर्थ यतिगूढ-
परमार्थमतिकरुणं प्रणमामि ॥ ६ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

उद्धरोद्धर गोविन्द पतितं भवसागरे ।
भीकरे श्रीहरे कृष्ण वृष्णिवंशसमुद्भव ॥ २६० ॥

इति स्तुवन्तं मुचुकुन्दमादरात्
कृपासुधावृष्टिदृशावलोक्य सः ।
हितं समादिश्य च सत्वरं पुनः
विवेश शौरिर्मथुरामरिन्दमः ॥ २६१ ॥

द्वारका नगरी हर्म्यशारिका गीतसारिका ।
तारकोत्कलिका मोदवासिता नन्दपूरका ॥ २६२ ।

शर्मदा निर्मलदियां निर्मिता विश्वकर्मणा ।
तत्र सन्तं हरिं पौरास्तुष्टास्तुष्टुवुरीश्वरम् ॥ २६३ ॥



# वयं धन्या वयं धन्या

रागम्: सावेरि (आनन्दभैरवि) ताळम्: आदि

*पल्लवि*

वयं धन्या वयं धन्या वसुधातले

*अनुपल्लवि*

स्वयं व्यक्तं परं तत्वं

हरिं त्वामवलोकयामो (वयं धन्या)

*चरणम्*

निखिललोकनिदान निगमबृन्दैकमान

सुखसत्यामितज्ञान सुरपालन

मघवदादिपावन मायया कृतभुवन

अघमूलविनाशन अखिललोकपावन (वयं धन्या) ॥१॥

जलधिमध्यनिर्मितजांबूनदोदर[७६]

कलितगोपुरहर्म्यकमनीया

जलजनाभ तावकजन्मरम्यद्वारका

अलमियमस्माभिरवलोक्यते देव (वयं धन्या) ॥२॥

वसुधासुधासौधवसतीकृतवासव

कुसुमबाणविहरणकूटावन

वसुदेवभागदेय वामदेवादिगेय

सदा नारायणतीर्थवरद विजयगोपाल (वयं धन्या) ॥३॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

अमरदुर्लभभूतिरियं सती
विमलमानसहंससमाकुला ।
कमलनाभ रमातिमनोरमा
सततमस्तु तवाद्य महापुरी ॥२६४॥

अद्यापि भक्ताननुकम्पयन्मुदा
हृद्यानवद्यं नगरीमधिष्ठितः ।
प्रत्यस्तशत्रुर्भगवान् विराजते

[७६]जांबूनदकलश

क्ष्मया च लक्ष्म्या सह सर्वसंपदा ॥ २६५ ॥

*॥ इति श्रीनारायणतीर्थयतीन्द्रविरचितायां*
*श्रीकृष्णलीलातरङ्गिण्यां*
*श्रीकृष्णद्वारवतीप्रवेशवर्णनं नाम*
*एकादशस्तरङ्गः समाप्तः ॥*

# ॥ द्वादशस्तरङ्गः ॥

श्रीकृष्णरुक्मिणीकल्यणमहोत्सववर्नन‌ं

*श्रीकृष्णरुक्मिणीकल्याणमहोत्सववर्णनाभिनयः क्रियते ॥*

श्लोकम्

भीष्मोऽथ रुक्मी तत्पुत्रो रुक्मिणी तत्सुता सती ।
वसुदेवो देवकी च बलकृष्णौ सबान्धवौ ॥ २६६ ॥

रुक्मिण्या लिखितं पत्रं श्रीकृष्णाय निवेदनम् ।
ब्राह्मणेन ततस्तत्र गतेनगमनं हरेः ॥ २६७ ॥

राज्ञां समक्षं रुक्मिण्यः पाणिग्रहणमङ्गलम् ।
रुक्मिण्या सह कृष्णस्य द्वारकायां समागमः ॥ २६८ ॥

रुक्मिणीकृष्णयोः सम्यग्विवाहस्तदनन्तरम् ।
अष्टपत्नीसमाहारः कथास्त्विह ईरितः ॥ २६९ ॥

*तत्रादौ भीष्मागमनम् ॥*

दरु २९

रागम्: नाथनामक्रिया ताळम्: आदि

धीमानिह श्रीमानयं भीमपराक्रमादिमान्
भूमौ विख्यातमाहात्म्यो भीष्मो महान् विराजते ॥

*अथ रुक्म्यागमनम् ॥*

*दरु ३०*

रागम्: नाथनामक्रिया ताळम्: आदि

रुक्मी रुक्मिण्यग्रजो[७७] रुचिराङ्गदकुण्डली
दिग्मांशुसमकिरीटी दिव्यायुधः समायाति ॥

*गद्यम् ३०*

अथ भीष्ममहाराजो रुक्मिण्याः स्वसुतायाः विवाहमहोत्सवाय वरमन्विच्छन् स्वमन्त्रिभिः कुलवृद्धैश्च समं पर्यालोच्य वासुदेवं वरं रोचयामास किल । रुक्मी च तद्वृत्तं ज्ञात्वा चैद्यपक्षत्वात् सामर्षमुवाच । अलमहो विचारेण गोपवरकन्याप्रदानविषयेण । अयं हि जारचोरशिखामणिः परतन्त्रो नास्मत्कुलोचितवर इति । राजापि पुत्रस्नेहवशात् तद्रोचयामास ॥

*अथ रुक्मिण्याः आगमनम् ॥*

*दरु ३१*

रागम्: नाथनामक्रिया ताळम्: आदि

आयाति रुक्मिणी शनैरिह गेहयोषिद्भिरधुना
कृष्णमेव चिन्तयन्ती सदा हृदि वृष्णुवम्शसिन्धु चन्द्रम्
सौन्दर्यनिन्दितामरी निरन्तरसुरुचिरघनकबरी
तन्वी स्वतनुभानुना पराजितभानुकिरणा तरुणी ॥

श्लोकम्

क्रीडाग्रहं समायान्तीं क्रीडन्तीं स्वसखीजनैः ।

[७७] रुक्मिण्यवरजो

प्रत्याह रुक्मिणीं दूती यद्वृत्तं भीष्ममन्दिरे ॥ २७०॥

रौहिणेये कृतोद्वाहे रेवतीप्राणवल्लभे ।
श्रीकृष्णस्याथ समयो वैवाहिकमहोत्सवे ॥ २७१॥

इति द्वारवती पौराः प्रशम्सन्ति किलानघे ।
रुक्मी च रुक्मिणीं दातुं शिशुपालाय रोचते ॥ २७२॥

पुत्रस्नेहवशाद्राजा तदैव हृदि निश्चितः ।
एवमालोचितं सर्वैः बन्धुभिश्चापि मानिनी ॥ २७३॥

इति दूतीवचः श्रुत्वा रुक्मिणी न्यपतद्भुवि ।
उपलभ्य शनैः सम्ज्ञां प्रलपत्यमलाशया ॥ २७४॥

१०७ वीक्षेऽहं कदा

# वीक्षेऽहं कदा

रागम्: आहिरि ताळम्: त्रिपुट (आदि)

*पल्लवि*

वीक्षेऽहं कदा गोपालमूर्तिम्

*अनुपल्लवि*

साक्षान्मदनकोटिसौन्दर्यरसपेटिम् (वीक्षेऽहं)

*चरणम्*

मृगमदललिततिलकविलसद्विशालफालं
सकलगुणसम्पत्या सहितममन्तलीलम् (वीक्षेऽहं) ॥ १॥

बृन्दावनविहारं बद्धमयूरबर्हं
नन्दनन्दनमखिलानन्दकरविग्रहम् (वीक्षेऽहं) ॥ २॥

काळमेघशरीरं कलितविद्युद्वसनं
केळीकलाकुतुककिञ्चित्कुञ्चिताधरम्[७८] (वीक्षेऽहं) ॥ ३ ॥

तद्धिमि धिमिधिमिति ताण्डवलोलमखिल-
तापत्रयोपशमक्षमकरुणाकटाक्षम् (वीक्षेऽहं) ॥ ४ ॥

सरसमुरळीगीतसरससुधालहरी-
निरत नारायणतीर्थ निर्मलमानसहंसम् (वीक्षेऽहं) ॥ ५ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्
निधय हृदि गोविन्दं रुक्मिणी रुक्मभूषिता ।
मनः सम्बोध्य गोविन्दे समाधयेदमाह च ॥ २७५ ॥

रे रे चेतः शृणु विमलहृत्पुण्डरीकान्तरस्थे
यस्मिन्मायाविलसितजगत्कोटयः सन्ति भूम्नि ।
गोपालं तं भज निगमविद्याविलासानुपालं
भूपालं तं परिहर पुनर्जन्मबन्धैकमूलम् ॥ २७६ ॥

१०८ रे रे मानस गोपालम्

# रे रे मानस गोपालम्

रागम्: सावेरि (रेवगुप्ति) ताळम्: आदि

*पल्लवि*

रे रे मानस गोपालं भज दूरे परिहर भूपालम्

*अनुपल्लवि*

आरादन्तरतरमखिलात्माकबोधानन्दघनं बालम् (रे)

---
[७८] कुञ्चितपादम्

चरणम्

विमलहृदयकमलोदारं वेद-
शमितविविधविषयाकारम्
कमनीयतरकरुणासारं सर्व-
समभावभावमहोदारम् (रे रे) ॥ १॥

सामादिनिगमान्तसञ्चारं धीर-
धीमदनुस्मृतसुगुणाकारम्
समरसमेकमनन्तमनन्वय[७९]-
ममितनिरन्तरसुखसागरम् (रे रे) ॥ २॥

जगदण्डकोटिपराकाशं सर्व-
निगमान्तविदितस्वप्रकाशम्
अगणितगुणमणिवागीशं[८०] देव-
मागमरूपनिजादेशम् (रे रे) ॥ ३॥

विगळितमोहजभवपाशं विश्व-
मङ्गळकृततनुमखिलेशम्
भगवन्तमादिगुरुं शिवमद्वय-
चिद्गगनं नवनीताशम् (रे रे) ॥ ४॥

सुन्दरतरमुरळीनादं मुनि-
बृन्दविचिन्त्यसुन्दरपादम्
नन्दतनयमखिलानन्दं शर-
दिन्दुवदनमिह गोविन्दम् (रे रे) ॥ ५॥

बृन्दावनहितगोबृन्दं धृत-
मन्दरमखिलनिगमकन्दम्
नन्दसुनन्दादि वन्द्यमनन्यक-

---

[७९]अनामय
[८०]वारीशं

नारायणतीर्थ यतिवरदम् (रे रे) ॥ ६॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

इति निश्चित्य सा भैष्मी गोविन्दावाप्तये हृदि ।
आराधयन्ती तं कृष्णं प्रेमभक्त्येदमाह च ॥ २७७॥

१०९ गोपालमेव दैवतम्

# गोपालमेव दैवतम्

रागम्: खमास् ताळम्: आदि

*पल्लवि*

गोपालमेव दैवतं भजे सदा

*चरणम्*

सर्वलोककारणं सत्यकामादि गुणम्
भक्तानुग्रहाभिव्यक्तभव्यमूर्तिधारिणम् (गोपालकं) ॥ १॥

याधवाब्धिचन्द्रमिह यमिजनमोहापहं
गोपीकाननकुमुदगुरुतरचन्द्रोदयम्[८१] (गोपालकं) ॥ २॥

कंसादिवैरिविरामकलितदिव्यविग्रहं
घोरसंसारकारणवारणकेसरिणम् (गोपालकं) ॥ ३॥

मनसापि न गणयामि माधवादन्यदैवं
भव्य नारायणतीर्थ दिव्यदृग्विधायिनम् (गोपालकं) ॥ ४॥

✠ ✠ ✠ ✠ ✠

[८१] चन्द्रमसम्

## *गद्यम् ३१*

ततो राजविग्रहधारिणे सुरविद्वेषकारिणे शिशुपालनम्ने स्वां धातुं कृतनिश्चयं स्वजनं ज्ञात्वा सा रुक्मिणी गोपरमणी मानस मानससरोवर राजीव राजिविराजमान मत्तरजहम्सं मर्दित महासुरकंसं भक्तजनरचित प्रशषं गोविन्दं आत्मानन्दं स्मारं स्मारं विगळितमानुषभोग-तृष्णा कृष्णैकबद्धतृष्णा निजसहचरी साहचर्यावलम्बिनी सदाऽऽस्ते ॥

श्लोकम्

ब्राह्मणं ब्रह्मविद्वर्यं ब्रह्मण्यैक परायणा ।<br>
दृष्ट्वाऽथ लिखितं दत्वा तमाहानयने हरिः ॥ २७८॥

## *तथाहि रुक्मिण्याः पत्रिकलेखनप्रकारः ॥*

## *गद्यम् ३२*

श्रीमते सत्यकाम सत्यसङ्कल्प सर्वकर्म सर्वकाम सर्वरस सर्वगन्ध सर्वसङ्कल्पादि गुणवते कृताकृत मातृमानादि भेदभिन्न सकल जगदाधारावभासकाय निष्प्रत्यूह नित्य निरति-शयानन्दानन्दित ब्रह्मादि सकलजनिमते विश्व वैश्वानरादि सकल नाम रूप निर्वाहकाय सार्वज्ञ सर्वशक्ति समन्विताय सर्वान्तर्यामिणे दुष्टनिग्रह शिष्टपरिपालकाय भक्तानुकम्पाय परिगृहीत गोपकुमार भावाय महानुभावाय करचरण नलिन विलसित ध्वज वज्राङ्कुशादि रेखानुमित महापुरुषलक्षणाय कनकमणिमय मकरकुण्डल कटककटिसूत्राङ्गदादि दिव्यभूषण भूषिताय भक्तजनकामित कामवर्षि महामेघ नीलमेघ समुज्वलित विद्युत्पुञ्ज कल्प दिव्य पीताम्बरधारिणे श्रीवत्सकौस्तुभादि शोभिताय दीनदयापरमूर्तये श्रीकृष्णाय शतकृत्वः सहस्रकृत्वश्च नमो नमः ॥ विज्ञाप्तिश्चैषा ॥

श्लोकम्

तत्प्रसादं परं काङ्क्षे कृष्ण नान्यत्तु कामये ।<br>
मनसा वचसा नूनं मत्पाणिग्रहणं कुरु ॥ २७९॥

# काङ्क्षे तव प्रसादम्

रागम्: सावेरि ताळम्: त्रिपुट

*पल्लवि*

काङ्क्षे तव प्रसादं कल्पिताखिलवेदम् (का)

*चरणम्*

अमितभाग्यदातारं अतुल भूतिविस्तारं
कमनीयकरुणाकरं गोपालम् (काङ्क्षे) ॥ १ ॥

विमतमदविदरं विद्वज्जनाधारं
शमितभूमिभारं शकलीकृतारिनिकरम् (काङ्क्षे) ॥ २ ॥

कामये नान्यमहं कंसारातिदुरूहं
श्यमसुन्दरमन्वहं गोपालम् (काङ्क्षे) ॥ ३ ॥

नामरूपनिर्वाहं नाथं नागारिवाहं
त्वामाश्रयेऽनीहं त्वरया नय मां स्वगेहम् (काङ्क्षे) ॥ ४ ॥

धरणिमण्डलतिलक तापसजनतारक
परिजनसुखकारक गोपालक (काङ्क्षे) ॥ ५ ॥

कलवेणुनादरसिक घनतरमौक्तिक
वरनारायणतीर्थवरितदुस्तरानर्थक (काङ्क्षे) ॥ ६ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

क्षेमं सदैव कुरु देवशिखामणे त्वां
याचे त्वदङ्घ्रिकमले प्रणतीर्विधक्रय ।
नान्यं वृणे पतिमशेषगुरोरनन्तात्

त्वत्तः समस्तगुणधामभिरमतुल्यात् ॥ २८०॥

१११ क्षेमं कुरु गोपाल

# क्षेमं कुरु गोपाल

रागम्: मोहनम्   ताळम्: त्रिपुट (आदि)

*पल्लवि*

क्षेमं कुरु गोपाल सन्ततं मम

*अनुपल्लवि*

कामं तव पादकमलभ्रमरी भवतु
श्रीमन्मम मानसं मधुसूदन (क्षेमं)

*चरणम्*

अक्षीणकरुणानिधे आनदघन
प्रक्षीणदोषवारिधे
शिक्षितासुरगण रक्षितनिजजन
कुक्षिस्थितानेककोटोलोकपालन (क्षेमं) ॥ १॥

प्रह्लादभयविदार परमयोगि-
पावन भुवनाधार
मोहरहितबोध मौनिमानसहंस
साहसजित[८२]वैरिसङ्घात महोदार (क्षेमं) ॥ २॥

अजित विजयगोपाल अनन्तलील
रञ्जितपदकमल
विजयद्वारकापुरीविमलकमलालोल
निज नारायणतीर्थ निर्मलानन्द बाल ॥ ३॥

✠ ✠ ✠ ✠ ✠

[८२]सहसाहत

श्लोकम्

गौरीशङ्करपूजार्थं यात्रा मे नगराद्बहिः ।
यदा तदा ह्यवसरो भवतो मत्परिग्रहे ॥ २८१॥

लिखित्वा लिखितण् दत्तं विप्रहस्थेऽथ कन्यया ।
गृहीत्वा लिखितं विप्रस्त्वरया द्वारकां ययौ ॥ २८२॥

*द्वारकायां वसुदेवागमनम् । देवक्यागमनम् । बलभद्रागमनम् । श्रीकृष्नागमनम् ॥*

श्लोकम्

स गत्वा द्वरकां रम्यां दृष्ट्वा गोपालनन्दनम् ।
विज्ञापयामास हरौ रुक्मिण्या लिखितं द्विजः ॥

*द्वारकायां ब्राह्मणागमनम् ॥*

*दरु ३२*

रागम्: नाथनामक्रिया      ताळम्: आदि

गोविन्द राम गोविन्द राम
गोविन्द गोविन्द गोविन्द राम
देवकीनन्दन राम गृह्णन्
भूदेववरोयमिहायाति धीमान् ॥

*कृष्णसमीपे पत्रिकावचनम् ॥*

श्लोकम्

इति विप्रमुखाच्छ्रुत्वा रुक्मिण्य लिखितं हरिः ।
प्रत्युत्तरं लिखित्वाथ तत्र गन्तुं मनो दधे ॥ २८४ ॥

हे सूनास्त्र समुल्लसद्विरहिणीसम्हार दोषादिह
प्राप्तोऽसि त्वमनङ्गतं तव शराः पञ्चत्वमापुर्ध्रुवम् ।
चापस्ते धरणीं गतः स्मर नदीगामी त्विदीयो ध्वज-
स्त्वेवं कृच्छ्रगतोऽपि मन्मथ वधूहिम्सगुणं नोज्झसि ॥ २८५ ॥

अकळङ्कः कमलाप्तसौम्यः शौरिर्भवांस्तु सकळङ्कः ।
कमलारिरुग्रमौळिः कथमिन्दो तवाप्यते विधुनाम ॥ २८६ ॥

श्रीकृष्णहृदयं ज्ञात्वा पुनरागम्य स द्विजः ।
श्रीकृष्णगमनोत्साहं प्राह भैष्मीं प्रति प्रियम् ॥ २८७ ॥



# वनमाली किल नूनम्

रागम्: यदुकुलकांभोजि (नाथनामक्रिया) ताळम्: आदि

वनमाली किल नूनं वसुदेवपत्यं ।
सनकादि मुनिजन हृत्कमलसंवेद्यम् ॥ १ ॥

शरणं जगतामेव सकलान्तरात्मा ।
त्वरयैवायाति हरिस्वैरमतिमातनुते ॥ २ ॥

चारुतरेण रथेन दारुकसारथिना ।
द्वारवतीनगरादायाति तव स्वामी ॥ ३ ॥

क्षेमं कुरुते तव स क्षीराब्धिशायी ।
श्रीमानखिलात्मा चामीकरपरिधानी ॥ ४ ॥

मा बाले कुरु चिन्तां मञ्जुतरालापे ।
माधवमेष्यसि नूनं वसुधातलतिलकम् ॥ ५ ॥

हरिचरितं मधु नारायणतीर्थोद्गळितं ।
परिजनमुनिवरमत्तभ्रमरैरापीतम् ॥ ६ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

द्विजमुख सरसिजगळितं सा हरिवचनामृतं समापीय ।
आनन्दानुभवाढ्या रुक्मिणीयास्ते मनः समाधाय ॥ २८८ ॥

## *गद्यम् ३३*

अथ कोसल कुरु पाञ्चाल मैथिल चेदि मागध मत्स्य माळव अङ्ग वङ्ग कळिङ्ग सौराष्ट्र घुर्जर महाराष्ट्र सैन्धव काश्मीर कुब्ज केरळ कोङ्कण द्राविड नेपाल कर्णट कोत्कलित त्रैलिङ्ग्याद्यनेक देशाधिष्ठितारो महप्रभावाः अतिरथ महारथादि पद्म महापद्म संख्याक सैनिकाः राजत जांबूनत महार्ह वज्र वैडूर्या मरकदाद्यनेक रत्न विनिर्मित युगपदानेककोटि तटिद्विभ्रद्योतमान दिव्यविमान समारूढाः धिक्कृत सुरसंपदः मत्तमातङ्ग तुरङ्ग वाहन वाहिनीपति शतपरिवेष्टिताः मदनमदापहारि सौन्दर्यशालिनः सकलकला कुशलाः कुण्डिननगर परिसर समुधिताः पङ्क्तिबद्धरथाः समासते ॥

श्लोकम्

त्रैलोक्यसम्पत् कलयावतीर्णा
सा रुक्मिणी सागरराजकन्य ।
सेयं भवानीं भवभावयुक्तां
संपूज्य निर्याति सखीसमेता ॥ २८९ ॥

अत्रान्तरे द्वारवतीनगर्याः
रथेन गत्वा स रथाङ्गपाणिः ।
आस्ते महीपालमहासभायां

सूर्यो यदा दीपसहस्रमध्ये ॥ २९०॥

*गद्यम् ३४*

तत्र खलु वेत्रपाणयः निरस्त समस्त जनसंमर्दाः रुक्मिण्याः परिजनाः परितो बभूवुः ॥

श्लोकम्

पदाङ्गुळीन्यस्तदृशं व्रजन्तीं
भैष्मीं प्रति प्राह च दर्शयन्ती ।
तस्याः सखी राजसुतान् क्रमेण
वेत्रेण विज्ञापयती च दूती ॥

११३ कोमळाधरे रुक्मिणि

## कोमलाधरे रुक्मिणि

रागम्: मुखारि ताळम्: चापु

दूती:–

कोमळाधरे रुक्मिणि कोसलाधिपतिरियं
कामसुन्दरमाकलय कल्याणि राजकन्यके ॥

रुक्मिणी:–

दूति मा कुरु विलम्बं नीतिसारज्ञे सुन्दरि
भाति किं न ते मामकं भावुकं मनसावृअतम् ॥

दूती:–

पश्य पाञ्चालमैथिलान् पार्थिवानर्थसंबन्धे[८३]
निश्चला विभूतिर्यत्र नीतिरप्यब्जलोचने ॥

---

[८३]संपन्ने

रुक्मिणी :–

तारका इव दृश्यन्ते शारदचन्द्रसन्निधौ
वारय दूति पार्थिवान् सारविवेकचतुरे ॥

दूती :–

कौरवं कलय देवि कुरुदेशाधिपमिह
पौरजानपदोपेतं पद्मपत्रविलोचने ॥

रुक्मिणी :–

अत्र किन्न ते विचित्रं चित्र चरित्र संबन्धे[८४]
तत्र तत्राट तन्वाङ्गि तामसी मा भव दूती ॥

दूती :–

मागधमत्स्यमाळववङ्गकलिङ्गसौराष्ट्रान्
नागरघुर्जरदेशनरपालानवलोकय ॥

रुक्मिणी :–

सन्तु राजानो दूति के सखि सहस्रशो भुवि
किं ततो मे चल बाले कीर्तिमाकलय मयि ॥

दूती :–

केरळनेपालकोङ्कणद्रविडान्ध्रकर्णाटकान्
धरणीपालकानाकलय राजकन्यके ॥

रुक्मिणी :–

चर्वितचर्वणेनालं चक्रिणं दर्शय बाले
सारकमलसङ्काशाक्षं शारदचन्द्रसन्निभास्यम् ॥

दूती :–

द्वारकापुरनायकं दारितदुर्जनजालं
धीरमाकलय कृष्णं देवदेवकीतनयम् ॥
सुन्दरं पश्य सुन्दरि नन्दयशोदानन्दनं
स्यन्दने भीष्मनन्दिनि नन्दयेन्दुबिंबाननम् ॥

[८४] संपन्ने

रुक्मिणी :–

वरय दूति पार्थिवान् सारविवेक चतुरे ॥

दूती :

नन्दनन्दनं आकलय नारायणतीर्थ यतिगीतम् ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

वैदर्भीवसुदेवसूनुनयननन्योन्यविन्यासतो
धन्यानामपि धन्यतां जनिमतां कन्यावराणां धुरि ।
अन्योन्योपमितानि यानि भुवि सन्त्यन्यानि वस्तूनि तत्-
सर्वस्यप्युपमा वयं त्विति तयोश्चित्तैकतां कुर्वते ॥ २९२ ॥

गृहीत्वा पाणिना पणिं रुक्मिण्यास्त्वरया प्रभुः ।
आरोप्य स्यन्दने भैष्मीं द्वारकां प्रस्थितो हरिः ॥ २९३ ॥

समग्रसेनया सार्द्धं मध्येमार्गं समागतः ।
बलभद्रोऽखिलन् जित्वा पार्थिवान् द्वारकां ययौ ॥ २९४ ॥

रुक्मी तु समरे कृष्णं जेतुमग्निं पतङ्गवत् ।
प्रवृत्तस्तेन निर्जित्य रथे बद्धः पशुर्यथा ॥ २९५ ॥

रुक्मिण्य प्रार्थितः कृष्णो रुक्मिणिं च तदग्रजम् ।
प्राग्बद्धं मोचयित्वाथ प्रहसन् द्वारकां ययौ ॥ २९६ ॥

रुक्मिणीसहिते कृष्णे द्वारकापुरमगते[८५] ।
वसुदेवादयः सर्वे बान्धवाः द्रष्टुमागताः ॥ २९७ ॥

## *गद्यम् ३५*

तत्र खलु द्वारवत्यां सकलसुरासुर गन्धर्व किन्नर विद्याधर नाकनागरी परिजनाधरीकृत सुरेन्द्र महासभायां तप्त जम्बूनदानेककोटि रविकान्त स्पटिकसङ्घटित मरकत वज्र

[८५] समागते

वैडूर्याद्यनेक रत्न विद्योतमान सहस्रस्तह्म्भ मण्डप विराजमान सुरगुरु मतिस्पर्धावर्द्धित विद्यालसद्विबुधशत सङ्कुलायां अनेककोटि महाकविवन्दि गायक हासकादि लक्षण लक्षितायां गर्गप्रमुख महामुन्याधिष्टितायां महाराजसभायां इक्षु क्षीर दधि मधु घृत गुळ गोरोचन जीरक मरीचकादि मङ्गळद्रव्य सम्भारवत्यां गर्गप्रभृतयः वसुदेवा- नुमत्या महासङ्कल्पपूर्वकं श्रीरुक्मिणीकृष्णयोः गान्धरविधिना वैवाहिक महोत्सवाय लग्नाष्टकं आरभन्त ॥

श्लोकम् (लग्नाष्टकम्)

सत्यज्ञानसुखस्वरूपममलं सर्वोत्तमं नित्यदृक्
प्रत्यक्तत्वमचिन्त्यशक्तिविलसद्विशवं परण्म् ब्रह्म यत् ।
लोकानुग्रहविग्रहस्य जगतां नाथस्य तस्यामराः
रुक्मिण्याः सततं विवाहसमये कुर्वन्तु ते मङ्गळम् ॥ २९८॥

सुलग्ने सावधान

गङ्गाद्याः सरितो ग्रहाश्च शुभदा गन्धर्व विद्याधराः
दिक्पाला ऋषयश्च देवमुनयो देव्यश्च गौर्यादयः ।
श्रीवत्दाङ्कितवक्षसः सुमनसामग्रेसरस्य प्रभोः
रुक्मिण्याः सततं विवाहसमये कुर्वन्तु ते मङ्गळम् ॥ २९९॥

सुलग्ने सावधान

यो गोपीनयनोत्पलैरनुपमैराराधितो गोकुले
गोभिर्गोपसुतैरनेकमुनिभिर्हृत्पद्मकोशान्तरे ।
मायामानुषविग्रहस्य मरुतस्ते वालखिलाय्दयो
रुक्मिण्याः सततं विवाहसमये कुर्वन्तु ते मङ्गळम् ॥ ३००॥

सुलग्ने सावधान

ब्रह्माविष्णुरुमापतिश्श्रुतिचयो वाणीरमोमायुता
आदित्या वसवो गणाधिपमुखा रुद्राश्च भद्रप्रदाः
कालांभोधरदिव्यकान्तिविलसत्कायस्य मायाविनो
रुक्मिण्याः सततं विवाहसमये कुर्वन्तु ते मङ्गळम् ॥ ३०१॥

सुलग्ने सावधान

वंशीनादविनोदनन्दितसुनन्दाद्योऽनवद्यो महान्
नन्दाद्यैरभिपूजितः परमया भक्त्या मुहुर्लालितः ।
यः पूर्वं कमलेक्षणस्य कमलानाथस्य तस्यामराः
रुक्मिण्याः सततं विवाहसमये कुर्वन्तु ते मङ्गळम् ॥ ३०२ ॥

सुलग्ने सावधान

विद्युद्पुञ्जनिभांबरस्य विलसद्ग्रैवेयकस्य प्रभोः
मुक्ताहारमहार्हकौस्तुभमणिग्रीवस्य कृष्णात्मनः ।
पूर्णेन्दुप्रतिमाननस्य सुतरां पूर्णस्य भक्त्यामराः
रुक्मिण्याः सततं विवाहसमये कुर्वन्तु ते मङ्गळम् ॥ ३०३ ॥

सुलग्ने सावधान

मीनाङ्गाधिकसुन्दरः सुरवधूदृक्चातकांभोधरो
गोपीमण्डलचण्डभास्करलसद्विष्णुः प्रियः पूरुषः ।
तस्याखण्डसुखात्मकस्य विदुषामेकात्मकस्य प्रभोः
रुक्मिण्याः सततं विवाहसमये कुर्वन्तु ते मङ्गळम् ॥ ३०४ ॥

सुलग्ने सावधान

ये सत्यं प्रवदन्ति सर्वभुवने या धर्मशीलास्त्रियः
पातिव्रत्यपरायणास्सुरभयो मन्दारमुख्य द्रुमाः ।
ते सर्वे यदुनयकस्य महतः सर्वात्मकस्य प्रभोः
रुक्मिण्याः सततं विवाहसमये कुर्वन्तु ते मङ्गळम् ॥ ३०५ ॥

सुलग्ने सावधान

गर्गाद्यैर्मुनिभिः सदामितमहाशीर्वादशर्माञ्चितो
देवैर्व्योमनि विमानमध्यकलितै[८६]र्दत्तप्रसूनाञ्जलिः ।
सन्तुष्टामरसम्यगाचरितभेरीनादेन सन्तुष्टवन्[८७]
रुक्मिण्याः सततं विवाहसमये कुर्वन्तु ते मङ्गळम् ॥ ३०६ ॥

सुलग्ने सावधान

[८६]निलयै
[८७]नादतुष्टोऽस्य वै

# श्रीवासुदेवप्रभो[८८]

रागम्: शङ्करभरणम्    ताळम्: चापु

*पल्लवि*

श्रीवासुदेवप्रभो पालय मां

*चरणम्*

सकलहितकर सरसगुणघन
निगमसरसिज नियतरसघन
विगतभवभय विनतसुरवर
गगनसुविमल गरुडविहरण (श्री) ॥१॥

सरसिजोदर चरणविलसित
सरसनूपुर साधुहितकर
धरळकुण्डल ताण्डवानन
मुररिपोऽखिलमोहनाभव (श्री) ॥२॥

निरुपमध्वनि निकरपावन
मुरळिकारव मोहितखिल
सुरवधूगण सुन्दरनन
करिवरावन काञ्चनांबर (श्री) ॥३॥

दिव्यमङ्गळ गोपवेष
दीनपालन वीतदोष
नव्यतरनवनीतरसिक
नरसखानन निखिलजनक (श्री) ॥४॥

देवकीवसुदेवतनय
देवरजविरचित विनय

[८८]This *gītam* is not featured in some versions

देव नारायणानन्द
तीर्थ विरचित दिव्यगीत (श्री) ॥ 6॥

✠ ✠ ✠ ✠ ✠

## ११५ अवलोकय भैष्मीवदनम्

# अवलोकय भैष्मीवदनम्

रागम्: कल्याणि (कापि) ताळम्: चापु

*पल्लवि*

अवलोकय भैष्मीवदनं कृष्ण
भुवनसुन्दरमिह भूशशिनम्

*चरणम्*

नवनितप्रियवरवदनं भैष्मि
भवतारकमतिशोभनम्
कल्यणं तव भवतु सदा
कनकाम्बर कनकाभे रुक्मिणि (अवलोकय) ॥१॥

सङ्कल्पं कुरु कंसरिपो जय
सत्यं प्रति धर्माचरणम्
पङ्केरुहनयामरनरपति
परिषदि भैष्म्या सह श्रीकृष्ण (अवलोकय) ॥२॥

भ्रूमध्यं परिसंमृज्याच्युत
भूषय भैष्मीवदनमिह
कामं युगविनिहितकनकाम्बुभिः
स्नपय हरे भैष्मीमधुना (अवलोकय) ॥३॥

नव्यसुन्दरपरिधानेनाघ
देवीमधुनाच्छादय भो
दिव्यकनकमणिमङ्गळसूत्रं
देवीकण्ठे स्थापय[८१] भो (अवलोकय) ॥ ४ ॥

द्वारवती नगरी तव सुखदा
धीर हरे रमया भवतु
कारणजगतामसुरविदारण
नारायणतीर्थादरण (अवलोकय) ॥ ५ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्
भैष्म्याः पणिसरोरुहाञ्जलिगता
रक्तास्तु मुक्ताः स्थिताः
या मुक्ता गळितानुरागविमलाः
कृष्णोत्तमाङ्गाश्रयाः ।
यातास्तस्य यदूद्वहस्य परमं
साम्यं विशुद्धात्मना
ता कुर्वन्त्वभितः शुभानि सततं
श्रीकृष्णवैवाहिकाः ॥ ३०७ ॥

११६ कल्याणगोपालम्

# कल्याणगोपालम्

रागम्: पन्तुवराळि ताळम्: चापु

*पल्लवि*

---
[८१] कण्ठेऽथ बधान

कल्याणगोपालं करुणालवालम्

*अनुपल्लवि*

माल्यालङ्कृतमीडे मदनगोपालम् (कल्याण)

*चरणम्*

अमरनारीगीतं आगमविदितम्
अमितभग्योपेतं आश्रयेऽनन्तम् (कल्याण) ॥ 1॥

सकलजगत्कारणं सत्यकामादिगुणम्
भृत्यसंरक्षणं भवबन्धमोक्डणम् (कल्याण) ॥ 2॥

मुरळीसरळगानं मुनिबृन्दाधीनम्
शरणागतपालनं शरदिन्दुवदनम् (कल्याण) ॥ 3॥

भवतिमिरघनभनुं भक्तकामधेनुम्
शिव नारायणतीर्थ शीघ्रवरदानम् (कल्याण) ॥ ४॥

✠ ✠ ✠ ✠ ✠

*॥ शोभनं मे शोभनम् ॥*

११७ जय जय बालगोपाल हरे

# जय जय बालगोपाल हरे

रागम्: मोहनम् (शङ्कराभरणम्) ताळम्: आदि

*पल्लवि*

जय जय बालगोपाल हरे जय जय मदनगोपाल

*अनुपल्लवि*

जय जय विजयगोपाल हरे जय जय कल्याणगोपाल

*चरणम्*

परमपुरुष जगदीश भक्तजनभवभयविनाश
निरुपमगुणरत्नकोश निर्मलकीर्तिपूरिताश (जय जय) ॥ १॥

ब्रह्मादिसुरवन्द्यपाद भवबन्धहृदयग्रन्थिभेद
ब्रह्मण्यदेव धृतवेद बलभद्रावरज भक्तवरद (जय जय) ॥ २॥

सुरवधूपरिगीतविभव भक्तसुखकार परिपूर्णभाव
नरनारीकृतबहुसेव शिव नारायणतीर्थदेव (जय जय) ॥ ३॥

✠ ✠ ✠ ✠ ✠

## ॥ *आचार्योपदेशः* ॥

श्लोकम्

ब्रह्मग्रन्थिं विधायाग्निं प्रतिष्टापय केशव ।
कृत्वा सप्तपदं कर्म प्रधानं होममाचर ॥ ३०८॥

लाजहोमं ततः कृत्वा प्रावेशं होममाचर ।
गन्धर्वपूजां कृत्वाथ स्थालीपाकं समाचर ॥ ३०९॥

भुक्त्वाथ बन्धुभिः साकं भक्ष्यं पायसमुत्तमम् ।
शेषहोमं ततः कृत्वा ततो नागबलिं कुरु ॥ ३१०॥

दिव्यशय्यां समारुढो रुक्मिण्या रमया सह ।
भुङ्क्ष्वाखण्डसुखं सत्यं भूमाख्यं कृष्ण केवलम् ॥ ३११॥

११८ ब्रह्मग्रन्थिं कुरु

# ब्रह्मग्रन्थिं कुरु कृष्ण

रागम्: मध्यमावति ताळम्: आदि

ब्रह्मग्रन्थिं कुरु कृष्ण त्वं
परिहर मायाकृतबन्धम्
ब्रह्मसभायामिह वैवाहिक-
पावकमथ संस्थापय भो ॥ १ ॥

कल्याणं तव भवतु सदा गुप्तपदस्त्वं
तव मायाकृत सप्तपदाख्यं कुरु
कर्मकॢप्तं तत्र प्रधान होमं
कृष्ण कुरु त्वं कृतकृत्य ॥ २ ॥

लाजहोममथ कुरु कृष्ण त्वं
लक्षणलक्षितमिह लक्ष्म्या
श्रीजानेऽथ प्रवेशहोमं
श्रेयस्करमाचर कृष्ण ॥ ३ ॥

गान्धर्वीं संपूज्य च विधिना
गरुडध्वज केशव कृष्ण
कुरु विधिना स्थालीपाकाख्यं
कर्म च करुणारसजलधे ॥ ४ ॥

इष्टतमं पायसमतिमृष्टं
पिष्टकमतिसन्तुष्टमनाः
इष्टजनैः सह भुङ्क्ष्व यथेष्टं
तुष्टं पुष्टिं कुरु जगताम् ॥ ५ ॥

शेषशय लीलामयविग्रह
शेषभवनमिह कुरु कृष्ण
दोषरहित कुरु नागबलिं भुवि
भूषय भैष्मीमिह भूमन् ॥ ६ ॥

लक्षणशय्यामधिरूढस्त्वं
रमया सह लक्ष्मीजाने

अक्षयसुखमनुभव निगमान्तैः
लक्षणया बोधितममलम् ॥ ७ ॥

श्रीकल्याणगोपालक कृपया
रुक्मिण्याः कल्याणमिदम्
श्रीकरमिह नारायणतीर्थ -
प्रकटितमिति यतिवरसुखदम् ॥ ८ ॥

✠ ✠ ✠ ✠ ✠

श्लोकम्
आचार्यवचनात्सर्वमकरोद्यदुनन्दनः ।
वाचामगोचरात्मापि वासुदेवः स्वमायया ॥ ३१२ ॥

भैष्मी जाम्बवती भामा सत्य भद्रा च लक्ष्मणा ।
काळिन्दी मित्रविन्दा च महिष्यस्त्वष्टधा हरेः ॥ ३१३ ॥

द्वारकानगरीमध्ये सहस्रस्थंभमण्डपे ।
रत्नसिम्हासनारूढं सकळत्रं जगुः सुराः ॥ ३१४ ॥

११९ आलोकये रुक्मिणी

# आलोकये रुक्मिणी

रागम्: कांभोजि    ताळम्: आदि

*पल्लवि*

आलोकये रुक्मिणीकल्याणगोपालम्

*अनुपल्लवि*

नीलमेघनिभाकारं बालार्कसमानचेलम्
नीलाम्बरानुजं गोपालकं नीलाळकान्तम् (आलोकये)

### चरणम्

द्वारकापुरमण्डपे द्वादशादित्यसन्निभे
भूरिरत्नसिंहासने भूसुरघने
वीरासने सुखासीनं विश्वमङ्गळदायिनं
धीरयोगिसंसेवनं देवकीवसुदेवसूनुम् (आलोकये) ॥ १ ॥

शङ्खदुन्दुभिनादिते शतशो गन्धर्वादिगीते
पुङ्खानुपुङ्खनिगमबुधजनावृते
पङ्कजेक्षणरम्भादिपटुनटनविनोदिते
कुङ्कुमकेसरवर्षिते कोमलाकारचरिते[१०] (आलोकये) ॥ २ ॥

दिव्यकिरीटकुण्डलदीप्तपीताम्बरधरं
नव्यमुक्तामणिहरं नानाविहरम्
अव्ययभूतिविस्तारं अमरनारीसुराधारं
भव्यकौस्तुभकन्धरं भक्तमानससञ्चारम् (आलोकये) ॥ ३ ॥

अष्टमहिषीसमेतं अमरनारीसुसेवितं
तुष्टपुष्टजनावृतं तुम्बुरुगीतम्
इष्टजनसमाश्रितं ईश्वरमपराजितं
दृष्टसर्वलोकजातं देवराजादिविनुतम् (आलोकये) ॥ ४ ॥

हेममुक्तामणिच्छत्रं हीररत्नकटिसूत्रं
चामरव्यजनावृतं शरदिन्दुवक्त्रम्
कामकोटिसमगात्रं कनकाङ्गदादिविचित्रं
श्यामसुन्दरं पवित्रं शरणागतोद्धारगोत्रम् (आलोकये) ॥ ५ ॥

चन्द्राननाभैष्मीभामाजाम्बवीसत्यामित्र-
विन्दाभद्रलक्ष्मणाकाळिन्दीनयकम्
नन्दनन्दनमाश्रितबृन्दबृन्दारकवन्द्यं

---
[१०] कोमळाशनकूजिते

नन्दित नारायणतीर्था नन्दनमानन्दकन्दम् (आलोकये) ॥ ६॥

✠ ✠ ✠ ✠ ✠

श्लोकम्

श्रीगोपालघनादपारकरुणापीयूषधारास्सृता
या नारायणतीर्थ भूधरपरिक्षिप्तास्समस्ताश्च ताः ।
संभूयाच्युतभक्तभूमिषु वहन्त्यानन्दयन्ती जगत्
पावित्यं वितनोतु कृष्ण विलास ल्लीलातरङ्गिण्य सौ ॥ 315॥

कामदा कामिनामेषा मुमुक्षूणाञ्च मोक्षदा ।
शृण्वतां गायतां भक्त्या कृष्णलीलातरङ्गिणी ॥ ३१६ ॥

स्वामिन्सर्वजगन्निवास रचितां डोलां द्विजेन्द्रादिभिः
वज्रस्तम्भविचित्ररत्नखचितस्वर्णस्थले मण्डपे ।
आरुह्यामरवर्यगीत मुनिभिर्ध्येयात्ममूर्ते हरे
लावण्यामृतवारिधे विहर सत्कीर्तिं सुविस्तारय ॥ ३१७॥

१२० मदन गोपल ते मङ्गळम्

# मदनगोपाल ते मङ्गळम्

रागम्: मध्यमावति ताळम्: आदि

*पल्लवि*

मदनगोपाल ते मङ्गळम् मन्दरधर ते मङ्गळम्

*चरणम्*

श्रीरमणीकुचकुङ्कुमपङ्कविलिप्तविशालभुजान्तर
वारिजलोचन वल्लवयुवतीजार सदा ते मङ्गळम्[११] ॥ १॥

[११]This line is missing in some editions

कुण्डलयुगळी मण्डित मृदुतर-
गण्डस्थल ते मङ्गळम्
भण्डनसमुदितचण्डपुरासुर-
खण्डनचरण[१२] ते मङ्गळम् ॥ २॥

रङ्गकभङ्गपराक्रमसङ्गत
गङ्गाधर ते मङ्गळम्
अङ्गजजनक भुजङ्गम तुङ्ग-
तरङ्गशयन ते मङ्गळम् ॥ ३॥

दिनकरमण्डलमध्यग सन्तत-
विनतामर ते मङ्गळम्
वनजभवर्चितपादसरोरुह
मुनिजनहित ते मङ्गळम् ॥ ४॥

सामजपोषण शत्रुविभीषण
संभृतकौस्तुभभूषण
कामितदायक कमलनायक
सोमन्वय ते मङ्गळम् ॥ ५॥

✠ ✠ ✠ ✠ ✠

१२१ जय मङ्गळं नित्य शुभमङ्गळम्

# जय मङ्गळं नित्य शुभमङ्गळम्

रागम्: गौरि ताळम्: आदि

*पल्लवि*

जय मङ्गळं नित्य शुभमङ्गळम्

*चरणम्*

---

[१२]मोहन

मङ्गळं रुक्मिणीरमणाय श्रीमते
मङ्गळं रमणीयमूर्तये ते
मङ्गळं श्रीवत्सभूषणाय शार्ङ्गिणे
मङ्गळं नन्दगोपात्मजाय (जय मङ्गळं) ॥ १॥

पूतनाकम्सादिपुण्यजनहारिणे
पुरुहूतमुखदेवहितकराय
सूताय विजयस्य सुन्दरमुखाब्जाय
शीतकिरणादिकुलपावनाय (जय मङ्गळं) ॥ २॥

काळीयमौळिमणिरञ्जितपदाब्जाय
कालांबुदश्यामदिव्यतनवे
कारुण्यरसवर्षिनयनरविन्दाय
कल्याणगुणरत्नवारिनिधये (जय मङ्गळं) ॥ ३॥

नवनीतचोराय नन्दादिगोपगो-
रक्षिणे गोपिकावल्लभाय
नारदमुनीन्द्रनुतनामधेयाय ते
नारायणानन्दतीर्थगुरवे (जय मङ्गळं) ॥ ४॥

✠ ✠ ✠ ✠ ✠

*॥ इति श्रीनारायणतीर्थयतीन्द्रविरचितायां*
*श्रीकृष्णलीलातरङ्गिण्यां*
*श्रीकृष्णरुक्मिणीकल्याणमहोत्सववर्णनं नाम*
*द्वादशस्तरङ्गः समाप्तः ॥*

*॥ समाप्तोऽयं ग्रन्थः ॥*

The next two *kīrtanams* are usually attributed to Saint *Nārāyaṇatīrtha*, and do not form part of *śrīkṛṣṇalīlātaraṅgiṇi*.

शिव शिव भव भव

## शिव शिव भव भव

रागम्: सौराष्ट्रम्    ताळम्: आदि

### *पल्लवि*

शिव शिव भव भव शरणं मम
भवतु सदा तव स्मरणम्

### *चरणम्*

गङ्गाधर चन्द्रचूड जगन्मङ्गळ सर्वलोकनीड ॥ १ ॥

कैलासाचलवास शिव खर पुरहर धरहास ॥ २ ॥

भस्मोद्धूळितदेह शम्भो परमपुरुष वृषवाह ॥ ३ ॥

पञ्चानन फणिभूष शिव परमपुरुष मुनिवेष ॥ ४ ॥

आनदनटनविनोद सच्चिदानन्द विदळित खेद ॥ ५ ॥

नवव्याकरणस्वभाव शिव नारायणतीर्थदेव ॥ ६ ॥

✠ ✠ ✠ ✠ ✠

जय जय वैष्णवि दुर्गे

## जय जय वैष्णवि दुर्गे

रागम्: आरभि    ताळम्: धवळम्

*पल्लवि*

जय जय वैष्णवि दुर्गे जय जय कल्पितसर्गे
जय जय तोषित भर्गे जय जय कुचजित दुर्गे (जय)

*चरणम्*

श्रीकर सद्गुणजाले सिन्धूररञ्जित फाले
पाकशासनमणिनीले प्रालेयभूतर पाले (जय) ॥ १॥

पालित किसलयचापे पार्वति लोकैकदीपे
काळिक कोमल रूपे खण्डित त्रिभुवन तापे (जय) ॥ २॥

भक्तजनामरपूजे पाचितलोकसमाजे
रक्त मृदुल पादाम्बोजे रङ्गदुत्तुङ्गवक्षोजे (जय) ॥ ३॥

शङ्करि सत्कृपपूरे सम्भृत सन्मणिहारे
साङ्गवलिप्त शरीरे सङ्गतङ्केयूरे (जय) ॥ ४॥

वीणाविनोदिनि गिरिजे विद्रुममणि सन्निभ गिरिजे
मानितलोकसमाजे मदनगोपालक सहजे (जय) ॥ ५॥

✠ ✠ ✠ ✠ ✠